अपकृष्य च लज्जां सा स्वयमुक्तवती नृप ।
प्रयतन्तु तव प्रेष्याः पुण्यश्लोकस्य मार्गणे ॥ ३२ ॥
तया प्रचोदितो राजा ब्राह्मणान्वशवर्तिनः ।
प्रास्थापयद्दिशः सर्वा यतध्वं नलमार्गणे ॥ ३३ ॥
ततो विदर्भाधिपतेर्नियोगाद्ब्राह्मणास्तदा ।
दमयन्तीमथो गत्वा प्रस्थिताः स्मेत्यथाब्रुवन् ॥ ३४ ॥
अथ तानब्रवीद्भैमी सर्वराष्ट्रेष्विदं वचः ।
ब्रूयास्त जनसंसत्सु तत्र तत्र पुनः पुनः ॥ ३५ ॥
क्व नु त्वं कितव छित्त्वा वस्त्रार्धं प्रस्थितो मम ।
उत्सृज्य विपिने सुप्तामनुरक्तां प्रियां प्रिय ॥ ३६ ॥

सा वै यथा समादिष्टा तत्रास्ते त्वत्प्रतीक्षिणी ।
दह्यमाना भृशं बाला वस्त्रार्धेनाभिसंवृता ॥ ३७ ॥
तस्या रुदत्याः सततं तेन शोकेन पार्थिव ।
प्रसादं कुरु वै वीर प्रतिवाक्यं वदस्व च ॥ ३८ ॥
एवमन्यच्च वक्तव्यं कृपां कुर्याद्यथा मयि ।
वायुना धूयमानो हि वनं दहति पावकः ॥ ३९ ॥
एवं ब्रुवाणान्यदि वः प्रतिब्रूयाद्धि कश्चन ।
स नरः सर्वथा ज्ञेयः कश्चासौ क्व च वर्तते ॥ ४० ॥
यश्चैवं वचनं श्रुत्वा ब्रूयात्प्रतिवचो नरः ।
तदादाय वचस्तस्य ममावेद्यं द्विजोत्तमाः ॥ ४१ ॥
यथा च वो न जानीयाद्ब्रुवतो मम शासनात् ।
पुनरागमनं चैव तथा कार्यमतन्द्रितैः ॥ ४२ ॥
यदि वासौ समृद्धः स्याद्यदि वाप्यधनो भवेत् ।
यदि वाप्यर्थकामः स्याज्ज्ञेयं तस्य चिकीर्षितं ॥ ४३ ॥
एवमुक्तास्त्वगच्छंस्ते ब्राह्मणाः सर्वतो दिशः ।
नलं मृगयितुं राजंस्तदा व्यसनिनं तथा ॥ ४४ ॥
ते पुराणि सराष्ट्राणि ग्रामान्घोषांस्तथाश्रमान् ।
अन्वेषन्तो नलं राजन्नाधिजग्मुर्द्विजातयः ॥ ४५ ॥
तच्च वाक्यं तथा सर्वे तत्र तत्र विशांपते ।
श्रावयांचक्रिरे विप्रा दमयन्त्या यथेरितं ॥ ४६ ॥

॥ इति नलोपाख्याने सप्तदशो ऽध्यायः ॥

बृहदश्व उवाच ।

अथ दीर्घस्य कालस्य पर्णादो नाम वै द्विजः ।
प्रत्येत्य नगरं भैमीमिदं वचनमब्रवीत् ॥ १ ॥
नैषधं मृगयाणेन दमयन्ति मया नलं ।
अयोध्यां नगरीं गत्वा भाङ्गासुरिरुपस्थितः ॥ २ ॥
श्रावितश्च मया वाक्यं त्वदीयं स महामते ।
ऋतुपर्णो महाभागो यथोक्तं वरवर्णिनि ॥ ३ ॥
तच्छ्रुत्वा नाब्रवीत्किंचिदृतुपर्णो नराधिपः ।
न च पारिषदः कश्चिद्भाष्यमाणो मयासकृत् ॥ ४ ॥
अनुज्ञातं तु मां राज्ञा विजने कश्चिदब्रवीत् ।
ऋतुपर्णस्य पुरुषो बाहुको नाम नामतः ॥ ५ ॥
सूतस्तस्य नरेन्द्रस्य विरूपो ह्रस्वबाहुकः ।
शीघ्रयानेषु कुशलो मिष्टकर्ता च भोजने ॥ ६ ॥
स विनिःश्वस्य बहुशो रुदित्वा च पुनः पुनः ।
कुशलं चैव मां पृष्ट्वा पश्चादिदमभाषत ॥ ७ ॥
वैषम्यमपि संप्राप्ता गोपायन्ति कुलस्त्रियः ।
आत्मानमात्मना सत्यो जितस्वर्गा न संशयः ॥ ८ ॥
रहिता भर्तृभिश्चैव न क्रुध्यन्ति कदाचन ।
प्राणांश्चारित्रकवचान्धारयन्ति वरस्त्रियः ॥ ९ ॥
विषमस्थेन मूढेन परिभ्रष्टसुखेन च ।
यत्सा तेन परित्यक्ता तत्र न क्रोद्धुमर्हति ॥ १० ॥
प्राणयात्रां परिप्रेप्सोः शकुनैर्हृतवाससः ।
आधिभिर्दह्यमानस्य श्यामा न क्रोद्धुमर्हति ॥ ११ ॥

तस्य तद्वचनं श्रुत्वा त्वरितो ऽहमिहागतः ।
श्रुत्वा प्रमाणं भवती राज्ञश्चैव निवेद्य ॥ १२ ॥
एतच्छ्रुत्वाश्रुपूर्णाक्षी पर्णादस्य विशांपते ।
दमयन्ती रहो ऽभ्येत्य मातरं प्रत्यभाषत ॥ १३ ॥
अयमर्थो न संवेद्यो भीमे मातः कथंचन ।
त्वत्संनिधौ नियोक्ष्ये ऽहं सुदेवं द्विजसत्तमं ॥ १४ ॥
यथा न नृपतिर्भीमः प्रपिपद्येत मे मतिं ।
तथा त्वया प्रयत्तव्यं मम चेत्प्रियमिच्छसि ॥ १५ ॥
यथा चाहं समानीता सुदेवेनाशु बान्धवान् ।
तेनैव मङ्गलेनाशु सुदेवो यातु माचिरं ॥ १६ ॥
विश्रान्तं तु ततः पश्चात्पर्णादं द्विजसत्तमं ।
अर्चयामास वैदर्भी धनेनातीव भाविनी ॥ १७ ॥

दमयन्त्युवाच ।

त्वया हि मे बहु कृतं यथा नान्यः करिष्यति ।
यद्भर्त्राहं समेष्यामि शीघ्रमेव द्विजोत्तम ॥ १८ ॥

बृहदश्व उवाच ।

एवमुक्तो ऽथाश्वास्य तामाशीर्वादैः समङ्गलैः ।
गृहानुपययौ चापि कृतार्थः सुमहामनाः ॥ १९ ॥
ततः सुदेवमाभाष्य दमयन्ती युधिष्ठिर ।
अब्रवीत्संनिधौ मातुर्दुःखशोकसमन्विता ॥ २० ॥
गत्वा सुदेव नगरीमयोध्यावासिनं नृपं ।
ऋतुपर्णं वचो ब्रूहि संपतन्निव कामगः ॥ २१ ॥

आस्थास्यति पुनर्भैमी दमयन्ती स्वयंवरं ।
तत्र गच्छन्ति राजानो राजपुत्राश्च सर्वशः ॥ २२ ॥
तथा च गणितः कालः श्वोभूते स भविष्यति ।
यदि संभावनीयस्ते गच्छ शीघ्रमरिंदम ॥ २३ ॥
सूर्योदये द्वितीयं सा भर्तारं वरयिष्यति ।
न हि स ज्ञायते वीरो नलो जीवति वा न वा ॥ २४ ॥
एवं तया यथोक्तो वै गत्वा राजानमब्रवीत् ।
ऋतुपर्णं महाराज सुदेवो ब्राह्मणस्तदा ॥ २५ ॥

॥ इति नलोपाख्याने ऽष्टादशो ऽध्यायः ॥

---

बृहदश्व उवाच ।

श्रुत्वा वचः सुदेवस्य ऋतुपर्णो नराधिपः ।
शान्तयञ्श्लक्ष्णया वाचा बाहुकं प्रत्यभाषत ॥ १ ॥
विदर्भान्यातुमिच्छामि दमयन्त्याः स्वयंवरं ।
एकाह्ना हयतत्त्वज्ञ मन्यसे यदि बाहुक ॥ २ ॥
एवमुक्तस्य कौन्तेय तेन राज्ञा नलस्य ह ।
व्यदीर्यत मनो दुःखात्प्रदध्यौ च महामनाः ॥ ३ ॥
दमयन्ती वदेदेतत्कुर्याद्दुःखेन मोहिता ।
अस्मदर्थे भवेद्वायमुपायश्चिन्तितो महान् ॥ ४ ॥
नृशंसं बत वैदर्भी कर्तुकामा तपस्विनी ।
मया क्षुद्रेण निकृता कृपणा पापबुद्धिना ॥ ५ ॥

स्त्रीस्वभावश्चलो लोके मम दोषश्च दारुणः ।
स्यादेवमपि कुर्यात्सा विवासाद्गतसौहृदा ॥ ६ ॥
मम शोकेन संविग्ना नैराश्यात्तनुमध्यमा ।
नैवं सा कर्हिचित्कुर्यात्सापत्या च विशेषतः ॥ ७ ॥
यदत्र सत्यं वासत्यं गत्वा वेत्स्यामि निश्चयं ।
ऋतुपर्णस्य वै काममात्मार्थं च करोम्यहं ॥ ८ ॥
इति निश्चित्य मनसा वाहुको दीनमानसः ।
कृताञ्जलिरुवाचेदमृतुपर्णं नराधिपं ॥ ९ ॥
प्रतिजानामि ते वाक्यं गमिष्यामि नराधिप ।
एकाह्ना पुरुषव्याघ्र विदर्भनगरीं नृप ॥ १० ॥
ततः परीक्षामश्वानां चक्रे राजन्स वाहुकः ।
अश्वशालामुपागम्य भाङ्गासुरिनृपाज्ञया ॥ ११ ॥
स त्वर्यमाणो बहुश ऋतुपर्णेन वाहुकः ।
अध्यगच्छत्कृशानश्वान्समर्थानध्वनि क्षमान् ॥ १२ ॥
तेजोबलसमायुक्तान्कुलशीलसमन्वितान् ।
वर्जिताँल्लक्षणैर्हीनैः पृथुप्रोथान्महाहनून् ॥ १३ ॥
दृष्ट्वा तानब्रवीद्राजा किंचित्कोपसमन्वितः ।
किमिदं प्रार्थितं कर्तुं प्रलब्धव्या न ते वयं ॥ १४ ॥
कथमल्पबलप्राणा वक्ष्यन्तीमे हया मम ।
महदध्वानमपि च गन्तव्यं कथमीदृशैः ॥ १५ ॥

वाहुक उवाच ।

एते हया गमिष्यन्ति विदर्भान्नात्र संशयः ।
यानन्यान्मन्यसे राजन्ब्रूहि तान्योजयामि ते ॥ १६ ॥

ऋतुपर्ण उवाच ।

त्वमेव हयतत्त्वज्ञः कुशलो ह्यसि बाहुक ।
यान्मन्यसे समर्थांस्त्वं क्षिप्रं तानेव योजय ॥ १७ ॥

बृहदश्व उवाच ।

ततः सदश्वांश्चतुरः कुलशीलसमन्वितान् ।
योजयामास कुशलो जवयुक्तान्रथे नलः ॥ १८ ॥
ततो युक्तं रथं राजा समारोहत्त्वरान्वितः ।
अथ पर्यपतन्भूमौ जानुभिस्ते हयोत्तमाः ॥ १९ ॥
ततो नरवरः श्रीमान्नलो राजा विशांपते ।
सान्त्वयामास तानश्वांस्तेजोबलसमन्वितान् ॥ २० ॥
रश्मिभिश्च समुद्यम्य नलो यातुमियेष सः ।
सूतमारोप्य वार्ष्णेयं जवमास्थाय वै परं ॥ २१ ॥
ते नोद्यमाना विधिवद्बाहुकेन हयोत्तमाः ।
समुत्पेतुरथाकाशं रथिनं मोहयन्निव ॥ २२ ॥
तथा तु दृष्ट्वा तानश्वान्वहतो वातरंहसः ।
अयोध्याधिपतिः श्रीमान्विस्मयं परमं ययौ ॥ २३ ॥
रथघोषं तु तं श्रुत्वा हयसंग्रहणं च तद् ।
वार्ष्णेयश्चिन्तयामास बाहुकस्य हयज्ञतां ॥ २४ ॥
किं नु स्यान्मातलिरयं देवराजस्य सारथिः ।
तथा तल्लक्षणं वीरे बाहुके दृश्यते महत् ॥ २५ ॥
उताहो स्विद्भवेद्राजा नलः परपुरंजयः ।
तुल्यं हि लक्षये ज्ञानं बाहुकस्य नलस्य च ॥ २६ ॥

अपि चेदं वयस्तुल्यं वाहुकस्य नलस्य च ।
भवेत्तु मतिभेदो मे गात्रवैरूप्यतां प्रति ॥ २७ ॥
एवं विचार्य बहुशो वार्ष्णेयः पर्यचिन्तयत् ।
हृदयेन महाराज पुण्यश्लोकस्य सारथिः ॥ २८ ॥
ऋतुपर्णस्तु राजेन्द्रो वाहुकस्य हयज्ञतां ।
परं यत्नं च संप्रेक्ष्य परां मुदमवाप ह ॥ २९ ॥

॥ इति नलोपाख्याने नवदशो ऽध्यायः ॥

---

बृहदश्व उवाच ।

तथा प्रयाते तु रथे तदा भाङ्गासुरिर्नृपः ।
उत्तरीयमधो ऽपश्यद्भ्रष्टं परपुरंजयः ॥ १ ॥
ततः स त्वरमाणस्तु पटे निपतिते तदा ।
ग्रहीष्यामीति तं राजा नलमाह महामनाः ॥ २ ॥
नलस्तं प्रत्युवाचाथ दूरे भ्रष्टः पटस्तव ।
योजनं समतिक्रान्तो नाहर्तुं शक्यते पुनः ॥ ३ ॥
एवमुक्तो नलेनाथ तदा भाङ्गासुरिर्नृपः ।
आससाद वने राजन्फलवन्तं बिभीतकं ॥ ४ ॥
तं दृष्ट्वा वाहुकं राजा त्वरमाणो ऽभ्यभाषत ।
ममापि सूत पश्य त्वं संख्याने परमं बलं ॥ ५ ॥
सर्वः सर्वं न जानाति सर्वज्ञो नास्ति कश्चन ।
नैकत्र परिनिष्ठास्ति ज्ञानस्य पुरुषे क्वचित् ॥ ६ ॥
वृक्षे ऽस्मिन्यानि पर्णानि फलान्यपि च वाहुक ।
पतितानि च यान्यत्र तत्रैकमधिकं शतं ॥ ७ ॥

ततो रथमवस्थाप्य राजानं बाहुको ऽब्रवीत्।
परोक्षमिव मे राजन्कत्थसे शत्रुकर्षण ॥ ८ ॥
प्रत्यक्षं ते महाराज शातयिष्ये बिभीतकं।
अहं हि नाभिजानामि भवेदेवं न वेति च ॥ ९ ॥
संख्यास्यामि फलान्यस्य पश्यतस्ते जनाधिप।
मुहूर्तमपि वार्ष्णेयो रश्मीन्यच्छतु वाजिनां ॥ १० ॥
तमब्रवीन्नृपः सूतं नायं कालो विलम्बितुं।
बाहुकस्त्वब्रवीदेनं परं यत्नं समास्थितः ॥ ११ ॥
प्रतीक्षस्व मुहूर्तं त्वमथवा त्वरते भवान्।
एष याति शिवः पन्था याहि वार्ष्णेयसारथिः ॥ १२ ॥
अब्रवीदृतुपर्णस्तु सान्त्वयन्कुरुनन्दन।
त्वमिव यन्ता नान्यो ऽस्ति पृथिव्यामपि बाहुक ॥ १३ ॥
त्वत्कृते यातुमिच्छामि विदर्भान्हयकोविद।
शरणं त्वां प्रपन्नो ऽस्मि न विघ्नं कर्तुमर्हसि ॥ १४ ॥
कामं च ते करिष्यामि यन्मां वक्ष्यसि बाहुक।
विदर्भान्यदि यात्वाद्य सूर्यं दर्शयितासि मे ॥ १५ ॥
अथाब्रवीद्बाहुकस्तं संख्याय च बिभीतकं।
ततो विदर्भान्यास्यामि कुरुष्वैवं वचो मम ॥ १६ ॥
अकाम इव तं राजा गणयस्वेत्युवाच ह।
सो ऽवतीर्य रथात्तूर्णं शातयामास तं द्रुमं ॥ १७ ॥
ततः स विस्मयाविष्टो राजानमिदमब्रवीत्।
गणयित्वा यथोक्तानि तावन्त्येव फलानि च ॥ १८ ॥
अत्यद्भुतमिदं राजन्दृष्टवानस्मि ते बलं।
श्रोतुमिच्छामि तां विद्यां यथैतज्ज्ञायते नृप ॥ १९ ॥

तमुवाच ततो राजा त्वरितो गमने नृपः ।
विद्यावदृदयज्ञं मां संख्याने च विशारदं ॥ २० ॥
बाहुकस्तमुवाचाथ देहि विद्यामिमां मम ।
मत्तो ऽपि चाश्वहृदयं गृहाण पुरुषर्षभ ॥ २१ ॥
ऋतुपर्णस्ततो राजा बाहुकं कार्यगौरवात् ।
हयज्ञानस्य लोभाच्च तथेत्येवाब्रवीद्वचः ॥ २२ ॥
यथोक्तं त्वं गृहाणेदमक्षाणां हृदयं परं ।
निक्षेपो मे ऽश्वहृदयं त्वयि तिष्ठति बाहुक ॥ २३ ॥
तस्याक्षहृदयज्ञस्य शरीरान्निःसृतः कलिः ।
कर्कोटकविषं तीक्ष्णं मुखात्सततमुद्वमन् ॥ २४ ॥
ततो विषविमुक्तात्मा स्वं रूपमकरोत्कलिः ।
तं शप्तुमैच्छत्कुपितो निषधाधिपतिर्नलः ॥ २५ ॥
तमुवाच कलिर्भीतो वेपमानः कृताञ्जलिः ।
कोपं संयच्छ नृपते कीर्तिं दास्यामि ते परां ॥ २६ ॥
इन्द्रसेनस्य जननी कुपिता माशपत्पुरा ।
यदा त्वया परित्यक्ता ततो ऽहं भृशपीडितः ॥ २७ ॥
अवसं त्वयि राजेन्द्र सुदुःखमपराजित ।
विषेण नागराजस्य दह्यमानो दिवानिशं ॥ २८ ॥
शरणं त्वां प्रपन्नो ऽस्मि शृणु चेदं वचो मम ।
ये च त्वां मनुजा लोके कीर्तयिष्यन्त्यतन्द्रिताः ॥ २९ ॥
मत्प्रसूतं भयं तेषां न कदाचिद्भविष्यति ।
भयार्त्तं शरणं यातं यदि मां त्वं न शप्स्यसे ॥ ३० ॥
एवमुक्तो नलो राजा न्ययच्छत्कोपमात्मनः ।
कलिस्त्वन्येन नादृश्यत्कथयन्नैषधेन वै ॥ ३१ ॥

ततो गतज्वरो राजा नैषधः परवीरहा ।
रथमारुह्य तेजस्वी प्रययौ जवनैर्हयैः ॥ ३२ ॥
हयोत्तमानुत्पततो द्विजानिव पुनः पुनः ।
नलः संचोदयामास प्रहृष्टेनान्तरात्मना ॥ ३३ ॥
विदर्भाभिमुखो राजा प्रययौ स महायशाः ।
नले तु समतिक्रान्ते कलिरप्यगमद्गृहं ॥ ३४ ॥
ततो गतज्वरो राजा नलो ऽभूत्पृथिवीपतिः ।
विमुक्तः कलिना राजन्रूपमात्रवियोजितः ॥ ३५ ॥

॥ इति नलोपाख्याने विंशतितमो ऽध्यायः ॥

---

बृहदश्व उवाच ।

ततो विदर्भान्संप्राप्तं सायाह्ने सत्यविक्रमं ।
ऋतुपर्णं जना राज्ञे भीमाय प्रत्यवेदयन् ॥ १ ॥
स भीमवचनाद्राजा कुण्डिनं प्राविशत्पुरं ।
नादयन्रथघोषेण सर्वाः सविदिशो दिशः ॥ २ ॥
ततस्तं रथनिर्घोषं नलाश्वास्तत्र शुश्रुवुः ।
श्रुत्वा तु समहृष्यन्त पुरेव नलसंनिधौ ॥ ३ ॥
दमयन्ती तु शुश्राव रथघोषं नलस्य तं ।
यथा मेघस्य नदतो गम्भीरं जलदागमे ॥ ४ ॥
नलेन संगृहीतेषु पुरेव नलवाजिषु ।
सदृशं हयनिर्घोषं मेने भैमी तथा हयाः ॥ ५ ॥
प्रासादस्थाश्च शिखिनः शालास्थाश्चैव वारणाः ।
हयाश्च शुश्रुवुस्तस्य रथघोषं महीपतेः ॥ ६ ॥

ते श्रुत्वा रथनिर्घोषं वारणाः शिखिनस्तथा ।
प्रणेदुरुन्मुखा राजन्मेघनाद इवोत्सुकाः ॥ ७ ॥

दमयन्त्युवाच ।

यथासौ रथनिर्घोषः पूरयन्निव मेदिनीं ।
ममाह्लादयते चेतो नल एष महीपतिः ॥ ८ ॥
अद्य चन्द्राभवक्त्रं तं न पश्यामि नलं यदि ।
असंख्येयगुणं वीरं विनङ्क्ष्यामि न संशयः ॥ ९ ॥
यदि चैतस्य वीरस्य बाह्वोर्नाद्याहमन्तरं ।
प्रविशामि सुखस्पर्शं न भविष्याम्यसंशयं ॥ १० ॥
यदि मां मेघनिर्घोषो नोपगच्छति नैषधः ।
अद्य चामीकरप्रख्यं प्रवेक्ष्यामि हुताशनं ॥ ११ ॥
न स्मराम्यनृतं किंचिन्न स्मराम्यपकारितां ।
न च पर्युषितं वाक्यं स्वैरेष्वपि कदाचन ॥ १२ ॥
प्रभुः क्षमावान्वीरश्च दाता चाभ्यधिको नृपैः ।
रहो ऽनीचानुवर्ती च क्लीववन्मम नैषधः ॥ १३ ॥
गुणांस्तस्य स्मरन्त्या मे तत्पराया दिवानिशं ।
हृदयं दीर्यत इदं शोकात्प्रियविनाकृतं ॥ १४ ॥

बृहदश्व उवाच ।

एवं विलपमाना सा नष्टसंज्ञेव भारत ।
आरुरोह महद्वेश्म पुण्यश्लोकदिदृक्षया ॥ १५ ॥
ततो मध्यमकक्षायां ददर्श रथमास्थितं ।
ऋतुपर्णं महीपालं सहवार्ष्णेयबाहुकं ॥ १६ ॥

ततो ऽवतीर्य वार्ष्णेयो बाहुकश्च रथोत्तमात् ।
हयांस्तानवमुच्याथ स्थापयामास वै रथं ॥ १७ ॥
सो ऽवतीर्य रथोपस्थादृतुपर्णो नराधिपः ।
उपतस्थे महाराजं भीमं भीमपराक्रमं ॥ १८ ॥
तं भीमः प्रतिजग्राह पूजया परया ततः ।
अकस्मात्सहसा प्राप्तं स्त्रीमन्त्रं न स्म विन्दति ॥ १९ ॥
ऋतुपर्णो ऽपि राजा स धीमान्सत्यपराक्रमः ।
राजानं राजपुत्रं वा न स्म पश्यति कंचन ॥ २० ॥
स तेन पूजितो राजा ऋतुपर्णो नराधिपः ।
किं कार्यं स्वागतं ते ऽस्तु राज्ञा पृष्टः स भारत ॥ २१ ॥
ततो विगणयन्राजा मनसा कोशलाधिपः ।
आगतो ऽस्मीत्युवाचैनं भवन्तमभिवादकः ॥ २२ ॥
राजापि च स्मयन्भीमो मनसा समचिन्तयत् ।
अल्पकार्यं विनिर्दिष्टं तस्यागमनकारणं ॥ २३ ॥
नैतदेवं स नृपतिस्तं सत्कृत्य व्यसर्जयत् ।
विश्राम्यतामित्युवाच क्लान्तो ऽसीति पुनः पुनः ॥ २४ ॥
स सत्कृतः प्रहृष्टात्मा प्रीतः प्रीतेन पार्थिवः ।
राजप्रेष्यैरनुगतो दिष्टं वेश्म समाविशत् ॥ २५ ॥
ऋतुपर्णे गते राजन्वार्ष्णेयसहिते नृपे ।
बाहुको रथमादाय रथशालामुपागमत् ॥ २६ ॥
स मोचयित्वा तानश्वानुपचर्य च शास्त्रतः ।
स्वयं चैतान्समाश्वास्य रथोपस्थ उपाविशत् ॥ २७ ॥
दमयन्ती तु शोकार्त्ता दृष्ट्वा भाङ्गसुरिं नृपं ।
सूतपुत्रं च वार्ष्णेयं बाहुकं च तथाविधं ॥ २८ ॥

चिन्तयामास वैदर्भी कस्यैष रथनिस्वनः ।
नलस्येव मन्हानसीह च पश्यामि नैषधं ॥ २९ ॥
वार्ष्णेयेन भवेन्नूनं विद्या सैवोपशिक्षिता ।
तेनाद्य रथनिर्घोषो नलस्येव मन्हानभूत् ॥ ३० ॥
आहो स्विदृतुपर्णो ऽपि यथा राजा नलस्तथा ।
तथायं रथनिर्घोषो नैषधस्येव लक्ष्यते ॥ ३१ ॥
एवं सा तर्कयित्वा तु दमयन्ती विशांपते ।
दूतीं प्रस्थापयामास नैषधान्वेषणे शुभा ॥ ३२ ॥

॥ इति नलोपाख्याने एकविंशतितमो ऽध्यायः ॥

---

दमयन्त्युवाच ।

गच्छ केशिनि जानीहि क एष रथवाहकः ।
उपविष्टो रथोपस्थे विकृतो ह्रस्वबाहुकः ॥ १ ॥
अभ्येत्य कुशलं भद्रे मृदुपूर्वं समाहिता ।
पृच्छेथाः पुरुषं ह्येनं यथातत्त्वमनिन्दिते ॥ २ ॥
अत्र मे महती शङ्का भवेदेष नलो नृपः ।
यथा च मनसस्तुष्टिर्हृदयस्य च निर्वृतिः ॥ ३ ॥
ब्रूयाश्चैनं कथान्ते त्वं पर्णादवचनं यथा ।
प्रतिवाक्यं च सुश्रोणि बुध्येथास्त्वमनिन्दिते ॥ ४ ॥

बृहदश्व उवाच ।

ततः समाहिता गत्वा दूती बाहुकमब्रवीत् ।
दमयन्त्यपि कल्याणी प्रासादस्था ह्युपैक्षत ॥ ५ ॥

स्वागतं ते मनुष्येन्द्र कुशलं ते ब्रवीम्यहं ।
दमयन्त्या वचः साधु निबोध पुरुषर्षभ ॥ ६ ॥
कदा वै प्रस्थिता यूयं किमर्थमिह चागताः ।
तत्त्वं ब्रूहि यथान्यायं वैदर्भी श्रोतुमिच्छति ॥ ७ ॥

वाहुक उवाच ।

श्रुतः स्वयंवरो राज्ञा कौशल्येन महात्मना ।
द्वितीयो दमयन्त्या वै भविता श्व इति द्विजात् ॥ ८ ॥
श्रुत्वैतत्प्रस्थितो राजा शतयोजनयायिभिः ।
हयैर्वातजवैर्मुख्यैरहमस्य च सारथिः ॥ ९ ॥

केशिन्युवाच ।

अथ यो ऽसौ तृतीयो वः स कुतः कस्य वा पुनः ।
त्वं च कस्य कथं चेदं त्वयि कर्म समाहितं ॥ १० ॥

वाहुक उवाच ।

पुण्यश्लोकस्य वै सूतो वार्ष्णेय इति विश्रुतः ।
स नले प्रद्रुते भद्रे भाङ्गासुरिमुपास्थितः ॥ ११ ॥
अहमप्यश्वकुशलः सूतत्वे च प्रतिष्ठितः ।
ऋतुपर्णेन सारथ्ये भोजने च वृतः स्वयं ॥ १२ ॥

केशिन्युवाच ।

अथ जानाति वार्ष्णेयः क्व नु राजा नलो गतः ।
कथं च त्वयि चैतेन कथितं स्यात्तु वाहुक ॥ १३ ॥

वाहुक उवाच ।

इहैव पुत्रौ निक्षिप्य नलस्याशुभकर्मणः ।
गतस्ततो यथाकामं नैष जानाति नैषधं ॥ १४ ॥
न चान्यः पुरुषः कश्चिन्नलं वेत्ति यशस्विनि ।
गूढश्चरति लोके ऽस्मिन्नष्टरूपो महीपतिः ॥ १५ ॥
आत्मैव तु नलं वेत्ति या चास्य तदनन्तरा ।
न हि वै स्वानि लिङ्गानि नलः शंसति कर्हिचित् ॥ १६ ॥

केशिन्युवाच ।

यो ऽसावयोध्यां प्रथमं गतवान्ब्राह्मणस्तदा ।
इमानि नारीवाक्यानि कथयानः पुनः पुनः ॥ १७ ॥
क्व नु त्वं कितव छित्त्वा वस्त्रार्धं प्रस्थितो मम ।
उत्सृज्य विपिने सुप्तामनुरक्तां प्रियां प्रिय ॥ १८ ॥
सा वै यथा समादिष्टा तथास्ते त्वत्प्रतीक्षिणी ।
दह्यमाना भृशं बाला वस्त्रार्धेनाभिसंवृता ॥ १९ ॥
तस्या रुदन्त्याः सततं तेन शोकेन पार्थिव ।
प्रसादं कुरु वै वीर प्रतिवाक्यं वदस्व च ॥ २० ॥
एतच्छ्रुत्वा प्रतिवचस्तस्य दत्तं त्वया किल ।
यत्पुरा तत्पुनस्त्वत्तो वैदर्भी श्रोतुमिच्छति ॥ २१ ॥

बृहदश्व उवाच ।

एवमुक्तस्य केशिन्या नलस्य कुरुनन्दन ।
हृदयं व्यथितं चासीदश्रुपूर्णे च लोचने ॥ २२ ॥

स निगृह्यात्मनो दुःखं दह्यमानो महीपतिः ।
वाष्पसंदिग्धया वाचा पुनरेवेदमब्रवीत् ॥ २३ ॥
वैषम्यमपि संप्राप्ता गोपायन्ति कुलस्त्रियः ।
आत्मानमात्मना सत्यो जितस्वर्गा न संशयः ॥ २४ ॥
रहिता भर्तृभिश्चैव न क्रुध्यन्ति कदाचन ।
प्राणांश्चारित्रकवचान्धारयन्ति वरस्त्रियः ॥ २५ ॥
विषमस्थेन मूढेन परिभ्रष्टसुखेन च ।
यत्सा तेन परित्यक्ता तत्र न क्रोद्धुमर्हति ॥ २६ ॥
प्राणयात्रां परिप्रेप्सोः शकुनैर्हृतवाससः ।
आधिभिर्दह्यमानस्य श्यामा न क्रोद्धुमर्हति ॥ २७ ॥
एवं ब्रुवाणस्तद्वाक्यं नलः परमदुःखितः ।
न वाष्पमशकत्सोढुं प्ररुरोदाथ भारत ॥ २८ ॥
ततः सा केशिनी गत्वा दमयन्त्यै न्यवेदयत् ।
तत्सर्वं कथितं चैव विकारं चैव तस्य तं ॥ २९ ॥

॥ इति नलोपाख्याने द्वाविंशतितमो ऽध्यायः ॥

---

बृहदश्व उवाच ।

दमयन्ती तु तच्छ्रुत्वा भृशं शोकपरायणा ।
शङ्कमाना नलं तं वै केशिनीमिदमब्रवीत् ॥ १ ॥
गच्छ केशिनि भूयस्त्वं परीक्षां कुरु वाहुके ।
तत्र संचेष्टमानस्य लक्षयन्ती विचेष्टितं ॥ २ ॥
न चास्य प्रतिबन्धेन देयो ऽग्निरपि केशिनि ।
याचते न जलं देयं सर्वथा त्वरमाणया ॥ ३ ॥

निमित्तं यत्त्वया दृष्टं बाहुके दैवमानुषं ।
यच्चान्यदपि पश्येथास्तच्चाख्येयं त्वया मम ॥ ४ ॥
दमयन्त्यैवमुक्ता सा जगामाथ च केशिनी ।
निशम्याथ हयज्ञस्य लिङ्गानि पुनरागमत् ॥ ५ ॥
सा तत्सर्वं यथावृत्तं दमयन्त्यै न्यवेदयत् ।
निमित्तं यत्तया दृष्टं बाहुके दैवमानुषं ॥ ६ ॥

केशिन्युवाच ।

दृढं शुच्युपचारोऽसौ न मया मानुषः क्वचित् ।
दृष्टपूर्वः श्रुतो वापि दमयन्ति तथाविधः ॥ ७ ॥
ह्रस्वमासाद्य संचारं नासौ विनमते क्वचित् ।
तं तु दृष्ट्वा यथासङ्गमुत्सर्पति यथासुखं ॥ ८ ॥
ऋतुपर्णस्य चार्थाय भोजनीयमनेकशः ।
प्रेषितं तत्र राज्ञा तु मांसं बहु च पाशवं ॥ ९ ॥
तस्य प्रक्षालनार्थाय कुम्भास्तत्रोपकल्पिताः ।
ते तेनावेक्षिताः कुम्भाः पूर्णा एवाभवंस्ततः ॥ १० ॥
ततः प्रक्षालनं कृत्वा समधिश्रित्य बाहुकः ।
तृणमुष्टिं समादाय सवितुस्तं समादधत् ॥ ११ ॥
अथ प्रज्वलितस्तत्र सहसा हव्यवाहनः ।
तदद्भुततमं दृष्ट्वा विस्मिताहमिहागता ॥ १२ ॥
अन्यच्च तस्मिन्सुमहदाश्चर्यं लक्षितं मया ।
यदग्निमपि संस्पृश्य नैवासौ दह्यते शुभे ॥ १३ ॥
अतीव चान्यत्सुमहदाश्चर्यं दृष्टवत्यहं ।
यत्स पुष्पाण्युपादाय हस्ताभ्यां ममृदे शनैः ॥ १४ ॥

मृद्यमानानि पाणिभ्यां तेन पुष्पाणि तान्यथ ।
भूय एव सुगन्धीनि हृषितानि भवन्ति हि ॥ १५ ॥

वृहदश्व उवाच ।

दमयन्ती तु तच्छ्रुत्वा पुण्यश्लोकस्य चेष्टितं ।
अमन्यत नलं प्राप्तं कर्मचेष्टाभिसूचितं ॥ १६ ॥
सा शङ्कमाना भर्तारं नलं बाहुकरूपिणं ।
केशिनीं श्लक्ष्णया वाचा रुदती पुनरब्रवीत् ॥ १७ ॥
पुनर्गच्छ प्रमत्तस्य बाहुकस्योपसंस्कृतं ।
महानसाच्छृतं मांसं समादायैहि भाविनि ॥ १८ ॥
सा गत्वा बाहुकस्याग्रे तन्मांसमपकृष्य च ।
दमयन्त्यै ततः प्रादात्केशिनी कुरुनन्दन ॥ १९ ॥
सोचिता नलसिद्धस्य मांसस्य बहुशः पुरा ।
प्राश्य मत्वा नलं सूतं प्राक्रोशद्भृशदुःखिता ॥ २० ॥
वैक्लव्यं परमं गत्वा प्रक्षाल्य च मुखं ततः ।
मिथुनं प्रेषयामास केशिन्या सह भारत ॥ २१ ॥
इन्द्रसेनां सह भ्रात्रा समभिज्ञाय बाहुकः ।
अभिद्रुत्य ततो राजा परिष्वज्याङ्कमानयत् ॥ २२ ॥
बाहुकस्तु समासाद्य सुतौ सुरसुतोपमौ ।
भृशं दुःखपरीतात्मा सुस्वरं प्ररुरोद ह ॥ २३ ॥
नैषधो दर्शयित्वा तु विकारमसकृत्तदा ।
उत्सृज्य सहसा पुत्रौ केशिनीमिदमब्रवीत् ॥ २४ ॥
इदं सुसदृशं भद्रे मिथुनं मम पुत्रयोः ।
अतो दृष्ट्वैव सहसा बाष्पमुत्सृष्टवानहं ॥ २५ ॥

बहुशः संपतन्तीं त्वां जनः शङ्केत दोषतः ।
वयं च देशातिथयो गच्छ भद्रे यथासुखं ॥ २६ ॥

॥ इति नलोपाख्याने त्रयोविंशतितमो ऽध्यायः ॥

---

बृहदश्व उवाच ।

सर्वं विकारं दृष्ट्वा तु पुण्यश्लोकस्य धीमतः ।
आगत्य केशिनी क्षिप्रं दमयन्त्यै न्यवेदयत् ॥ १ ॥
दमयन्ती ततो भूयः प्रेषयामास केशिनीं ।
मातुः सकाशं दुःखार्त्ता नलदर्शनकाङ्क्षया ॥ २ ॥
परीक्षितो मे बहुशो बाहुको नलशङ्कया ।
रूपे मे संशयस्त्वेकः स्वयमिच्छामि वेदितुं ॥ ३ ॥
स वा प्रवेश्यतां मातर्मां वानुज्ञातुमर्हसि ।
विदितं वाथवाज्ञातं पितुर्मे संविधीयतां ॥ ४ ॥
एवमुक्ता तु वैदर्भ्या सा देवी भीममब्रवीत् ।
दुहितुस्तमभिप्रायमन्वजानात्स पार्थिवः ॥ ५ ॥
सा वै पित्राभ्यनुज्ञाता मात्रा च भरतर्षभ ।
नलं प्रवेशयामास यत्र तस्याः प्रतिश्रयः ॥ ६ ॥
तां स्म दृष्ट्वैव सहसा दमयन्तीं नलो नृपः ।
आविष्टः शोकदुःखाभ्यां बभूवाश्रुपरिप्लुतः ॥ ७ ॥
तं तु दृष्ट्वा तथायुक्तं दमयन्ती नलं तदा ।
तीव्रशोकसमाविष्टा बभूव वरवर्णिनी ॥ ८ ॥
ततः काषायवसना जटिला मलपङ्किनी ।
दमयन्ती महाराज बाहुकं वाक्यमब्रवीत् ॥ ९ ॥

पूर्वं दृष्टस्त्वया कश्चिद्धर्मज्ञो नाम वाहुक ।
सुप्तामुत्सृज्य विपिने गतो यः पुरुषः स्त्रियं ॥ १० ॥
अनागसं प्रियां भार्यां विजने श्रममोहितां ।
अपहाय तु को गच्छेत्पुण्यश्लोकमृते नलं ॥ ११ ॥
किं नु तस्य मया बाल्यादपराद्धं महीपतेः ।
यो मामुत्सृज्य विपिने गतवान्निद्रया हृतां ॥ १२ ॥
साक्षाद्देवानपहाय वृतो यः स मया पुरा ।
अनुव्रतां साभिकामां पुत्रिणीं त्यक्तवान्कथं ॥ १३ ॥
अग्नौ पाणिं गृहीत्वा तु देवानामग्रतस्तथा ।
भविष्यामीति सत्यं तु प्रतिश्रुत्य क्व तद्गतं ॥ १४ ॥
दमयन्त्या ब्रुवन्त्यास्तु सर्वमेतदरिंदम ।
शोकजं वारि नेत्राभ्यामसुखं प्रास्रवद्बहु ॥ १५ ॥
अतीव कृष्णसाराभ्यां रक्तान्ताभ्यां जलं तु तद् ।
परिस्रवन्नलो दृष्ट्वा शोकार्त्तामिदमब्रवीत् ॥ १६ ॥
मम राज्यं प्रनष्टं यन्नाहं तत्कृतवान्स्वयं ।
कलिना तत्कृतं भीरु यच्च त्वामहमत्यजं ॥ १७ ॥
कथं तु नारी भर्तारमनुरक्तमनुव्रतं ।
उत्सृज्य वरयेदन्यं यथा त्वं भीरु कर्हिचित् ॥ १८ ॥
दूताश्चरन्ति पृथिवीं कृत्स्नां नृपतिशासनात् ।
भैमी किल स्म भर्तारं द्वितीयं वरयिष्यति ॥ १९ ॥
दमयन्ती तु तच्छ्रुत्वा नलस्य परिदेवितं ।
प्राञ्जलिर्वेपमाना च भीता च नलमब्रवीत् ॥ २० ॥
न मामर्हसि कल्याण दोषेण परिशङ्कितुं ।
मया हि देवानुत्सृज्य वृतस्त्वं निषधाधिप ॥ २१ ॥

तवाधिगमनार्थं तु सर्वतो ब्राह्मणा गताः ।
वाक्यानि मम गाथाभिर्गायमाना दिशो दश ॥ २२ ॥
ततस्त्वां ब्राह्मणो विद्वान्पर्णादो नाम पार्थिव ।
अभ्यगच्छत्कोशलायामृतुपर्णनिवेशने ॥ २३ ॥
तेन वाक्ये कृते सम्यक्प्रतिवाक्ये तथाहृते ।
उपायो ऽयं मया दृष्टो नैषधानयने तव ॥ २४ ॥
त्वामृते न हि लोके ऽन्य एकाह्ना पृथिवीपते ।
समर्थो योजनशतं गन्तुमश्वैर्नराधिप ॥ २५ ॥
स्पृशेयं तेन सत्येन पादावेतौ महीपते ।
यथा नासत्कृतं किंचिन्मनसापि चराम्यहं ॥ २६ ॥
अयं चरति लोके ऽस्मिन्भूतसाक्षी सदागतिः ।
एष मे मुञ्चतु प्राणान्यदि पापं चराम्यहं ॥ २७ ॥
तथा चरति तिग्मांशुः परेण भुवनं सदा ।
स मुञ्चतु मम प्राणान्यदि पापं चराम्यहं ॥ २८ ॥
चन्द्रमाः सर्वभूतानामन्तश्चरति साक्षिवत् ।
स मुञ्चतु मम प्राणान्यदि पापं चराम्यहं ॥ २९ ॥
एते देवास्त्रयः कृत्स्नं त्रैलोक्यं धारयन्ति वै ।
विब्रुवन्तु यथासत्यमेतद्देवास्त्यजन्तु मां ॥ ३० ॥
एवमुक्तस्तया वायुरन्तरीक्षादभाषत ।
नैषा कृतवती पापं नल सत्यं ब्रवीमि ते ॥ ३१ ॥
राजञ्शीलनिधिः स्फीतो दमयन्त्याः सुरक्षितः ।
साक्षिणो रक्षिणश्चास्या वयं त्रीन्परिवत्सरान् ॥ ३२ ॥
उपायो विहितश्चायं त्वदर्थमतुलो ऽनया ।
न ह्येकाह्ना शतं गन्ता त्वामृते ऽन्यः पुमानिह ॥ ३३ ॥

उपपन्ना त्वया भैमी त्वं च भैम्या महीपते ।
नात्र शङ्का त्वया कार्या संगच्छ सह भार्यया ॥ ३४ ॥
तथा ब्रुवति वायौ तु पुष्पवृष्टिः पपात ह ।
देवदुन्दुभयो नेदुर्ववौ च पवनः शिवः ॥ ३५ ॥
तदद्भुततमं दृष्ट्वा नलो राजाथ भारत ।
दमयन्त्यां विशङ्कां तां व्यपाकर्षदरिंदम ॥ ३६ ॥
ततस्तद्वस्त्रमरजः प्रावृणोद्वसुधाधिपः ।
संस्मृत्य नागराजं तं ततो लेभे स्वकं वपुः ॥ ३७ ॥
स्वरूपिणं तु भर्तारं दृष्ट्वा भीमसुता तदा ।
प्राक्रोशदुच्चैरालिङ्ग्य पुण्यश्लोकमनिन्दिता ॥ ३८ ॥
भैमीमपि नलो राजा भ्राजमानो यथा पुरा ।
सस्वजे स्वसुतौ चापि यथावत्प्रत्यनन्दत ॥ ३९ ॥
ततः स्वोरसि विन्यस्य वक्त्रं तस्य शुभानना ।
परीता तेन दुःखेन निःशश्वासायतेक्षणा ॥ ४० ॥
तथैव मलदिग्धाङ्गीं परिष्वज्य शुचिस्मितां ।
सुचिरं पुरुषव्याघ्रस्तस्थौ शोकपरिप्लुतः ॥ ४१ ॥
ततः सर्वं यथावृत्तं दमयन्त्या नलस्य च ।
भीमायाकथयत्प्रीत्या वैदर्भीजननी नृप ॥ ४२ ॥
ततो ऽब्रवीन्महाराजः कृतशौचमहं नलं ।
दमयन्त्या सहोपेतं काल्यं द्रष्टा सुखोषितं ॥ ४३ ॥
ततस्तौ सहितौ रात्रिं कथयन्तौ पुरातनं ।
वने विचरितं सर्वमूषतुर्मुदितौ नृप ॥ ४४ ॥
गृहे भीमस्य नृपतेः परस्परसुखैषिणौ ।
वसेतां हृष्टसंकल्पौ वैदर्भी च नलश्च ह ॥ ४५ ॥

स चतुर्थे ततो वर्षे संगम्य सह भार्यया ।
सर्वकामैः सुसिद्धार्थो लब्धवान्परमां मुदं ॥ ४६ ॥
दमयन्त्यपि भर्तारमासाद्याप्यायिता भृशं ।
अर्धसंजातशस्येव तोयं प्राप्य वसुंधरा ॥ ४७ ॥

॥ इति नलोपाख्याने चतुर्विंशतितमोऽध्यायः ॥

---

बृहदश्व उवाच ।

अथ तां व्युषितो रात्रिं नलो राजा स्वलंकृतः ।
वैदर्भ्या सहितः काले ददर्श वसुधाधिपं ॥ १ ॥
तं भीमः प्रतिजग्राह पुत्रवत्परया मुदा ।
यथार्हं पूजयित्वा च समाश्वासयत प्रभुः ॥ २ ॥
तामर्हणां नलो राजा प्रतिगृह्य यथाविधि ।
परिचर्यां स्वकां तस्मै यथावत्प्रत्यवेदयत् ॥ ३ ॥
ततो बभूव नगरे सुमहान्हर्षजः स्वनः ।
जनस्य संप्रहृष्टस्य नलं दृष्ट्वा तथागतं ॥ ४ ॥
सिक्ताः सुमृष्टपुष्पाढ्या राजमार्गाः स्वलंकृताः ।
द्वारि द्वारि च पौराणां पुष्पभङ्गः प्रकल्पितः ॥ ५ ॥
ऋतुपर्णोऽपि शुश्राव वाहुकच्छद्मिनं नलं ।
दमयन्त्या समायुक्तं जहृषे च नराधिपः ॥ ६ ॥
तमानाय्य नलं राजा क्षमयामास पार्थिवं ।
दिष्ट्या समेतो दारैः स्वैर्भवानित्यभ्यनन्दत ॥ ७ ॥
कच्चित्तु नापराधं ते कृतवानस्मि नैषध ।
अज्ञातवासं वसतो मद्गृहे वसुंधाधिप ॥ ८ ॥

यदि वा बुद्धिपूर्वाणि यच्चबुद्ध्यापि कानिचित् ।
मया कृतान्यकार्याणि तानि त्वं क्षन्तुमर्हसि ॥ ९ ॥

नल उवाच ।

न मे ऽपराधं कृतवांस्त्वं स्वल्पमपि पार्थिव ।
कृते ऽपि च न मे कोपः क्षन्तव्यं हि मया तव ॥ १० ॥
पूर्वं ह्यपि सखा मे ऽसि संबन्धी च जनाधिप ।
अत ऊर्ध्वं तु भूयस्त्वं प्रीतिमाहर्तुमर्हसि ॥ ११ ॥
सर्वकामैः सुविहितैः सुखमस्म्युषितस्त्वयि ।
न तथा स्वगृहे राजन्यथा तव गृहे सदा ॥ १२ ॥
इदं चैव हयज्ञानं त्वदीयं मयि तिष्ठति ।
तदुपाकर्तुमिच्छामि मन्यसे यदि पार्थिव ॥ १३ ॥

बृहदश्व उवाच ।

एवमुक्त्वा ददौ विद्यामृतुपर्णाय नैषधः ।
स च तां प्रतिजग्राह विधिदृष्टेन कर्मणा ॥ १४ ॥
गृहीत्वा चाश्वहृदयं राजन्भाङ्गासुरिर्नृपः ।
सूतमन्यमुपादाय ययौ स्वपुरमेव ह ॥ १५ ॥
ऋतुपर्णे गते राजन्नलो राजा विशांपते ।
नगरे कुण्डिने कालं नातिदीर्घमिवासत् ॥ १६ ॥
॥ इति नलोपाख्याने पञ्चविंशतितमो ऽध्यायः ॥

---

बृहदश्व उवाच ।

स मासमुष्य कौन्तेय भीममामन्त्र्य नैषधः ।
पुरादल्पपरीवारो जगाम निषधान्प्रति ॥ १ ॥

रथेनैकेन शुभ्रेण दन्तिभिः परिषोडशैः ।
पञ्चाशद्भिर्हयैश्चैव षट्शतैश्च पदातिभिः ॥ २ ॥
स कम्पयन्निव महीं त्वरमाणो महीपतिः ।
प्रविवेश सुसंरब्धस्तरसैव महामनाः ॥ ३ ॥
ततः पुष्करमासाद्य वीरसेनसुतो नलः ।
उवाच दीव्याव पुनर्बहु वित्तं मयार्जितं ॥ ४ ॥
दमयन्ती च यच्चान्यन्मम किंचन विद्यते ।
एष वै मम संन्यासस्तव राज्यं तु पुष्कर ॥ ५ ॥
पुनः प्रवर्ततां द्यूतमिति मे निश्चिता मतिः ।
पणेनैकेन भद्रं ते प्राणयोश्च पणावहे ॥ ६ ॥
जित्वा परस्वमाहृत्य राज्यं वा यदि वा वसु ।
प्रतिपाणः प्रदातव्यः परमो धर्म उच्यते ॥ ७ ॥
न चेद्वाञ्छसि द्यूतं त्वं युद्धद्यूतं प्रवर्ततां ।
द्वैरथेनास्तु वै शान्तिस्तव वा मम वा नृप ॥ ८ ॥
वंशभोज्यमिदं राज्यमर्थितव्यं यथा तथा ।
येन केनाप्युपायेन वृद्धानामिति शासनं ॥ ९ ॥
द्वयोरेकतरे बुद्धिः क्रियतामद्य पुष्कर ।
कैतवेनाक्षवत्यां वा युद्धे वा नाम्यतां धनुः ॥ १० ॥
नैषधेनैवमुक्तस्तु पुष्करः प्रहसन्निव ।
ध्रुवमात्मजयं मत्वा प्रत्याह पृथिवीपतिं ॥ ११ ॥
दिष्ट्या त्वयार्जितं वित्तं प्रतिपाणाय नैषध ।
दिष्ट्या च दुष्करं कर्म दमयन्त्याः क्षयं गतं ॥ १२ ॥
धनेनानेन वै भैमी जितेन समलंकृता ।
मामुपस्थास्यति व्यक्तं दिवि शक्रमिवाप्सराः ॥ १३ ॥

नित्यशो हि स्मरामि त्वां प्रतीते ऽपि च नैषध ।
देवनेन मम प्रीतिर्न भवत्यसुहृद्गणैः ॥ १४ ॥
जित्वा त्वद्य वरारोहां दमयन्तीमनिन्दितां ।
कृतकृत्यो भविष्यामि सा हि मे नित्यशो हृदि ॥ १५ ॥
श्रुत्वा तु तस्य ता वाचो बहुबद्धप्रलापिनः ।
इयेष स शिरश्छेत्तुं खड्गेन कुपितो नलः ॥ १६ ॥
स्मयंस्तु रोषताम्राक्षस्तमुवाच ततो नलः ।
पणावः किं व्याहरसे जितो न व्याहरिष्यसि ॥ १७ ॥
ततः प्रावर्तत द्यूतं पुष्करस्य नलस्य च ।
एकपाणेन वीरेण नलेन स पराजितः ॥ १८ ॥
जित्वा तु पुष्करं राजा प्रहसन्निदमब्रवीत् ।
मम सर्वमिदं राज्यमव्यग्रं हतकण्टकं ॥ १९ ॥
वैदर्भी न त्वया शक्या राजापसद वीक्षितुं ।
तस्यास्त्वं सपरीवारो मूढ दासत्वमागतः ॥ २० ॥
न त्वया तत्कृतं कर्म येनाहं विजितः पुरा ।
कलिना तत्कृतं कर्म त्वं च मूढ न बुध्यसे ॥ २१ ॥
नाहं परकृतं दोषं त्वय्याधास्ये कथंचन ।
यथासुखं वै जीव त्वं प्राणानवसृजामि ते ॥ २२ ॥
तथैव सर्वं संभारं स्वमंशं वितरामि ते ।
तथैव च मम प्रीतिस्त्वयि वीर न संशयः ॥ २३ ॥
सौहार्दं चापि मे त्वत्तो न कदाचित्प्रहास्यति ।
पुष्कर त्वं हि मे भ्राता संजीव शरदः शतं ॥ २४ ॥
एवं नलः शान्त्वयित्वा भ्रातरं सत्यविक्रमः ।
स्वपुरं प्रेषयामास परिष्वज्य पुनः पुनः ॥ २५ ॥

शासितो नैषधेनैवं पुष्करः प्रत्युवाच ह ।
पुण्यश्लोकं तदा राजन्नभिवाद्य कृताञ्जलिः ॥ २६ ॥
कीर्तिरस्तु तवाक्षय्या जीव वर्षायुतं सुखी ।
यो मे वितरसि प्राणानधिष्ठानं च पार्थिव ॥ २७ ॥
स तथा सत्कृतो राज्ञा मासमुष्य ततो नृपः ।
प्रययौ स्वपुरं हृष्टः पुष्करः स्वजनान्वितः ॥ २८ ॥
प्रस्थाप्य पुष्करं राजा वित्तवन्तमनामयं ।
प्रविवेश पुरं श्रीमानत्यर्थमुपशोभितं ॥ २९ ॥
पौरजानपदाश्चापि संप्रहृष्टतनूरुहाः ।
ऊचुः प्राञ्जलयः सर्वे सामात्यप्रमुखा जनाः ॥ ३० ॥
अद्य स्म निर्वृता राजन्पुरे जनपदे ऽपि च ।
उपासितुं पुनः प्राप्ता देवा इव शतक्रतुं ॥ ३१ ॥
प्रशान्ते तु पुरे हृष्टे संप्रवृत्ते महोत्सवे ।
महत्या सेनया राजा दमयन्तीमुपानयत् ॥ ३२ ॥
दमयन्तीमपि पिता सत्कृत्य परवीरहा ।
प्रास्थापयदमेयात्मा भीमो भीमपराक्रमः ॥ ३३ ॥
आगतायां तु वैदर्भ्यां सपुत्रायां नलो नृपः ।
वर्तयामास मुदितो देवराडिव नन्दने ॥ ३४ ॥
ततः प्रकाशतां यातो जम्बुद्वीपे स राजसु ।
पुनः शशास तद्राज्यं प्रत्याहृत्य महायशाः ॥ ३५ ॥

॥ इति नलोपाख्याने षड्विंशतितमो ऽध्यायः ॥

॥ इति नलोपाख्यानं समाप्तं ॥

# VIÇVĀMITRA'S KAMPF UM DIE BRAHMANENWÜRDE.

---

AUS DEM RĀMĀJAṆA.

प्रजापतिसुतस्त्वासीत्कुशो नाम महीपतिः ।
कुशस्य पुत्रो बलवान्कुशनाभः सुधार्मिकः ॥ १ ॥
कुशनाभसुतस्त्वासीद्गाधिरित्येव विश्रुतः ।
गाधेः पुत्रो महातेजा विश्वामित्रो महामुनिः ॥ २ ॥
विश्वामित्रो महातेजाः पालयामास मेदिनीं ।
बहुवर्षसहस्राणि राजा राज्यमकारयत् ॥ ३ ॥
कदाचित्तु महातेजा योजयित्वा वरूथिनीं ।
अक्षौहिणीपरिवृतः परिचक्राम मेदिनीं ॥ ४ ॥
नगराणि च राष्ट्राणि विचरन्नाजगाम ह ।
वशिष्ठस्याश्रमपदं नानापुष्पलताद्रुमं ॥ ५ ॥
नानामृगगणाकीर्णं सिद्धचारणसेवितं ।
देवदानवगन्धर्वैः किंनरैरुपशोभितं ॥ ६ ॥
तपश्चरणसंसिद्धैरग्निकल्पैर्महात्मभिः ।
सततं संकुलं श्रीमद्ब्रह्मकल्पैर्महाव्रतैः ॥ ७ ॥
अब्भक्षैर्वायुभक्षैश्च शीर्णपर्णाशनैस्तथा ।
फलमूलाशनैर्दान्तैर्जितक्रोधैर्जितेन्द्रियैः ॥ ८ ॥
ऋषिभिर्वालखिल्यैश्च जपहोमपरायणैः ।
अन्यैर्वैखानसैश्चैव समन्तादुपशोभितं ॥ ९ ॥

वशिष्ठस्याश्रमपदं ब्रह्मलोकमिवापरं ।
ददर्श जयतां श्रेष्ठो विश्वामित्रो महामनाः ॥ १० ॥

॥ इति विश्वामित्रोपाख्याने प्रथमः सर्गः ॥

---

तं दृष्ट्वा परमप्रीतो विश्वामित्रो महाबलः ।
प्रणतो प्रणयाद्वीरो वशिष्ठं जपतां वरं ॥ १ ॥
स्वागतं तव चेत्युक्तो वशिष्ठेन महात्मना ।
आसनं चास्य भगवान्वशिष्ठो व्यादिदेश ह ॥ २ ॥
उपविष्टाय च तदा विश्वामित्राय धीमते ।
यथान्यायं मुनिवरः फलमूलमुपाहरत् ॥ ३ ॥
प्रतिगृह्य तु तां पूजां वशिष्ठाद्राजसत्तमः ।
विश्वामित्रो महातेजाः कुशलं पर्यपृच्छत ॥ ४ ॥
तपोऽग्निहोत्रशिष्येषु वनस्पतिगणे तथा ।
सर्वत्र कुशलं प्राह वशिष्ठो राजसत्तमं ॥ ५ ॥
सुखोपविष्टं राजानं विश्वामित्रं महातपाः ।
पप्रच्छ जपतां श्रेष्ठो वशिष्ठो ब्रह्मणः सुतः ॥ ६ ॥
कच्चित्ते कुशलं राजन्कच्चिद्धर्मेण रञ्जयन् ।
प्रजाः पालयसे वीर राजवृत्तेन धार्मिकः ॥ ७ ॥
कच्चित्ते संभृता भृत्याः कच्चित्तिष्ठन्ति शासने ।
कच्चित्ते विजिताः सर्वे रिपवो रिपुसूदन ॥ ८ ॥
कच्चिद्बलेषु कोषेषु मित्रेषु च परंतप ।
कुशलं ते नरव्याघ्र पुत्रपौत्रे तथानघ ॥ ९ ॥
सर्वत्र कुशलं राजा तमतः प्रत्युदाहरत् ।
विश्वामित्रो महातेजा वशिष्ठं विनयान्वितः ॥ १० ॥

कृत्वोभौ सुचिरं कालं धर्मिष्ठौ ताः कथास्तदा ।
मुदा परमया युक्तौ प्रीयेतां तौ परस्परं ॥ ११ ॥
ततो वशिष्ठो भगवान्कथान्ते रघुनन्दन ।
विश्वामित्रमिदं वाक्यमुवाच प्रहसन्निव ॥ १२ ॥
आतिथ्यं कर्तुमिच्छामि बलस्यास्य महाबल ।
तव चैवाप्रमेयस्य यथार्हं संप्रतीच्छ मे ॥ १३ ॥
सत्क्रियां हि भवानेतां प्रतीच्छतु मयोद्यतां ।
राजंस्त्वमतिथिश्रेष्ठः पूजनीयः प्रयत्नतः ॥ १४ ॥
एवमुक्तो वशिष्ठेन विश्वामित्रो महामतिः ।
कृतमित्यब्रवीद्राजा पूजा वाक्येन मे त्वया ॥ १५ ॥
फलमूलेन भगवन्विद्यते यत्तवाश्रमे ।
पाद्येनाचमनीयेन भगवद्दर्शनेन च ॥ १६ ॥
सर्वथा च महाप्राज्ञ पूजार्हेण सुपूजितः ।
गमिष्यामि नमस्ते ऽस्तु मैत्रेणेक्षस्व चक्षुषा ॥ १७ ॥
एवं ब्रुवन्तं राजानं वशिष्ठः पुनरेव हि ।
न्यमन्त्रयत धर्मात्मा पुनः पुनरुदारधीः ॥ १८ ॥
बाढमित्येव गाधेयो वशिष्ठं प्रत्युवाच ह ।
यथा प्रियं भगवतस्तथास्तु मुनिपुंगव ॥ १९ ॥
एवमुक्तस्तथा तेन वशिष्ठो जपतां वरः ।
आजुहाव ततो धेनुं कल्माषीं धूतकल्मषां ॥ २० ॥
एह्येहि शबले क्षिप्रं शृणु चैव वचो मम ।
. . . . . . . . . . . . . . . . ॥ २१ ॥
सबलस्यास्य राजर्षेः कर्तुं व्यवसितो ऽस्म्यहं ।
भोजनेन महार्हेण सत्कारं तद्विधत्स्व मे ॥ २२ ॥

यस्य यस्य यथाकामं षड्रसेष्वभिपूजितं ।
तत्सर्वं कामधुग्दिव्ये अभिवर्ष कृते मम ॥ २३ ॥
रसेनान्नेन पेयेन लेह्यचोष्येण संयुतं ।
अन्नानां निचयं सर्वं सृजस्व शवले वर ॥ २४ ॥

॥ इति विश्वामित्रोपाख्याने द्वितीयः सर्गः ॥

---

एवमुक्ता वशिष्ठेन शवला शत्रुसूदन ।
विदधे कामधुक्कामान्यस्य यस्येप्सितान्यथा ॥ १ ॥
इक्षून्मधूनि लाजांश्च मैरेयांश्च वरासवान् ।
पानानि च महार्हाणि भक्ष्यांश्चोच्चावचानपि ॥ २ ॥
उष्णाढ्यस्यौदनस्यात्र राशयः पर्वतोपमाः ।
मिष्टान्यन्नानि सूपाश्च दधिकुल्यास्तथैव च ॥ ३ ॥
नानास्वादुरसानां च खाण्डवानां तथैव च ।
भाजनानि सुपूर्णानि गौडानि च सहस्रशः ॥ ४ ॥
सर्वमासीत्सुसंतुष्टं हृष्टपुष्टजनायुतं ।
विश्वामित्रबलं राम वशिष्ठेन सुतर्पितं ॥ ५ ॥
विश्वामित्रो हि राजर्षिर्हृष्टपुष्टस्तदाभवत् ।
सामात्यो मन्त्रिसहितः सभृत्यबलवाहनः ॥ ६ ॥
युक्तः परेण हर्षेण वशिष्ठमिदमब्रवीत् ।
पूजितोऽहं त्वया ब्रह्मन्पूजार्हेण सुसत्कृतः ॥ ७ ॥
श्रूयतामभिधास्यामि वाक्यं वाक्यविशारद ।
गवां शतसहस्रेण दीयतां शवला मम ॥ ८ ॥
रत्नं हि भगवन्नेतद्रत्नभागी च पार्थिवः ।
तस्मान्मे शवलां देहि ममैषा धर्मतो द्विज ॥ ९ ॥

एवमुक्तस्तु भगवान्वशिष्ठो मुनिपुंगवः ।
विश्वामित्रेण धर्मात्मा प्रत्युवाच महीपतिं ॥ १० ॥
नाहं शतसहस्रेण नापि कोटिशतैर्गवां ।
राजन्दास्यामि शबलां राशिभी रजतस्य वा ॥ ११ ॥
न परित्यागमर्हेयं मत्सकाशादरिंदम ।
शाश्वती शबला मह्यं कीर्तिरात्मवतो यथा ॥ १२ ॥
अस्यां हव्यं च कव्यं च प्राणयात्रा तथैव च ।
आयत्तमग्निहोत्रं च बलिर्होमस्तथैव च ॥ १३ ॥
स्वाहाकारवषट्कारौ विद्याश्च विविधास्तथा ।
आयत्तमत्र राजर्षे सर्वमेतन्न संशयः ॥ १४ ॥
सर्वस्वमेतत्सत्येन मम तुष्टिकरी तथा ।
कारणैर्बहुभी राजन्न दास्ये शबलां तव ॥ १५ ॥
वशिष्ठेनैवमुक्तस्तु विश्वामित्रो ऽब्रवीत्तदा ।
संरब्धतरमत्यर्थं वाक्यं वाक्यविशारदः ॥ १६ ॥
हिरण्यकक्षाग्रैवेयान्सुवर्णाङ्कुशभूषितान् ।
ददामि कुञ्जराणां ते सहस्राणि चतुर्दश ॥ १७ ॥
हैरण्यानां रथानां च श्वेताश्वानां चतुर्युजां ।
ददामि ते शतान्यष्टौ किङ्किणीकविभूषितान् ॥ १८ ॥
हयानां देशजातानां कुलजानां महौजसां ।
सहस्रमेकं दश च ददामि तव सुव्रत ॥ १९ ॥
नानावर्णविभक्तानां वयःस्थानां तथैव च ।
ददाम्येकां गवां कोटिं शबला दीयतां मम ॥ २० ॥
यावदिच्छसि रत्नानि हिरण्यं वा द्विजोत्तम ।
तावद्ददामि ते सर्वं दीयतां शबला मम ॥ २१ ॥

एवमुक्तस्तु भगवान्विश्वामित्रेण धीमता ।
न दास्यामीति शबलां प्राह राजन्कथंचन ॥ २२ ॥
एतदेव हि मे रत्नमेतदेव हि मे धनं ।
एतदेव हि सर्वस्वमेतदेव हि जीवितं ॥ २३ ॥
दर्शश्च पौर्णमासश्च यज्ञाश्चैवाप्तदक्षिणाः ।
एतदेव हि मे राजन्विविधाश्च क्रियास्तथा ॥ २४ ॥
अदोमूलाः क्रियाः सर्वा मम राजन्न संशयः ।
बहुना किं प्रलापेन न दास्ये कामदोहिनीं ॥ २५ ॥

॥ इति विश्वामित्रोपाख्याने तृतीयः सर्गः ॥

---

कामधेनुं वशिष्ठो ऽसौ यदा न त्यजते मुनिः ।
तदास्य शबलां राजा विश्वामित्रो ऽन्वकर्षत ॥ १ ॥
नीयमाना तु शबला राम राज्ञा महात्मना ।
दुःखिता चिन्तयामास रुदती शोककर्षिता ॥ २ ॥
परित्यक्ता वशिष्ठेन किमहं सुमहात्मना ।
याहं राजभटैर्दीना ह्रियेय भृशदुःखिता ॥ ३ ॥
किं मयापकृतं तस्य महर्षेर्भावितात्मनः ।
यन्मामनागसं दृष्ट्वा भक्तां त्यजति धार्मिकः ॥ ४ ॥
इति सा चिन्तयित्वा तु निःश्वस्य च पुनः पुनः ।
जगाम वेगेन तदा वशिष्ठं परमौजसा ॥ ५ ॥
विधूय तांस्तदा भृत्याञ्शतशः शत्रुसूदन ।
जगामानिलवेगेन पादमूलं महात्मनः ॥ ६ ॥
शबला सा रुदन्ती च क्रोशन्ती चेदमब्रवीत् ।
वशिष्ठस्याग्रतः स्थित्वा मेघदुन्दुभिराविणी ॥ ७ ॥

भगवन्किं परित्यक्ता त्वयाहं ब्रह्मणः सुत ।
यस्माद्राजभटा मां हि नयन्ति त्वत्सकाशतः ॥ ८ ॥
एवमुक्तस्तु ब्रह्मर्षिरिदं वचनमब्रवीत् ।
शोकसंतप्तहृदयां स्वसारमिव दुःखितां ॥ ९ ॥
न त्वां त्यजामि शबले नापि मे ऽपकृतं त्वया ।
एष त्वां नयते राजा बलोन्मत्तो महाबलः ॥ १० ॥
न हि तुल्यं बलं मन्ये मम राज्ञा विशेषतः ।
बली राजा क्षत्रियश्च पृथिव्याः पतिरेव च ॥ ११ ॥
इयमक्षौहिणी पूर्णा गजवाजिरथाकुला ।
पत्तिध्वजसमाकीर्णा तेनासौ बलवत्तरः ॥ १२ ॥
एवमुक्ता वशिष्ठेन प्रत्युवाच विनीतवत् ।
वचनं वचनज्ञा सा ब्रह्मर्षिमतुलप्रभं ॥ १३ ॥
न बलं क्षत्रियस्याहुर्ब्राह्मणा बलवत्तराः ।
ब्रह्मन्ब्रह्मबलं दिव्यं क्षात्राच्च बलवत्तरं ॥ १४ ॥
अप्रमेयं बलं तुभ्यं न त्वया बलवत्तरः ।
विश्वामित्रो महावीर्यस्तेजस्तव दुरासदं ॥ १५ ॥
नियुङ्क्ष्व मां महातेजस्त्वद्ब्रह्मबलसंभृतां ।
तस्य दर्पं बलं यत्तन्नाशयामि दुरात्मनः ॥ १६ ॥
इत्युक्तस्तु तया राम वशिष्ठः स महायशाः ।
सृजस्वेति तदोवाच बलं परबलार्दनं ॥ १७ ॥
तस्या हुम्भारवोत्सृष्टाः पह्लवाः शतशो नृप ।
नाशयन्ति बलं सर्वं विश्वामित्रस्य पश्यतः ॥ १८ ॥
स राजा परमक्रुद्धः क्रोधविस्फारितेक्षणः ।
पह्लवान्नाशयामास शस्त्रैरुच्चावचैरपि ॥ १९ ॥

विश्वामित्रार्दितान्दृष्ट्वा पह्लवाञ्शतशस्तदा ।
भूय एवासृजद्घोराञ्शकान्यवनमिश्रितान् ॥ २० ॥
तैरासीत्संवृता भूमिः शकैर्यवनमिश्रितैः ।
प्रभावद्भिर्महावीर्यैर्हेमकिंजल्कसंनिभैः ॥ २१ ॥
तीक्ष्णासिपट्टिशधरैर्हेमवर्णाम्बरावृतैः ।
निर्दग्धं तद्बलं सर्वं प्रदीप्तैरिव पावकैः ॥ २२ ॥
दह्यमानं बलं दृष्ट्वा संभ्रान्तश्चलितेन्द्रियः ।
ततो ऽस्त्राणि महातेजा विश्वामित्रो मुमोच ह ॥ २३ ॥

॥ इति विश्वामित्रोपाख्याने चतुर्थः सर्गः ॥

---

ततस्तानाकुलान्दृष्ट्वा विश्वामित्रास्त्रमोहितान् ।
वशिष्ठश्चोदयामास कामधुक्सृज योगतः ॥ १ ॥
तस्या हुम्भारवाज्जाताः काम्बोजा रविसंनिभाः ।
ऊधसश्चाथ संभूता बर्बराः शस्त्रपाणयः ॥ २ ॥
योनिदेशाच्च यवनाः शकृद्देशाच्छकाः स्मृताः ।
रोमकूपेषु म्लेच्छाश्च हारिताः सकिरातकाः ॥ ३ ॥
तैस्तन्निसूदितं सर्वं विश्वामित्रस्य तत्क्षणात् ।
सपदातिगजं साश्वं सरथं रघुनन्दन ॥ ४ ॥
दृष्ट्वा निसूदितं सैन्यं वशिष्ठेन महात्मना ।
विश्वामित्रसुतानां तु शतं नानाविधायुधं ॥ ५ ॥
अभ्यधावत्सुसंक्रुद्धं वशिष्ठं जपतां वरं ।
हुंकारेणैव तान्सर्वान्निर्ददाह महानृषिः ॥ ६ ॥
ते साश्वरथपादाता वशिष्ठेन महात्मना ।
भस्मीकृता मुहूर्तेन विश्वामित्रसुतास्तथा ॥ ७ ॥

दृष्ट्वा विनाशितान्सर्वान्बलं च सुमहायशाः ।
सव्रीडं चिन्तयाविष्टो विश्वामित्रो ऽभवत्तदा ॥ ८ ॥
समुद्र इव निर्वेगो भग्नदंष्ट्र इवोरगः ।
उपरक्त इवादित्यः सद्यः निष्प्रभतां गतः ॥ ९ ॥
हतपुत्रबलो दीनो लूनपक्ष इव द्विजः ।
गतसर्वबलोत्साहो निर्वेदं समपद्यत ॥ १० ॥
स पुत्रमेकं राज्याय पालयेति नियुज्य च ।
पृथिवीं क्षत्रधर्मेण वनमेवाभ्यपद्यत ॥ ११ ॥
स गत्वा हिमवत्पार्श्वे किंनरोरगसेविते ।
महादेवप्रसादार्थं तपस्तेपे महातपाः ॥ १२ ॥
केनचित्त्वथ कालेन देवेशो वृषभध्वजः ।
दर्शयामास वरदो विश्वामित्रं महाबलं ॥ १३ ॥
किमर्थं तप्यसे राजन्ब्रूहि यत्ते विवक्षितं ।
वरदो ऽस्मि वरो यस्ते काङ्क्षितः सो ऽभिधीयतां ॥ १४ ॥
एवमुक्तस्तु देवेन विश्वामित्रो महातपाः ।
प्रणिपत्य महादेवमिदं वचनमब्रवीत् ॥ १५ ॥
यदि तुष्टो महादेव धनुर्वेदो ममानघ ।
साङ्गोपाङ्गोपनिषदः सरहस्यः प्रदीयतां ॥ १६ ॥
यानि देवेषु चास्त्राणि दानवेषु महर्षिषु ।
गन्धर्वयक्षरक्षस्सु प्रतिभान्तु ममानघ ॥ १७ ॥
तव प्रसादाद्भवतु देवदेव ममेप्सितं ।
एवमस्त्विति देवेशो वाक्यमुक्त्वा दिवं ययौ ॥ १८ ॥
प्राप्य चास्त्राणि देवेशाद्विश्वामित्रो महाबलः ।
दर्पेण महता युक्तो दर्पपूर्णो ऽभवत्तदा ॥ १९ ॥

विवर्धमानो वीर्येण समुद्र इव पर्वणि ।
हतमेव तदा मेने वशिष्ठमृषिसत्तमं ॥ २० ॥
ततो गत्वाश्रमपदं मुमोचास्त्राणि पार्थिवः ।
यैस्तत्तपोवनं नाम निर्दग्धं चास्त्रतेजसा ॥ २१ ॥
उदीर्यमाणमस्त्रं तद्विश्वामित्रस्य धीमतः ।
दृष्ट्वा विप्रद्रुता भीता मुनयः शतशो दिशः ॥ २२ ॥
वशिष्ठस्य च ये शिष्या ये च वै मृगपक्षिणः ।
विद्रवन्ति भयाद्भीता नानादिग्भ्यः सहस्रशः ॥ २३ ॥
वशिष्ठस्याश्रमपदं शून्यमासीन्महात्मनः ।
मुहूर्तमिव निःशब्दमासीदीरिणसंनिभं ॥ २४ ॥
वदतो वै वशिष्ठस्य मा भैरिति मुहुर्मुहुः ।
नाशयाम्यद्य गाधेयं नीहारमिव भास्करः ॥ २५ ॥
एवमुक्त्वा महातेजा वशिष्ठो जपतां वरः ।
विश्वामित्रं तदा वाक्यं सरोषमिदमब्रवीत् ॥ २६ ॥
आश्रमं चिरसंवृद्धं यद्विनाशितवानसि ।
दुराचारो हि यन्मूढस्तस्मात्त्वं न भविष्यसि ॥ २७ ॥

॥ इति विश्वामित्रोपाख्याने पञ्चमः सर्गः ॥

---

एवमुक्तो वशिष्ठेन विश्वामित्रो महाबलः ।
आग्नेयमस्त्रमुद्दिश्य तिष्ठ तिष्ठेति चाब्रवीत् ॥ १ ॥
ब्रह्मदण्डं समुद्यम्य कालदण्डमिवापरं ।
वशिष्ठो भगवान्क्रोधादिदं वचनमब्रवीत् ॥ २ ॥
क्षत्रबन्धो स्थितो ऽस्मि एष यद्बलं तद्धि दर्शय ।
नाशयाम्यद्य ते दर्पं शस्त्रस्य तव गाधिज ॥ ३ ॥

क च ते क्षत्रियबलं क च ब्रह्मबलं महत् ।
पश्य ब्रह्मबलं दिव्यं मम क्षत्रियपांसन ॥ ४ ॥
तस्यास्त्रं गाधिपुत्रस्य घोरमाग्नेयमुद्यतं ।
ब्रह्मदण्डेन तच्छान्तमग्नेर्वेग इवाम्भसा ॥ ५ ॥
वारुणं चैव रौद्रं च ऐन्द्रं पाशुपतं तथा ।
ऐषिकं चापि चिक्षेप कुपितो गाधिनन्दनः ॥ ६ ॥
मानवं मोहनं चैव गान्धर्वं स्वापनं तथा ।
जृम्भणं मादनं चैव संतापनविलापने ॥ ७ ॥
शोषणं दारुणं चैव वज्रमस्त्रं सुदुर्जयं ।
ब्रह्मपाशं कालपाशं वारुणं पाशमेव च ॥ ८ ॥
पैनाकमस्त्रं दयितं शुष्कार्द्रे अशनी तथा ।
दण्डास्त्रमथ पैशाचं क्रौञ्चमस्त्रं तथैव च ॥ ९ ॥
धर्मचक्रं कालचक्रं विष्णुचक्रं तथैव च ।
वायव्यं मथनं चैव अस्त्रं हयशिरस्तथा ॥ १० ॥
शक्तिद्वयं च चिक्षेप कङ्कालमुषलं तथा ।
वैद्याधरं महास्त्रं च कालास्त्रमथ दारुणं ॥ ११ ॥
त्रिशूलमस्त्रं घोरं च कापालमथ कङ्कणं ।
. . . . . . . . . . . . . . . . . ॥ १२ ॥
एतान्यस्त्राणि चिक्षेप सर्वाणि रघुनन्दन ।
वशिष्ठे जपतां श्रेष्ठे तदद्भुतमिवाभवत् ॥ १३ ॥
तानि सर्वाणि दण्डेन ग्रसते ब्रह्मणः सुतः ।
तेषु शान्तेषु ब्रह्मास्त्रं क्षिप्तवान्गाधिनन्दनः ॥ १४ ॥
तदस्त्रमुद्यतं दृष्ट्वा देवाः साग्निपुरोगमाः ।
देवर्षयश्च संभ्रान्ता गन्धर्वाः समहोरगाः ॥ १५ ॥

तदप्यस्त्रं महाघोरं ब्राह्मं ब्राह्मेण तेजसा ।
वशिष्ठो ग्रसते सर्वं ब्रह्मदण्डेन राघव ॥ १६ ॥
ब्राह्मास्त्रं ग्रसमानस्य वशिष्ठस्य महात्मनः ।
त्रैलोक्यमोहनं रौद्रं रूपमासीत्सुदारुणं ॥ १७ ॥
रोमकूपेषु सर्वेषु वशिष्ठस्य महात्मनः ।
मरीच्य इव निष्पेतुरग्नेर्धूमाकुलार्चिषः ॥ १८ ॥
प्राज्वलद्ब्रह्मदण्डश्च वशिष्ठस्य करोद्यतः ।
सधूम इव कालाग्निर्यमदण्ड इवापरः ॥ १९ ॥
ततो ऽस्तुवन्मुनिगणा वशिष्ठं जपतां वरं ।
अमोघं ते बलं ब्रह्मंस्तेजो धारय तेजसा ॥ २० ॥
निगृहीतस्त्वया ब्रह्मन्विश्वामित्रो महाबलः ।
प्रसीद जपतां श्रेष्ठ लोकाः सन्तु गतव्यथाः ॥ २१ ॥
एवमुक्तो महातेजाः शमं चक्रे महातपाः ।
विश्वामित्रो ऽपि निकृतो विनिःश्वस्येदमब्रवीत् ॥ २२ ॥
धिग्बलं क्षत्त्रियबलं ब्रह्मतेजोबलं बलं ।
एकेन ब्रह्मदण्डेन सर्वास्त्राणि हतानि मे ॥ २३ ॥
तदेतत्प्रसमीक्ष्याहं प्रसन्नेन्द्रियमानसः ।
तपो महत्समास्थास्ये यद्वै ब्रह्मत्वकारणं ॥ २४ ॥
॥ इति विश्वामित्रोपाख्याने षष्ठः सर्गः ॥

---

ततः संतप्तहृदयः स्मरन्निग्रहमात्मनः ।
विनिःश्वस्य विनिःश्वस्य कृतवैरो महात्मना ॥ १ ॥
स दक्षिणां दिशं गत्वा महिष्या सह राघव ।
फलमूलाशनो दान्तश्चचार परमं तपः ॥ २ ॥

अथास्य जज्ञिरे पुत्राः सत्यधर्मपरायणाः ।
हविष्यन्दो मधुष्यन्दो दृढनेत्रो महारथः ॥ ३ ॥
पूर्णे वर्षसहस्रे तु ब्रह्मा लोकपितामहः ।
अब्रवीन्मधुरं वाक्यं विश्वामित्रं तपोधनं ॥ ४ ॥
जिता राजर्षिलोकास्ते तपसा कुशिकात्मज ।
अनेन तपसा त्वं हि राजर्षिरिति विद्महे ॥ ५ ॥
एवमुक्त्वा महातेजा जगाम सह दैवतैः ।
त्रिपिष्टपं ब्रह्मलोकं लोकानां परमेश्वरः ॥ ६ ॥
विश्वामित्रो ऽपि तच्छ्रुत्वा ह्रिया किंचिदवाङ्मुखः ।
दुःखेन महताविष्टः समन्युरिदमब्रवीत् ॥ ७ ॥
तपश्च सुमहत्तप्तं राजर्षिरिति मां विदुः ।
देवाः सर्षिगणाः सर्वे नास्ति मन्ये तपःफलं ॥ ८ ॥
एवं निश्चित्य मनसा भूय एव महातपाः ।
तपश्चचार काकुत्स्थ परमं परमात्मवान् ॥ ९ ॥
एतस्मिन्नेव काले तु सत्यवादी जितेन्द्रियः ।
त्रिशङ्कुरिति विख्यात इक्ष्वाकुकुलवर्धनः ॥ १० ॥
तस्य बुद्धिः समुत्पन्ना यजेयमिति राघव ।
गच्छेयं स्वशरीरेण देवतानां परां गतिं ॥ ११ ॥
वशिष्ठं च समाहूय कथयामास चिन्तितं ।
अशक्यमिति चाप्युक्तो वशिष्ठेन महात्मना ॥ १२ ॥
प्रत्याख्यातो वशिष्ठेन स ययौ दक्षिणां दिशं ।
ततस्तत्कर्मसिद्ध्यर्थं पुत्रांस्तस्य गतो नृपः ॥ १३ ॥
त्रिशङ्कुस्तु महातेजाः शतं परमभास्वरं ।
वशिष्ठपुत्रान्ददृशे तप्यमानान्मनस्विनः ॥ १४ ॥

सो ऽभिगम्य महात्मानः सर्वानेव गुरोः सुतान् ।
अभिवाद्यानुपूर्वेण ह्रिया किंचिदवाङ्मुखः ॥ १५ ॥
अब्रवीत्स महाभागान्सर्वानेव कृताञ्जलिः ।
शरणं वः प्रपन्नो ऽहं शरण्यः शरणप्रदान् ॥ १६ ॥
प्रत्याख्यातो हि भद्रं वो वशिष्ठेन महात्मना ।
यष्टुकामो महायज्ञं तदनुज्ञातुमर्हथ ॥ १७ ॥
गुरुपुत्रानहं सर्वान्नमस्कृत्य प्रसादये ।
शिरसा प्रणतो याचे ब्राह्मणांस्तपसि स्थितान् ॥ १८ ॥
ते मां भवन्तः सिद्ध्यर्थं याजयन्तु समाहिताः ।
सशरीरो यथाहं वै देवलोकमवाप्नुयां ॥ १९ ॥
प्रत्याख्यातो वशिष्ठेन गतिमन्यां तपोधनाः ।
गुरुपुत्रानृते सर्वान्नाहं पश्यामि कांचन ॥ २० ॥
इक्ष्वाकूणां हि सर्वेषां पुरोधाः परमा गतिः ।
तस्मादनन्तरं सर्वे भवन्तो दैवतं मम ॥ २१ ॥

॥ इति विश्वामित्रोपाख्याने सप्तमः सर्गः ॥

---

त्रिशङ्कोर्वचनं श्रुत्वा ततः क्रोधसमन्वितं ।
ऋषिपुत्रशतं राम राजानमिदमब्रवीत् ॥ १ ॥
प्रत्याख्यातो ऽसि दुर्बुद्धे गुरुणा सत्यवादिना ।
तं कथं समतिक्रम्य शाखान्तरमुपेयिवान् ॥ २ ॥
इक्ष्वाकूणां हि सर्वेषां पुरोधाः परमा गतिः ।
न चातिक्रमितुं शक्यं वचनं सत्यवादिनः ॥ ३ ॥
अशक्यमिति चोवाच वशिष्ठो भगवानृषिः ।
तं वयं वै समाहर्तुं क्रतुं शक्ताः कथं तव ॥ ४ ॥

वालिशस्त्वं नरश्रेष्ठ गम्यतां स्वपुरं पुनः ।
याजने भगवाञ्शक्तस्त्रैलोक्यस्यापि पार्थिव ॥ ५ ॥
तेषां तद्वचनं श्रुत्वा क्रोधपर्याकुलाक्षरं ।
स राजा पुनरेवैतानिदं वचनमब्रवीत् ॥ ६ ॥
प्रत्याख्यातो भगवता गुरुपुत्रैस्तथैव हि ।
अन्यां गतिं गमिष्यामि स्वस्ति वो ऽस्तु तपोधनाः ॥ ७ ॥
ऋषिपुत्रास्तु तच्छ्रुत्वा वाक्यं घोराभिसंहितं ।
शेपुः परमसंक्रुद्धाश्चण्डालत्वं गमिष्यसि ॥ ८ ॥
इत्युक्त्वा ते महात्मानो विविशुः स्वं स्वमाश्रमं ।
अथ रात्र्यां व्यतीतायां राजा चण्डालतां गतः ॥ ९ ॥
नीलवस्त्रधरो नीलः परुषो ध्वस्तमूर्धजः ।
चित्यमाल्याङ्गरागश्च आयसाभरणो ऽभवत् ॥ १० ॥
तं दृष्ट्वा मन्त्रिणः सर्वे त्यक्त्वा चण्डालरूपिणं ।
प्राद्रवन्सहिता राम पौरा ये चानुयायिनः ॥ ११ ॥
एको हि राजा काकुत्स्थ जगाम परमात्मवान् ।
दह्यमानो दिवारात्रं विश्वामित्रं तपोधनं ॥ १२ ॥
विश्वामित्रस्तु तं दृष्ट्वा राजानं विफलीकृतं ।
चण्डालरूपिणं राम मुनिः कारुण्यमागतः ॥ १३ ॥
कारुण्यात्स महातेजा वाक्यं परमधार्मिकः ।
इदं जगाद भद्रं ते राजानं घोरदर्शनं ॥ १४ ॥
किमागमनकार्यं ते राजपुत्र महाबल ।
अयोध्याधिपते वीर शापाच्चण्डालतां गतः ॥ १५ ॥
अथ तद्वाक्यमाकर्ण्य राजा चण्डालदर्शनः ।
अब्रवीत्प्राञ्जलिर्वाक्यं वाक्यज्ञो वाक्यकोविदं ॥ १६ ॥

प्रत्याख्यातो ऽस्मि गुरुणा गुरुपुत्रैस्तथैव च ।
अनवाप्यैव तं कामं मया प्राप्तो विपर्ययः ॥ १७ ॥
सशरीरो दिवं यायामिति मे सौम्य दर्शनं ।
मया चेष्टं क्रतुशतं तच्च नावाप्यते फलं ॥ १८ ॥
अनृतं नोक्तपूर्वं मे न च वक्ष्ये कदाचन ।
कृच्छ्रेष्वपि गतः सौम्य तत्त्वधर्मेण ते शपे ॥ १९ ॥
यज्ञैर्बहुविधैरिष्टं प्रजा धर्मेण पालिताः ।
गुरवश्च महात्मानः शीलवृत्तेन तोषिताः ॥ २० ॥
धर्मे प्रयतमानस्य यज्ञं चाहर्तुमिच्छतः ।
परितोषं न गच्छन्ति गुरवो मुनिपुंगव ॥ २१ ॥
दैवमेव परं मन्ये पौरुषं तु निरर्थकं ।
दैवेनाक्रम्यते सर्वं दैवं हि परमा गतिः ॥ २२ ॥
तस्य मे परमार्तस्य प्रसादमभिकाङ्क्षतः ।
कर्तुमर्हसि भद्रं ते दैवोपहतकर्मणः ॥ २३ ॥
नान्यां गतिं प्रपश्यामि नान्यच्छरणमस्ति मे ।
दैवं पुरुषकारेण निवर्तयितुमर्हसि ॥ २४ ॥

॥ इति विश्वामित्रोपाख्याने ऽष्टमः सर्गः ॥

---

उक्तवाक्यं तु राजानं कृपया कुशिकात्मजः ।
अब्रवीन्मधुरं वाक्यं साक्षाच्चण्डालतां गतं ॥ १ ॥
इक्ष्वाको स्वागतं वत्स जानामि त्वां सुधार्मिकं ।
शरणं ते प्रदास्यामि मा भैषीर्नृपपुंगव ॥ २ ॥
अहमामन्त्रये सर्वान्महर्षीन्पुण्यकर्मणः ।
यज्ञसाह्यकरांस्तात ततो यक्ष्यसि निर्वृतः ॥ ३ ॥

गुरुशापकृतं रूपं यदिदं त्वयि वर्तते ।
अनेन सह रूपेण सशरीरो गमिष्यसि ॥ ४ ॥
हस्तप्राप्तमहं मन्ये स्वर्गं तव नराधिप ।
यस्त्वं कौशिकमागम्य शरण्यः शरणं गतः ॥ ५ ॥
एवमुक्त्वा महातेजाः पुत्रान्परमधार्मिकान् ।
व्यादिदेश महाप्राज्ञान्यज्ञसंभारकारणात् ॥ ६ ॥
सर्वाञ्शिष्यान्समाहूय वाक्यमेतदुवाच ह ।
सर्वानृषीन्सवासिष्ठानानयध्वं ममाज्ञया ॥ ७ ॥
यश्च यद्वचनं ब्रूयाद्मद्वाक्यबलचोदितः ।
तत्सर्वमखिलेनोक्तं ममाख्येयमनादृतं ॥ ८ ॥
तस्य तद्वचनं श्रुत्वा दिशो जग्मुस्तदाज्ञया ।
आजग्मुरथ देशेभ्यः सर्वेभ्यो ब्रह्मवादिनः ॥ ९ ॥
ते च शिष्याः समागम्य मुनिं ज्वलिततेजसं ।
अब्रुवन्वचनं सर्वं सर्वेषां ब्रह्मवादिनां ॥ १० ॥
श्रुत्वा ते वचनं सर्वे समायान्ति द्विजातयः ।
सर्वदेशेषु चागच्छन्वर्जयित्वा महोदयं ॥ ११ ॥
वासिष्ठं तच्छतं सर्वं क्रोधपर्याकुलाक्षरं ।
यदुवाच वचो घोरं शृणु त्वं मुनिपुंगव ॥ १२ ॥
क्षत्त्रियो याजको यस्य चण्डालस्य विशेषतः ।
कथं सदसि भोक्तारो हविस्तस्य सुरर्षयः ॥ १३ ॥
ब्राह्मणा वा महात्मानो भुक्त्वा चण्डालभोजनं ।
कथं स्वर्गं गमिष्यन्ति विश्वामित्रेण पालिताः ॥ १४ ॥
एतद्वचननैष्ठुर्यमूचुः संरक्तलोचनाः ।
वासिष्ठा मुनिशार्दूल सर्वे सहमहोदयाः ॥ १५ ॥

इति तेषां वचः श्रुत्वा शिष्याणां मुनिपुंगवः ।
क्रोधसंरक्तनयनः सरोषमिदमब्रवीत् ॥ १६ ॥
यद्दूषयन्त्यदुष्टं मां तप उग्रं समास्थितं ।
भस्मीभूता दुरात्मानो भविष्यन्ति न संशयः ॥ १७ ॥
अद्य ते कालपाशेन नीता वैवस्वतक्षयं ।
सप्त जातिशतान्येव मृतपाः संभवन्तु ते ॥ १८ ॥
श्वमांसनियताहारा मुष्टिका नाम निर्घृणाः ।
विकृताश्च विरूपाश्च लोकाननुचरन्त्विमान् ॥ १९ ॥
महोदयश्च दुर्बुद्धिर्मामदूष्यं ह्यदूषयत् ।
दूषितः सर्वलोकेषु निषादत्वं गमिष्यति ॥ २० ॥
प्राणातिपातनिरतो निरनुक्रोशतां गतः ।
दीर्घकालं मम क्रोधाद्दुर्गतिं वर्तयिष्यति ॥ २१ ॥
एतावदुक्त्वा वचनं विश्वामित्रो महामुनिः ।
विरराम महातेजास्तस्मिन्मुनिसमागमे ॥ २२ ॥
॥ इति विश्वामित्रोपाख्याने नवमः सर्गः ॥

---

तपोवलहतान्कृत्वा वाशिष्ठान्समहोदयान् ।
ऋषिमध्ये महातेजा विश्वामित्रो ऽभ्यभाषत ॥ १ ॥
अयमिक्ष्वाकुदायादस्त्रिशङ्कुरिति विश्रुतः ।
धर्मिष्ठश्च वदान्यश्च मां चैव शरणं गतः ॥ २ ॥
यथायं स्वशरीरेण देवलोकं गमिष्यति ।
तथा प्रवर्त्यतां यज्ञो भवद्भिश्च मया सह ॥ ३ ॥
विश्वामित्रवचः श्रुत्वा ततस्ते मुनिपुंगवाः ।
मिथः संमन्त्रयामासुर्विश्वामित्रभयार्दिताः ॥ ४ ॥

अयं कुशिकदायादो मुनिः परमकोपनः ।
यदाह वचनं सम्यगेतत्कार्यं न संशयः ॥ ५ ॥
अग्निकल्पो हि भगवाञ्शापं दास्यति रोषितः ।
तस्मात्प्रवर्त्यतां यज्ञो यथैवोक्तं महर्षिणा ॥ ६ ॥
क्रियतां च तथा यत्नः सशरीरो यथा दिवं ।
गच्छेदिक्ष्वाकुदायादो विश्वामित्रस्य तेजसा ॥ ७ ॥
ततः प्रववृते यज्ञः सर्वसंभारसंभृतः ।
याजकश्च महातेजा विश्वामित्रो ऽभवत्क्रतौ ॥ ८ ॥
ऋत्विजश्चानुपूर्वेण मन्त्रवन्मन्त्रकोविदाः ।
चक्रुः सर्वाणि कर्माणि यथाकल्पं यथाविधि ॥ ९ ॥
ततः कालेन महता विश्वामित्रो महातपाः ।
चकारावाहनं तत्र भागार्थं सर्वदेवताः ॥ १० ॥
नाभ्यगच्छन्यदा तत्र भागार्थं सर्वदेवताः ।
ततः कोपसमाविष्टो विश्वामित्रो महामुनिः ॥ ११ ॥
स्रुवमुद्यम्य सक्रोधस्त्रिशङ्कुमिदमब्रवीत् ।
पश्य मे तपसो वीर्यं स्वार्जितस्य नरेश्वर ॥ १२ ॥
एष त्वां स्वशरीरेण नयामि स्वर्गमोजसा ।
दुष्प्रापं स्वशरीरेण स्वर्गं गच्छ नरेश्वर ॥ १३ ॥
स्वार्जितं किंचिदप्यस्ति मया हि तपसः फलं ।
राजंस्त्वं तेजसा तस्य सशरीरो दिवं व्रज ॥ १४ ॥
उक्तवाक्ये मुनौ तस्मिन्सशरीरो नरेश्वरः ।
दिवं जगाम काकुत्स्थ मुनीनां पश्यतां तदा ॥ १५ ॥
स्वर्गलोकं गतं दृष्ट्वा त्रिशङ्कुं पाकशासनः ।
सह सर्वैः सुरगणैरिदं वचनमब्रवीत् ॥ १६ ॥

*

त्रिशङ्को गच्छ भूयस्त्वं नासि स्वर्गकृतालयः ।
गुरुशापहतो मूढ पत भूमिमवाक्शिराः ॥ १७ ॥
एवमुक्तो महेन्द्रेण त्रिशङ्कुरपतत्पुनः ।
विक्रोशमानस्त्राहीति विश्वामित्रं तपोधनं ॥ १८ ॥
तच्छ्रुत्वा वचनं तस्य क्रोशमानस्य कौशिकः ।
रोषमाहारयत्तीव्रं तिष्ठ तिष्ठेति चाब्रवीत् ॥ १९ ॥
ततो ब्रह्मतपोयोगात्प्रजापतिरिवापरः ।
ससर्ज दक्षिणे भागे सप्तर्षीनपरान्पुनः ॥ २० ॥
दक्षिणां दिशमास्थाय ऋषिमध्ये महायशाः ।
नक्षत्रमालामपरामसृजत्क्रोधमूर्छितः ॥ २१ ॥
अन्यमिन्द्रं करिष्यामि लोको वा स्यादनिन्द्रकः ।
दैवतान्यपि स क्रोधात्स्रष्टुं समुपचक्रमे ॥ २२ ॥
ततः परमसंभ्रान्ताः सर्षिसंघाः सुरासुराः ।
विश्वामित्रं महात्मानमूचुः सानुनयं वचः ॥ २३ ॥
अयं राजा महाभाग गुरुशापपरिक्षतः ।
सशरीरो दिवं यातुं नार्हत्यकृतपावनः ॥ २४ ॥
तेषां तद्वचनं श्रुत्वा देवानां मुनिपुंगवः ।
अब्रवीत्सुमहद्वाक्यं कौशिकः सर्वदेवताः ॥ २५ ॥
सशरीरस्य भद्रं वस्त्रिशङ्कोरस्य भूपतेः ।
आरोहणं प्रतिज्ञातं नानृतं कर्तुमुत्सहे ॥ २६ ॥
स्वर्गो ऽस्तु सशरीरस्य त्रिशङ्कोरस्य शाश्वतः ।
नक्षत्राणि च सर्वाणि मामकानि ध्रुवाण्यथ ॥ २७ ॥
यावल्लोका धरिष्यन्ति तिष्ठन्त्वेतानि सर्वशः ।
मत्कृतानि सुराः सर्वे तदनुज्ञातुमर्हथ ॥ २८ ॥

एवमुक्ताः सुराः सर्वे प्रत्यूचुर्मुनिपुंगवं ।
एवं भवतु भद्रं ते तिष्ठन्त्वेतानि सर्वशः ॥ २९ ॥
गगने तान्यनेकानि वैश्वानरपथाद्बहिः ।
नक्षत्राणि मुनिश्रेष्ठ तेषु ज्योतिष्षु जाज्वलन् ॥ ३० ॥
अवाक्शिरास्त्रिशङ्कुश्च तिष्ठत्वमरसंनिभः ।
अनुयास्यन्ति चैतानि ज्योतींषि नृपसत्तमं ॥ ३१ ॥
विश्वामित्रस्तु धर्मात्मा सर्वदेवैरभिष्टुतः ।
ऋषिमध्ये महातेजा बाढमित्याह देवताः ॥ ३२ ॥
ततो देवा महात्मान ऋषयश्च तपोधनाः ।
जग्मुर्यथागतं सर्वे यज्ञस्यान्ते नरोत्तम ॥ ३३ ॥
॥ इति विश्वामित्रोपाख्याने दशमः सर्गः ॥

---

विश्वामित्रो महातेजाः प्रस्थितान्वीक्ष्य तानृषीन् ।
अब्रवीन्नरशार्दूल सर्वांस्तान्वनवासिनः ॥ १ ॥
महान्विघ्नः प्रवृत्तो ऽयं दक्षिणामास्थितो दिशं ।
दिशमन्यां प्रपत्स्यामस्तत्र तप्स्यामहे तपः ॥ २ ॥
पश्चिमस्यां विशालायां पुष्करारण्यमाश्रिताः ।
सुखं तपश्चरिष्यामः परं तद्धि तपोवनं ॥ ३ ॥
एवमुक्त्वा महातेजाः पुष्करेषु महामुनिः ।
तप उग्रं दुराधर्षं तेपे मूलफलाशनः ॥ ४ ॥
एतस्मिन्नेव काले तु अयोध्याधिपतिर्महान् ।
अम्बरीष इति ख्यातो यष्टुं समुपचक्रमे ॥ ५ ॥
तस्य वै यजमानस्य पशुमिन्द्रो जहार ह ।
प्रनष्टे तु पशौ विप्रो राजानमिदमब्रवीत् ॥ ६ ॥

पशुरत्र हृतो राजन्प्रनष्टस्तव दुर्णयात् ।
अरक्षितारं राजानं घ्नन्ति दोषा नरेश्वर ॥ ७ ॥
प्रायश्चित्तं महद्ध्येतन्नरं वा पुरुषर्षभ ।
आनयस्व पशुं शीघ्रं यावत्कर्म प्रवर्तते ॥ ८ ॥
उपाध्यायवचः श्रुत्वा इक्ष्वाकुः सो ऽमितप्रभः ।
अन्वियेष महाबुद्धिः पशुं गोभिः सहस्रशः ॥ ९ ॥
देशाञ्जनपदांस्तांस्तान्नगराणि वनानि च ।
आश्रमाणि च पुण्यानि मार्गमाणो महीपतिः ॥ १० ॥
स पुत्रसहितं तात सभार्यं रघुनन्दन ।
भृगुतुङ्गे समासीनमृचीकं संददर्श ह ॥ ११ ॥
अम्बरीषो महातेजाः प्रणम्याभिप्रसाद्य च ।
ब्रह्मर्षिं तपसा दीप्तं राजर्षिरिदमब्रवीत् ॥ १२ ॥
गवां शतसहस्रेण विक्रीणीषे सुतं यदि ।
पशोरर्थे महाभाग कृतकृत्यो ऽस्मि भार्गव ॥ १३ ॥
सर्वे परिगता देशा यज्ञियं न लभे पशुं ।
दातुमर्हसि मूल्येन सुतमेकमितो मम ॥ १४ ॥
एवमुक्तो महातेजा ऋचीकस्त्वब्रवीद्वचः ।
नाहं ज्येष्ठं नरश्रेष्ठ विक्रीणीयां कथंचन ॥ १५ ॥
ऋचीकवचनं श्रुत्वा तेषां माता महात्मनां ।
उवाच नरशार्दूलमम्बरीषमिदं वचः ॥ १६ ॥
अविक्रेयं सुतं ज्येष्ठं भगवानाह भार्गवः ।
ममापि दयितं विद्धि कनिष्ठं शुनकं प्रभो ॥ १७ ॥
प्रायेण हि नरश्रेष्ठ ज्येष्ठाः पितृषु वल्लभाः ।
मातॄणां च कनीयांसस्तस्माद्रक्षे कनीयसं ॥ १८ ॥

उक्तवाक्ये मुनौ तस्मिन्मुनिपत्न्यां तथैव च ।
शुनःशेपः स्वयं राम मध्यमो वाक्यमब्रवीत् ॥ १९ ॥
पिता ज्येष्ठमविक्रेयं माता चाह कनीयसं ।
विक्रीतं मध्यमं मन्ये राजपुत्र नयस्व मां ॥ २० ॥
गवां शतसहस्रेण शुनःशेपं ततो नृपः ।
गृहीत्वा परमप्रीतो जगाम रघुनन्दन ॥ २१ ॥
रथमारोप्य तं राम शुनःशेपं त्वरान्वितः ।
आजगाम ततो यज्ञं समापयितुमात्मनः ॥ २२ ॥

॥ इति विश्वामित्रोपाख्यान एकादशः सर्गः ॥

---

शुनःशेपं तमादाय स राजा श्रान्तवाहनः ।
व्यश्राम्यत्पुष्करे तीर्थे मध्याह्ने रघुनन्दन ॥ १ ॥
तस्य विश्राम्यतस्तत्र शुनःशेपो महाद्युतिः ।
पुष्करं ज्येष्ठमागम्य विश्वामित्रं ददर्श ह ॥ २ ॥
तप्यन्तमृषिभिः सार्धं मातुलं परमातुरः ।
विषण्णवदनो दीनस्तृष्णया च श्रमेण च ॥ ३ ॥
पपाताङ्के मुने राम वाक्यं चेदमुवाच ह ।
न मेऽस्ति माता न पिता ज्ञातयो बान्धवाः कुतः ॥ ४ ॥
त्रातुमर्हसि मां सौम्य धर्मेण मुनिपुंगव ।
त्राता त्वं हि नरश्रेष्ठ सर्वेषां त्वं हि भावनः ॥ ५ ॥
राजा च कृतकार्यः स्यादहं दीर्घायुरव्ययः ।
स्वर्गलोकमुपाश्नीयां तपस्तप्त्वा ह्यनुत्तमं ॥ ६ ॥
स मे नाथो ह्यनाथस्य भव भव्येन चेतसा ।
पितेव पुत्रं धर्मात्मंस्त्रातुमर्हसि किल्बिषात् ॥ ७ ॥

तस्य तद्वचनं श्रुत्वा विश्वामित्रो महातपाः ।
शान्तयित्वा बहुविधं पुत्रानिदमुवाच ह ॥ ८ ॥
यत्कृते पितरः पुत्राञ्जनयन्ति शुभार्थिनः ।
परलोकहितार्थाय तस्य कालो ऽयमागतः ॥ ९ ॥
अयं मुनिसुतो बालो मत्तः शरणमिच्छति ।
अस्य जीवितमात्रेण प्रियं कुरुत पुत्रकाः ॥ १० ॥
सर्वे सुकृतकर्माणः सर्वे धर्मपरायणाः ।
पशुभूता नरेन्द्रस्य तृप्तिमग्नेः प्रयच्छत ॥ ११ ॥
नाथवांश्च शुनःशेपो यज्ञश्चाविघ्नितो भवेत् ।
प्राणा यथात्मनो ऽभीष्टा भूतानामपि ते तथा।
आत्मौपम्येन सर्वत्र दयां कुर्वन्ति साधवः ॥ ६ ॥

अपरं च।

प्रत्याख्याने च दाने च सुखदुःखे प्रियाप्रिये।
आत्मौपम्येन पुरुषः प्रमाणमधिगच्छति ॥ ७ ॥

अन्यच्च।

मातृवत्परदारेषु परद्रव्येषु लोष्ट्रवत्।
आत्मवत्सर्वभूतेषु यः पश्यति स पण्डितः ॥ ८ ॥

वं चातिदुर्गतः । तेन तत्तुभ्यं दातुं सयत्नो ऽहं । तथा चोक्तं ।

दरिद्रान्भर कौन्तेय मा प्रयच्छेश्वरे धनं ।
व्याधितस्यौषधं पथ्यं नीरुजस्तु किमौषधैः ॥ ९ ॥

अन्यच्च ।

दातव्यमिति यद्दानं दीयते ऽनुपकारिणे ।
देशे काले च पात्रे च तद्दानं सात्त्विकं स्मृतं ॥ १० ॥

तदत्र सरसि स्नात्वा सुवर्णकङ्कणं प्रतिगृह्हाण । ततो यावदसौ तद्वचःप्रतीतो लोभात्सरसि स्नातुं प्रविशति । तावन्महापङ्के निमग्नः पलायितुमक्षमः । पङ्के पतितं दृष्ट्वा व्याघ्रो ऽवदत् अहह महापङ्के पतितो ऽसि । अतस्त्वामुत्थापयामि । इत्युक्त्वा शनैः शनैरुपगम्य तेन व्याघ्रेण धृतः स पान्थो ऽचिन्तयत्

न धर्मशास्त्रं पठतीति कारणं न चापि वेदाध्ययनं दुरात्मनः ।
स्वभाव एवात्र तथातिरिच्यते यथा प्रकृत्या मधुरं गवां पयः ॥ ११ ॥

किं च ।

अवशेन्द्रियचित्तानां हस्तिस्नानमिव क्रिया ।
दुर्भगाभरणप्रायो ज्ञानं भारः क्रियां विना ॥ १२ ॥

तन्मया भद्रं तन्न कृतं । यदत्र मारात्मके विश्वासः कृतः । तथा ह्युक्तं ।

नदीनां शस्त्रपाणीनां नखिनां शृङ्गिणां तथा ।
विश्वासो नैव कर्तव्यः स्त्रीषु राजकुलेषु च ॥ १३ ॥

अपरं च ।

सर्वस्य हि परीक्ष्यन्ते स्वभावा नेतरे गुणाः ।
अतीत्य हि गुणान्सर्वान्स्वभावो मूर्ध्नि वर्तते ॥ १४ ॥

इति चिन्तयन्नेवासौ व्याघ्रेण व्यापादितः खादितश्च ।

---

## II. (I. 3.)

## DIE GAZELLE, DER SCHAKAL UND DIE KRÆHE.

अस्ति मगधदेशे चम्पकवती नामारण्यानी । तस्यां चिरान्महता स्नेहेन मृगकाकौ निवसतः । स च मृगः स्वेच्छया भ्राम्यन्पुष्टाङ्गः शृगालेनालोकितः । तमालोक्याचिन्तयत् आः कथमेतन्मांसं सुललितं भक्षयामि । भवतु । विश्वासं तावदुत्पादयामि । इत्यालोच्योपसृत्याब्रवीत् मित्र । कुशलं ते । मृगेणोक्तं । कस्त्वं । स ब्रूते । क्षुद्रबुद्धिनामा जम्बुको ऽहमत्रारण्ये बन्धुहीनो मृतवन्निवसामि । इदानीं भवन्तं मित्रमासाद्य पुनः सबन्धुर्जीवलोकं प्रविष्टो ऽस्मि । अधुना तवानुचरेण मया सर्वथा भवितव्यं । मृगेणोक्तं । एवमस्तु । ततो ऽस्तं गते सवितरि भगवति मरीचिमालिनि तौ मृगस्य वासभूमिं गतौ । तत्र चम्पकवृक्षशाखायां सुबुद्धिनामा काको मृगस्य मित्रं निवसति । तौ दृष्ट्वा काको ऽवदत् सखे चित्राङ्ग । को ऽयं द्वितीयः । मृगो ब्रूते । जम्बुको ऽयमस्मत्सख्यमिच्छन्नागतः । काको ब्रूते । मित्र । अकस्मादागन्तुना सह विश्वासो न युक्तः । इत्याकर्ण्य जम्बुकः सकोपमाह । मृगस्य प्रथमदर्शनदिने भवानप्यज्ञातकुलशील एव । तद्भवता सह कथमद्य यावदेतस्य स्नेहानुवृत्तिरुत्तरोत्तरं वर्तते ।

यत्र विद्वज्जनो नास्ति श्लाघ्यस्तत्राल्पधीरपि ।
निरस्तपादपे देशे एरण्डो ऽपि द्रुमायते ॥ १ ॥

अन्यच्च ।

अयं निजः परो वेति गणना लघुचेतसां ।
उदारचरितानां तु वसुधैव कुटुम्बकं ॥ २ ॥

यथायं मृगो मम बन्धुः । तथा भवानपि । मृगो ऽब्रवीत् किमनेनोत्तरोत्तरेण । सर्वैरेकत्र विश्रम्भालापैः सुखिभिः स्थीयतां । यतः ।

न कश्चित्कस्यचिन्मित्रं न कश्चित्कस्यचिद्रिपुः ।
व्यवहारेण मित्राणि जायन्ते रिपवस्तथा ॥ ३ ॥

काकेनोक्तं । एवमस्तु । अथ प्रातः सर्वे यथाभिमतदेशं गताः । एकदा तेन जम्बुकेन सुनिभृतमुक्तं । सखे । अस्मिन्वनैकदेशे शस्यपूर्णं क्षेत्रमस्ति । तदहं त्वां तत्र नीत्वा दर्शयामि । तथा कृते सति मृगः प्रत्यहं तत्र गत्वा शस्यं खादति। अथ क्षेत्रपतिना तद्दृष्ट्वा पाशास्तत्र नियोजिताः। अनन्तरं पुनरागतो मृगः पाशैर्बद्धो ऽचिन्तयत् को मामितः कालपाशादिव व्याधपाशात्त्रातुं मित्रादन्यः समर्थः । अत्रान्तरे जम्बुकस्तत्रोपस्थितो ऽचिन्तयत् फलितं ताव-दस्माकं कपटप्रबन्धेन । मनोरथसिद्धिरपि बाहुल्यान्मे भविष्यति। एतस्यो-त्कृत्यमानस्य मांसासृग्लिप्तान्यस्थीनि मयावश्यं प्राप्तव्यानि । मृगस्तं दृष्ट्वो-ल्लासितं ब्रूते । सखे । छिन्द्धि मम बन्धनं । सत्वरं त्रायस्व मां । यतः ।

आपत्सु मित्रं जानीयाद्युद्धे शूरमृणे शुचिं ।
भार्यां क्षीणेषु वित्तेषु व्यसनेषु च बान्धवान् ॥ ४ ॥

अपरं च ।

उत्सवे व्यसने चैव दुर्भिक्षे राष्ट्रविप्लवे ।
राजद्वारे श्मशाने च यस्तिष्ठति स बान्धवः ॥ ५ ॥

जम्बुकः मुहुर्मुहुः पाशं विलोक्याचिन्तयत् दृढस्तावदयं बन्धः । ब्रूते च । सखे । स्नायुनिर्मिता एते पाशाः । तदद्य भट्टारकवारे कथमेतान्दन्तैः स्पृशा-मि । मित्र । यदि नान्यथा मन्यसे । तदा प्रभाते यत्त्वयोच्यते तन्मया क-र्तव्यं । इत्युक्त्वा तत्समीप आत्मानमाच्छाद्य स्थितः सः । अनन्तरं स काकः प्रदोषकाले मृगमनागतमवलोक्य इतस्ततो ऽन्विष्य तथाविधं दृष्ट्वोवाच । सखे । किमेतद् मृगेणोक्तं । अवधीरितसुहृद्वाक्यस्य फलमेतद् तथा चोक्तं ।

सुहृदां हितकामानां यः शृणोति न भाषितं ।
विपत्संनिहिता तस्य स नरः शत्रुनन्दनः ॥ ६ ॥

दीपनिर्वाणगन्धं च सुहृद्वाक्यमरुन्धतीं ।
न जिघ्रन्ति न शृण्वन्ति न पश्यन्ति गतायुषः ॥ ७ ॥

काको ब्रूते । स वञ्चकः क्व । मृगेणोक्तं । मन्मांसार्थी तिष्ठत्यत्रैव । काको ब्रूते । मित्र । उक्तमेव मया पूर्वं ।

अपराधो न मे ऽस्तीति नैतद्विश्वासकारणं ।
विद्यते हि नृशंसेभ्यो भयं गुणवतामपि ॥ ८ ॥
परोक्षे कार्यहन्तारं प्रत्यक्षे प्रियवादिनं ।
वर्जयेत्तादृशं मित्रं विषकुम्भं पयोमुखं ॥ ९ ॥

ततः काको दीर्घं निःश्वस्य । अरे वञ्चक । किं त्वया पापकर्मणा कृतं । यतः ।

संलापितानां मधुरैर्वचोभिर्मिथ्योपचारैश्च वशीकृतानां ।
आशावतां श्रद्दधतां च लोके किमर्थिनां वञ्चयितव्यमस्ति ॥ १० ॥

अन्यच्च ।

उपकारिणि विश्रब्धे शुद्धमतौ यः समाचरति पापं ।
तं जनमसत्यसंधं भगवति वसुधे कथं वहसि ॥ ११ ॥
दुर्जनेन समं सख्यं प्रीतिं चापि न कारयेत् ।
उष्णो दहति चाङ्गारः शीतः कृष्णायते करं ॥ १२ ॥
दुर्जनः परिहर्तव्यो विद्ययालंकृतो ऽपि सन् ।
मणिना भूषितः सर्पः किमसौ न भयंकरः ॥ १३ ॥

अथवा स्थितिरियं दुर्जनानां ।

प्राक्पादयोः पतति खादति पृष्ठमांसं
कर्णे कलं किमपि रौति शनैर्विचित्रं ।
छिद्रं निरूप्य सहसा प्रविशत्यशङ्कः
सर्वं खलस्य चरितं मशकः करोति ॥ १४ ॥

तथा च ।

दुर्जनः प्रियवादी च नैतद्विश्वासकारणं ।
मधु तिष्ठति जिह्वाग्रे हृदि हालाहलं विषं ॥ ९५ ॥

अथ प्रभाते क्षेत्रपतिर्लगुडहस्तस्तं प्रदेशमागच्छन्काकेनावलोकितः। तमालोक्य काकेनोक्तं । मित्र । त्वमात्मानं मृतवत्संदर्श्य वातेनोदरं पूरयित्वा पादान्स्तब्धीकृत्य तिष्ठ। यदाहं शब्दं करोमि । तदा त्वमुत्थाय सत्वरमपसरिष्यसि। मृगस्तथैव काकवचनेन स्थितः। ततः क्षेत्रपतिना हर्षोत्फुल्ललोचनेन तथाविधो मृग आलोकितः । आः स्वयं मृतो ऽयं । इत्युक्त्वा मृगं बन्धनान्मोचयित्वा पाशान्संगृहीतुं सयत्नो बभूव । ततः काकशब्दं श्रुत्वा मृगः सत्वरमुत्थाय पलायितः । तमुद्दिश्य क्षेत्रपतिना लगुडः प्रक्षिप्तः । तेन प्रहारेण शृगालो हतः । तथा चोक्तं ।

त्रिभिर्वर्षैस्त्रिभिर्मासैस्त्रिभिः पक्षैस्त्रिभिर्दिनैः ।
अत्युत्कटैः पापपुण्यैरिहैव फलमश्नुते ॥ ९६ ॥

अतो ऽहं ब्रवीमि:

भक्ष्यभक्षकयोः प्रीतिर्विपत्तेः कारणं महत् ।
शृगालात्पाशबद्धो ऽसौ मृगः काकेन रक्षितः ॥ ९७ ॥

---

## III. (I. 4.)

## DER BLINDE GEIER, DIE KATZE UND DIE VŒGEL.

अस्ति भागीरथीतीरे गृध्रकूटनाम्नि पर्वते महान्पर्कटीवृक्षः । तस्य कोटरे दैवदुर्विपाकाद्गलितनयनो जरद्गवनामा गृध्रः प्रतिवसति। अथ कृपया तज्जीवनाय तद्वृक्षवासिनः पक्षिणः स्वाहारात्किंचित्किंचिद्ददति। तेनासौ जीवति। अथ कदाचिद्दीर्घकर्णो नाम मार्जारः पक्षिशावकान्भक्षयितुं तत्रागतः । ततस्तमायान्तं दृष्ट्वा पक्षिशावकैर्भयाकुलैः कोलाहलः कृतः। तच्छ्रुत्वा जरद्गवेनोक्तं।

को ऽयमायाति । दीर्घकर्णो गृध्रमवलोक्य सभयमाह । हा हतो ऽस्मि । अधुनास्य संनिधाने पलायितुमक्षमः । तद्यथा भवितव्यं । तथा भवतु । तावद्विश्वासमुत्पाद्यास्य समीपमुपगच्छामि । इत्यालोच्योपसृत्याब्रवीत् आर्य । त्वामभिवन्दे । गृध्रो ऽवदत् कस्त्वं । सो ऽब्रवीत् मार्जारो ऽहं । गृध्रो ब्रूते । तद्दूरमपसर । नो चेत् हन्तव्यो ऽसि मया । मार्जारो ऽवदत् श्रूयतां तावन्मद्वचनं । ततो यद्यहं वध्यः । तदा हन्तव्यः । यतः ।

जातिमात्रेण किं कश्चिद्धन्यते पूज्यते क्वचित् ।
व्यवहारं परिज्ञाय वध्यः पूज्यो ऽथवा भवेत् ॥ १ ॥

गृध्रो ब्रूते । ब्रूहि । किमर्थमागतो ऽसि । सो ऽवदत् अहमत्र गङ्गातीरे नित्यस्नायी निरामिषाशी ब्रह्मचर्येण चान्द्रायणव्रतं चरंस्तिष्ठामि । युष्मांश्च धर्मज्ञानरतान्विश्वासभूमयः पक्षिणः सर्वे सर्वदा ममाग्रे प्रस्तुवन्ति । अतः भवद्भ्यो विद्यावयोवृद्धेभ्यो धर्मं श्रोतुमिहागतः । भवन्तश्चैतादृशा धर्मज्ञाः । यन्मामतिथिं हन्तुमुद्यताः । गृहस्थधर्मश्चैषः ।

अरावप्युचितं कार्यमातिथ्यं गृहमागते ।
छेत्तुः पार्श्वगताच्छायां नोपसंहरते द्रुमः ॥ २ ॥

यदि वा धनं नास्ति । तदा प्रीतिवचसाप्यतिथिः पूज्यः । यतः ।

तृणानि भूमिरुदकं वाक्चतुर्थी च सूनृता ।
एतान्यपि सतां गेहे नोच्छिद्यन्ते कदाचन ॥ ३ ॥

अन्यच्च ।

निर्गुणेष्वपि सत्त्वेषु दयां कुर्वन्ति साधवः ।
न हि संहरते ज्योत्स्नां चन्द्रश्चाण्डालवेश्मनि ॥ ४ ॥

तथा चोक्तं ।

अतिथिर्यस्य भग्नाशो गृहात्प्रतिनिवर्तते ।
स तस्मै दुष्कृतं दत्त्वा पुण्यमादाय गच्छति ॥ ५ ॥

उत्तमस्यापि वर्णस्य नीचो ऽपि गृहमागतः ।
पूजनीयो यथायोग्यं सर्वदेवमयो ऽतिथिः ॥ ६ ॥

गृध्रो ऽवदत् मार्जारा हि मांसरुचयः । पक्षिशावकाश्चात्र निवसन्ति । तेनैवं ब्रवीमि । तच्छ्रुत्वा मार्जारो भूमिं स्पृष्ट्वा कर्णौ स्पृशति । मया धर्मशास्त्रं श्रुत्वा वीतरागेणेदं दुष्करं व्रतमध्यवसितं । यतः परस्परं विवदमानानामपि धर्मशास्त्राणामहिंसा परमो धर्म इत्यत्रैकमत्यं । यतः ।

सर्वहिंसानिवृत्ता ये नराः सर्वसहाश्च ये ।
सर्वस्याश्रयभूताश्च ते नराः स्वर्गगामिनः ॥ ७ ॥

अन्यच्च ।

एक एव सुहृद्धर्मो निधने ऽप्यनुयाति यः ।
शरीरेण समं नाशं सर्वमन्यत्तु गच्छति ॥ ८ ॥

किं च ।

यो ऽत्ति यस्य यदा मांसमुभयोः पश्यतान्तरं ।
एकस्य क्षणिका प्रीतिरन्यः प्राणैर्विमुच्यते ॥ ९ ॥

अपि च ।

मर्तव्यमिति यद्दुःखं पुरुषस्योपजायते ।
शक्यस्तेनानुमानेन परो ऽपि परिरक्षितुं ॥ १० ॥

शृणु पुनः ।

स्वच्छन्दवनजातेन शाकेनापि प्रपूर्यते ।
अस्य दग्धोदरस्यार्थे कः कुर्यात्पातकं महत् ॥ ११ ॥

एवं विश्वास्य स मार्जारस्तरुकोटरे स्थितः । ततो दिनेषु गच्छत्सु पक्षिशावकानाक्रम्य कोटरमानीय प्रत्यहं खादति । अथ येषामपत्यानि खादितानि । तैः शोकार्तैर्विलपद्भिरितस्ततो जिज्ञासा समारब्धा । तत्परिज्ञाय मार्जारस्तैरलक्ष्यमाणः कोटरान्निःसृत्य पलायितः । पश्चात्पक्षिभिरितस्ततो निरूपय-

द्भिस्तत्र तरुकोटरे शावकास्थीनि प्राप्तानि । अनन्तरं त ऊचुः । अनेनैव जरद्गवेनास्माकं शावकाः खादिताः । इति सर्वैः पक्षिभिर्निश्चित्य मेलकं कृत्वा गृध्रो व्यापादितः । अतो ऽहं ब्रवीमि ।

अज्ञातकुलशीलस्य वासो देयो न कस्यचित् ।
मार्जारस्य हि दोषेण हतो गृध्रो जरद्गवः ॥ १२ ॥

---

## IV. (I. 7.)

## DER JÆGER, DIE GAZELLE, DER EBER UND DER SCHAKAL.

अस्ति कल्याणकटकवास्तव्यो भैरवो नाम व्याधः । स चैकदा मांसलुब्धः सन्मृगमन्विष्यमाणो धनुरादाय विन्ध्याटवीमध्यं गतः । ततस्तेन व्यापादितं मृगमादाय गच्छता घोराकृतिः शूकरो दृष्टः । तेन व्याधेन मृगं भूमौ निधाय शूकरः शरेण हतः । शूकरेणापि घनघोरगर्जनं कृत्वा मुष्कदेशे हतः स च्छिन्नद्रुम इव भूमौ पपात । यतः ।

जलमग्निं विषं शस्त्रं क्षुद्व्याधी पतनं गिरेः ।
निमित्तं किंचिदासाद्य देही प्राणैर्विमुच्यते ॥ १ ॥

अत्रान्तरे दीर्घरावो नाम जम्बुकः परिभ्रमन्नाहारार्थी तान्मृतान्मृगव्याधशूकरानवलोकयामास । आलोक्याचिन्तयत् अहो अद्य महद्भोज्यं मे समुपस्थितं । किं च ।

अचिन्तितानि दुःखानि यथैवायान्ति देहिनां ।
सुखान्यपि तथा मन्ये दैवमत्रातिरिच्यते ॥ २ ॥

भवतु । एषां मांसैर्मासत्रयं समधिकं भोजनं मे भविष्यति । ततः प्रथमबुभुक्षायां तावदिमानि स्वादूनि मांसानि विहाय कोदण्डाटनीलग्नं स्नायुबन्धं खादा-

मि। इत्युक्का तथाकरोत् ततश्छिन्ने स्नायुबन्धे द्रुतमुत्पतितेन धनुषा हृदि भिन्नः स दीर्घरावः पञ्चत्वं गतः। अतो ऽहं ब्रवीमि।

कर्तव्यः संचयो नित्यं कर्तव्यो नातिसंचयः।
पश्य संचयशीलो ऽसौ धनुषा जम्बुको हतः॥ ३॥

---

V. (I. 8.)

## DER PRINZ UND DIE FRAU DES KAUFMANNSSOHNES.

अस्ति कान्यकुब्जविषये राजा वीरसेनो नाम। तेन वीरपुरनाम्नि नगरे तुङ्गबलो नाम राजपुत्रो भोगपतिः कृतः। स च महाधनस्तरुण एकदा स्वनगरं भ्राम्यन्नतिप्रौढयौवनां लावण्यवतीं नाम वणिक्पुत्रवधूमालोकयामास। ततः स्वहर्म्यं गत्वा स्मराकुलितमतिस्तस्याः कृते दूतीं प्रेषितवान्। सापि लावण्यवती तदवलोकनक्षणात्प्रभृति स्मरशरप्रहारजर्जितहृदया तदेकचित्ताभवत्। तथा ह्युक्तं।

न स्त्रीणामप्रियः कश्चित्प्रियो वापि न विद्यते।
गावस्तृणमिवारण्ये प्रार्थयन्ति नवं नवं॥ १॥

अथ दूतीवचनं श्रुत्वा लावण्यवत्युवाच। अहं पतिव्रता परपुरुषस्पर्शमात्रमपि न करोमि। यतः।

सा भार्या या गृहे दक्षा सा भार्या या प्रजावती।
सा भार्या या पतिप्राणा सा भार्या या पतिव्रता॥ २॥
न सा भार्येति विख्याता यस्यां भर्ता न तुष्यति।
अग्निसाक्षिकमर्यादो भर्ता हि शरणं स्त्रियाः॥ ३॥

ततो यद्यदादिशति मे प्राणेश्वरः। तत्तदेवाहमविचारितं करोमि। दूत्योक्तं। सत्यमेतद्। लावण्यवत्युवाच। सत्यमेवैतद्। तत्सर्वमेव दूत्या गत्वा तुङ्गबलस्य

निवेदितं । तच्छ्रुत्वा तुङ्गबलो ऽवदत् स्वामिनानीय समर्पयितव्येति कथमेतच्छक्यं । कुट्टन्याह । उपायः क्रियतां । ततः कुट्टन्युपदेशेन तं चारुदत्तनामानं वणिक्पुत्रं स राजपुत्रः सेवकं चकार । ततो ऽसौ तेन सर्वविश्वासकार्येषु नियुज्यते । तत्रैकदा तेन राजपुत्रेण स्नातानुलिप्तेन कनकालंकारधारिणोक्तं । मया मासमेकं यावद्गौरीव्रतं कर्तव्यं । तदद्यारभ्य प्रतिरात्रमेकां कुलीनां युवतीमानीय समर्पय । सा मया यथोचितेन विधिना पूजयितव्या । ततः स चारुदत्तस्तथाविधां तरुणीमानीय समर्पयति । पश्चात्प्रच्छन्नः किमयं करोतीति निरूपयति । स च तुङ्गबलस्तां युवतीमस्पृशन्नेव वस्त्रालंकारैः संपूज्य रक्षकं दत्त्वा तत्क्षणं प्रस्थापयति । अथ वणिक्पुत्रेण तद्दृष्ट्वोपजातविश्वासेन लोभाकृष्टचेतसा स्ववधूरानीय समर्पिता । स च राजपुत्रस्तां हृदयप्रियां लावण्यवतीं परिज्ञाय ससंभ्रममुत्थाय निर्दयमालिङ्ग्यानन्दनिमीलितलोचनः पर्यङ्के तया सह विललास । तदालोक्य वणिक्पुत्रश्चित्रलिखित इव इतिकर्तव्यतामूढः परं विषादमगमत् ।

---

## VI. (I. 9.)

## DER ELEPHANT UND DER SCHAKAL.

अस्ति ब्रह्मारण्ये कर्पूरतिलको नाम हस्ती । तमालोक्य सर्वे शृगालाश्चिन्तयन्ति । यद्ययं केनाप्युपायेन म्रियते । तदास्माकमेतद्देहेन मासचतुष्टयस्य स्वेच्छाभोजनं भविष्यति । तत एकेन वृद्धशृगालेन प्रतिज्ञातं । मया बुद्धिप्रभावादेतस्य मरणं साधयितव्यं । अनन्तरं स वञ्चकः कर्पूरतिलकसकाशं गत्वा साष्टाङ्गपातं प्रणम्योवाच । देव । दृष्टिप्रसादं कुरु । हस्ती ब्रूते । कस्त्वं । कुतः समायातः । सो ऽवदत् जम्बुको ऽहं सर्वैर्वनवासिभिर्मिलित्वा भवत्सकाशं प्रस्थापितः । यद्विना राज्ञावस्थातुं न युक्तं । तदत्राटवीराज्ये ऽभिषेक्तुं भवान्सर्वस्वामिगुणोपेतो निरूपितः । यतः ।

यः कुलाभिजनाचारैरतिशुद्धः प्रतापवान् ।
धार्मिको नीतिकुशलः स स्वामी युज्यते भुवि ॥ १ ॥

अपरं च पश्य ।

राजानं प्रथमं विन्देत्ततो भार्यां ततो धनं ।
राजन्यसति लोके ऽस्मिन्कुतो भार्या कुतो धनं ॥ २ ॥

अन्यच्च ।

पर्जन्य इव भूतानामाधारः पृथिवीपतिः ।
विकले ऽपि हि पर्जन्ये जीव्यते न तु भूपतौ ॥ ३ ॥

किं च ।

नियतविषयवर्ती प्रायशो दण्डयोगा-
ज्जगति परवशे ऽस्मिन्दुर्लभः साधुवृत्तः ।
कृशमतिविकलं वा व्याधितं वाधनं वा
पतिमपि कुलनारी दण्डभीत्याभ्युपैति ॥ ४ ॥

तद्यथा लग्नवेला न चलति । तथा कृत्वा सत्वरमागम्यतां देवेन । इत्युक्त्वोत्थाय जम्बुकश्चलितः । ततो ऽसौ राज्यलोभाकृष्टः कर्पूरतिलकः शृगालवर्त्मना धावन्महापङ्के निमग्नः । हस्तिनोक्तं । सखे शृगाल । किमधुना विधेयं । महापङ्के पतितो ऽहं । शृगालेन विहस्योक्तं । देव । मम पुच्छे करावलम्बनं कृत्वोत्तिष्ठ । यस्य वचसि त्वया विश्वासः कृतः । तस्य फलमेतद् तथा ह्युक्तं ।

यदि सत्संगरहितो भविष्यसि भविष्यसि ।
तदासज्जनगोष्ठीषु पतिष्यसि पतिष्यसि ॥ ५ ॥

ततो महापङ्कनिमग्नो हस्ती शृगालैर्भक्षितः । अतो ऽहं ब्रवीमि ।

उपायेन हि यच्छक्यं न तच्छक्यं पराक्रमैः ।
शृगालेन हतो हस्ती गच्छता पङ्कवर्त्मना ॥ ६ ॥

## VII. (II. 2.)

### DER AFFE UND DER KEIL.

अस्ति मगधदेशे धर्मारण्यसंनिहितवसुधायां शुभदत्तनामा कायस्थः । तेन विहारः कारयितुमारब्धः । तत्र करपत्त्रविदार्यमाणस्तम्भस्य कियद्दूरस्फाटितस्य काष्ठखण्डद्वयमध्ये कीलकः सूत्रधारेण स्थापितः । तत्र सायाह्ने वनवासी वानरयूथः क्रीडन्नागतः । तेष्वेको वानरः कालदण्डप्रेरित इव तं कीलकं हस्ताभ्यां धृत्वोपविष्टः । ततस्तस्य मुष्कद्वयं लम्बमानं काष्ठखण्डद्वयाभ्यन्तरे प्रविष्टं । अनन्तरं स च सहजचपलतया महता प्रयत्नेन तं कीलकमाकृष्टवान् आकृष्टे सति काष्ठाभ्यां चूर्णिताण्डद्वयः पञ्चत्वं गतः । अतो ऽहं ब्रवीमि ।

अव्यापारेषु व्यापारं यो नरः कर्तुमिच्छति ।
स भूमौ निहतः शेते कीलोत्पाटीव वानरः ॥ १ ॥

---

## VIII. (II. 3.)

### DER DIEB, DER ESEL UND DER HUND.

अस्ति वाराणस्यां कर्पूरपटो नाम रजकः । स चैकदाभिनववयस्कया कान्तया सह चिरात्केलिं कृत्वा निर्भरं प्रसुप्तः । तदनन्तरं द्रव्याणि हर्तुं तद्गृहं चौरः प्रविष्टः । तस्य प्राङ्गणे गर्दभो बद्धस्तिष्ठति कुक्कुरश्चोपविष्टः । अथ गर्दभः श्वानमाह । तव तावदयं व्यापारः । तत्किमिति त्वमुच्चैः शब्दं कृत्वा स्वामिनं न जागरयसि । कुक्कुरो ब्रूते । मम नियोगस्य चर्चा किं त्वया कर्तव्या । त्वमेव जानासि । यथाहमेतस्याहर्निशं गृहरक्षां करोमि । ततो ऽयं चिरान्निर्वृतो ममोपयोगं न जानाति । तेनाधुना ममाहारदाने ऽपि मन्दादरः । यतो विना विधुरदर्शनं स्वामिनो ऽनुजीविषु मन्दादरा भवन्ति । गर्दभो ब्रूते । शृणु रे बर्बर ।

याचते कार्यकाले यः स किं भृत्यः स किं सुहृद् ।

कुक्कुरो ब्रूते ।

योन संभावयेद्भृत्यान्कार्यकाले स किं प्रभुः ॥ १ ॥

यतः ।

आश्रितानां भृतौ स्वामिसेवायां धर्मसेवने ।
पुत्रस्योत्पादने चैव न सन्ति प्रतिहस्तकाः ॥ २ ॥

ततो गर्दभः सकोपमाह । पापीयांस्त्वं । यद्विपत्तौ स्वामिकार्योपेक्षां करोषि । भवतु । यथा स्वामी जागर्ति । तथा मया कर्तव्यं । यतः ।

पृष्ठतः सेवयेदर्कं जठरेण हुताशनं ।
स्वामिनं सर्वभावेन परलोकममायया ॥ ३ ॥

इत्युक्त्वा स चीत्कारशब्दं कृतवान् ततः स रजकस्तेन चीत्कारेण प्रबुद्धो निद्राविमर्दकोपादुत्थाय गर्दभं लगुडेन ताडयामास । अतो ऽहं ब्रवीमि ।

पराधिकारचर्चां यः कुर्यात्स्वामिहितेच्छया ।
स विषीदति चीत्कारात्ताडितो गर्दभो यथा ॥ ४ ॥

---

## IX. (II. 4.)

## DER LŒWE, DIE MAUS UND DIE KATZE.

अस्त्यर्बुदशिखरनाम्नि पर्वते महाविक्रमो नाम सिंहः । तस्य पर्वतकुहरमधिशयानस्य केशराग्रं प्रत्यहं कश्चिन्मूषिकश्छिनत्ति । स सिंहः केशराग्रं लूनं दृष्ट्वा कुपितस्तं विवरान्तर्गतं मूषिकमलभमानो ऽचिन्तयत् किमत्र विधेयं । यतः

क्षुद्रशत्रुर्भवेद्यस्तु विक्रमान्नैव लभ्यते ।
तं निहन्तुं पुरस्कार्यः सदृशस्तस्य सैनिकः ॥ १ ॥

इत्यालोच्य तेन सिंहेन ग्रामं गत्वा दधिकर्णनामा विडालो मांसाद्याहारं दत्त्वा प्रयत्नादानीय स्वकन्दरे धृतः। ततस्तद्भयान्मूषिको न वहिर्निःसरति। तेनासौ सिंहो ऽक्षतकेशरः सुखं स्वपिति। मूषिकशब्दं यदा यदा शृणोति। तदा तदा मांसाहारदानेन तं विडालं संवर्धयति। अथैकदा स मूषिकः क्षुधा पीडितो वहिश्चरन्मार्जारेण प्राप्तो व्यापादितश्च। अनन्तरं स सिंहो यदा कदाचिदपि तस्य मूषिकस्य शब्दं न शुश्राव। तदोपयोगाभावाद्विडालस्याहारदाने मन्दादरो वभूव। ततो ऽसौ दधिकर्णो ऽप्याहाराभावाद्दुर्वलो ऽभवत्। अतो ऽहं ब्रवीमि।

निरपेक्षो न कर्तव्यो भृत्यैः स्वामी कदाचन।
निरपेक्षं प्रभुं कृत्वा भृत्यः स्याद्दधिकर्णवत्॥ २॥

---

## X. (II. 5.)

## DIE KUPPLERIN UND DIE GLOCKE.

अस्ति श्रीपर्वतमध्ये ब्रह्मपुराभिधानं नगरं। तत्प्रदेशे घण्टाकर्णो नाम राक्षसः प्रतिवसतीति जनप्रवादः श्रूयते। एकदा घण्टामादाय पलायमानः कश्चिच्चौरो व्याघ्रेण व्यापादितः खादितश्च। तत्पाणितः पतिता घण्टा वानरैः प्राप्ता। ते वानरास्तां घण्टामनुक्षणं वादयन्ति। ततो तन्नगरवासिजनैः स मानुषः खादितो दृष्टः। प्रतिक्षणं घण्टावादश्च श्रूयते। अनन्तरं घण्टाकर्णः कुपितो मानुषं खादतीत्युक्त्वा जनाः सर्वे नगरात्पलायिताः। ततः कुट्टन्या वहुशो विमृश्य वानरो घण्टां वादयतीति स्वयं परिज्ञाय राजा विज्ञापितः। देव। यदि धनोपक्षयः क्रियते। तदा घण्टाकर्णमहं साधयामि। ततो राज्ञा धनं दत्त्वा प्रस्थापिता। कुट्टन्या च मण्डलपूजागणचक्रादिभिराश्चर्यगौरवं दर्शयित्वा स्वयं वानरप्रियफलानि समादाय वनं प्रविश्य फलान्यवकीर्णानि।

ततो घण्टां परित्यज्य वानराः सर्वे फलासक्ता बभूवुः । कुट्टिनी घण्टा-
मादाय समागता । ततः सा सकललोकपूज्याभवत् अतो ऽहं ब्रवीमि ।

शब्दमात्रान्न भेतव्यमज्ञात्वा शब्दकारणं ।
शब्दहेतुं परिज्ञाय कुट्टिनी गौरवं गता ॥ १ ॥

---

## XI. (II. 9.)

## DIE FRAU DES KUHHIRTEN UND IHRE BEIDEN LIEBHABER.

अस्ति द्वारावत्यां नगर्यां कस्यचिद्गोपस्य वधूर्बन्धकी । सा च ग्राममौख्येन
दण्डनायकेन तत्पुत्रेण च समं रमते । तथा चोक्तं ।

नाग्निस्तृप्यति काष्ठानां नापगानां महोदधिः ।
नान्तकः सर्वभूतानां न पुंसां वामलोचनाः ॥ १ ॥

अन्यच्च ।

न दानेन न मानेन नार्जवेन न सेवया ।
न शस्त्रेण न शास्त्रेण सर्वथा विषमाः स्त्रियः ॥ २ ॥

ततः कदाचिदसौ दण्डनायकपुत्रेण सह रममाणा तिष्ठति । अथ दण्डनायको
ऽप्यागतः । तं दृष्ट्वा तत्पुत्रं कुसूले धृत्वा दण्डनायकेन समं तथैवाक्रीडत्
अनन्तरं तस्या भर्ता गोष्ठात्समागतः । तमालोक्य गोप्योक्तं । दण्डनायक ।
त्वं लगुडं गृहीत्वा कोपं दर्शयन्सत्वरं याहि । तेन तथानुष्ठिते सति गोपालेन
स्वगृहमागत्य भार्या पृष्टा । केन कार्येणात्र दण्डनायकः समागतः । सा
ब्रूते । अयं केनापि कारणेन पुत्रस्योपरि क्रुद्धः । स च मार्ग्यमाणो ऽत्रागत्य
प्रविष्टः । ततो मया कुसूले निक्षिप्य रक्षितः पित्रा चान्विष्यता गृहे न
दृष्टः । अतो ऽयं कुपित एव गच्छति । ततः सा तत्पुत्रं कुसूलादवतार्य
स्वामिनं दर्शितवती । तथा चोक्तं ।

आहारो द्विगुणः स्त्रीणां बुद्धिस्तासां चतुर्गुणा ।
षड्गुणो व्यवसायश्च कामश्चाष्टगुणः स्मृतः ॥ ३ ॥

अतो ऽहं ब्रवीमि ।

उत्पन्नेष्वपि कार्येषु मतिर्यस्य न हीयते ।
स निस्तरति दुर्गाणि गोपी जारद्वयं यथा ॥ ४ ॥

---

## XII. XIII. (II. 10, 11.)

### DIE KRÆHE UND DIE SCHLANGE.

### DER ELEPHANT UND DER HASE.

कस्मिंश्चित्तरौ वायसदंपती निवसतः । तयोश्चापत्यानि तरुकोटरे ऽवस्थित-कृष्णसर्पेण खादितानि । ततः पुनर्गर्भवती वायसी ब्रूते । स्वामिन् त्यज्यतामयं तरुः । अत्रैतस्मात्कृष्णसर्पादावयोः संततिर्न भविष्यति कदाचित् यतः ।

दुष्टा भार्या शठं मित्रं भृत्याश्चोत्तरदायकाः ।
ससर्पे च गृहे वासो मृत्युरेव न संशयः ॥ १ ॥

वायसो ऽवदत् प्रिये । न भेतव्यं । वारं वारं मयैतस्यापराधः सोढः । इदानीं निग्रहीतव्यः । वायस्याह । कथमनेन बलवता सार्धं भवान्विग्रहीतुं समर्थः । वायसो ब्रूते । अलमनया शङ्कया । यतः ।

बुद्धिर्यस्य बलं तस्य अबुधस्य कुतो बलं ।
पश्य सिंहो मदोन्मत्तः शशकेन निपातितः ॥ २ ॥

वायस्याह । कथमेतद् वायसः कथयति । अस्ति मन्दराभिधाने पर्वते दुर्गान्तो नाम सिंहः । स च पशूनां वधं सदा विदधान एव तत्रास्ते । ततः सर्वैः पशुभिर्मिलित्वा सिंहो विज्ञप्तः । स्वामिन् किमिति सर्वपशूच्छेदः क्रियते । वयमेव भवदाहारार्थं प्रत्यहमेकैकं पशुमुपढौकयामः । सिंहेनोक्तं । भवत्वेवं ।

ततः प्रभृत्येकैकं पशुं सभयमुपनयन्ति ते । अथ कदाचिद्वृद्धशशकस्य वारः समायातः । सो ऽचिन्तयत् ।

प्राणहेतोस्तु विनयः क्रियते जीविताशया ।
पञ्चत्वं चेद्गमिष्यामि किं सिंहानुनयेन मे ॥ ३ ॥

तन्मन्दं मन्दमुपसर्पामि । इत्युपगच्छति सः । अथ तमालोक्य सिंहो ऽपि क्षुधा पीडितः कोपादुवाच । कुतस्त्वं विलम्ब्यागतो ऽसि । सो ऽब्रवीत् नायं ममापराधः । पथि सिंहान्तरेण बलाद्धृतः सन्पुनरागमनाय शपथं कृत्वा स्वामिनं तन्निवेदयितुमत्रागतः । सिंहः सकोपमाह । सत्वरं गत्वा दर्शय । क्वासौ दुरात्मा तिष्ठति । ततः शशकस्तं दृतं गृहीत्वा गम्भीरकूपसमीपं गतः । अत्रागत्य पश्यतु स्वामीत्युक्त्वा तस्मिन्कूपजले तस्यैव सिंहस्य प्रतिबिम्बं दर्शितवान् अतो ऽसौ दर्पाध्मातः कोपात्तस्योपर्यात्मानं निक्षिप्य पञ्चत्वं गतः । अतो ऽहं ब्रवीमि । बुद्धिर्यस्य बलं तस्येत्यादि ।

वायस्याह । सर्वमेतच्छ्रुतं मया । इदानीं यत्कर्तव्यं । ब्रूहि । वायसो ऽवदत् अत्रासन्ने सरसि राजपुत्रः प्रत्यहमागत्य स्नाति । स्नानसमये तदङ्गादवतारितकनकसूत्रं चञ्च्वा धृत्वानीयास्मिन्कोटरे धरिष्यसि । अथ कनकसूत्रानुसरणप्रवृत्तैः राजपुरुषैः कोटरे निरूप्यमाणे स कृष्णसर्पो द्रष्टव्यो व्यापादयितव्यश्च । अथ कदाचित्स्नातुं जलं प्रविष्टे राजपुत्रे वायस्या तदनुष्ठितं । तथानुष्ठिते तद्वृत्तं । अतो ऽहं ब्रवीमि ।

उपायेन हि यच्छक्यं न तच्छक्यं पराक्रमैः ।
काकी कनकसूत्रेण कृष्णसर्पमघातयत् ॥ ४ ॥

## XIV. (II. 12.)

### DAS WASSERHUHN UND DAS MEER.

कदाचित्समुद्रतीरे टिट्टिभदंपती निवसतः । तत्र टिट्टिभी चासन्नप्रसवा भर्तारमाह । नाथ । प्रसवयोग्यं निभृतस्थानमन्विष्यतां । टिट्टिभो ऽवदत् भार्ये । नन्विदमेव स्थानं प्रसूतियोग्यं । सा ब्रूते । समुद्रवेलया स्थानमेतद्व्याप्यते । सो ऽब्रवीत् भद्रे । किमहं निरङ्गस्तेन स्वगृहावस्थितः समुद्रेण निग्रहीतव्यः । टिट्टिभी विहस्याह । स्वामिन् त्वया समुद्रेण च महदन्तरं । टिट्टिभो ऽवदत् . . . . . . . . . . . . . . . . . . . . . . . . ततः स्वामिवचनात्सा तत्रैव प्रसूता । समुद्रेणापि तच्छक्तिजिज्ञासार्थं तदण्डान्यपहृतानि । अथ टिट्टिभी शोकार्त्ता भर्तारमाह । नाथ । कष्टमापतितं । तान्यण्डानि मे नष्टानि । टिट्टिभो ऽवदत् प्रिये । मा भैषीः । इत्युक्त्वा पक्षिणां मेलकं कृत्वा पक्षिस्वामिनो गरुडस्य समीपं गत्वा स्ववृत्तान्तमकथयत् तद्वचनाद्गरुत्मता स्वभर्त्ता नारायणः सृष्टिस्थितिप्रलयहेतुर्विज्ञापितः सन्समुद्रं तदर्पणाय समादिदेश । ततो भगवदाज्ञां मौलौ निधाय समुद्रेण टिट्टिभस्य तान्यण्डानि समर्पितानि । अतो ऽहं ब्रवीमि ।

अङ्गाङ्गिभावमज्ञात्वा कथं सामर्थ्यनिर्णयः ।
पश्य टिट्टिभमात्रेण समुद्रो व्याकुलीकृतः ॥ १ ॥

---

## XV. (III. 2.)

### DIE VŒGEL UND DIE AFFEN.

अस्ति नर्मदातीरे पर्वतोपत्यकायां विशालः शाल्मलीतरुः । तत्र तरौ निर्मितनीडक्रोडे पक्षिणः सुखं वर्षासु निवसन्ति । अथ नीलपटैरिव जलपटलैरावृते नभस्तले धारासारैर्महती वृष्टिर्बभूव । ततो वानरांस्तरुतले आ-

म्यन्तः शीतार्त्ताः कम्पमाना बभूवुः। तथा तानवलोक्य कृपया पक्षिभिरुक्तं।
भो भो वानराः।

अस्माभिर्निर्मिता नीडाश्चञ्चुमात्राहृतैस्तृणैः।
हस्तपादादिसंयुक्ता यूयं किमिति सीदथ ॥ १ ॥

तच्छ्रुत्वा वानरैर्जातामर्षैरालोचितं। अहो निर्वातनीडगर्भस्थाः सुखिनः पक्षिणो ऽस्मान्निन्दन्ति। तद्भवतु तावद्वृष्टेरुपशमः। अनन्तरं शान्ते पानीयवर्षे तैर्वानरैर्वृक्षाग्रमारुह्य सर्वे नीडा भग्नाः। तेषां पक्षिणामण्डानि चाधः पतितानि। अतो ऽहं ब्रवीमि।

विद्वानेवोपदेष्टव्यो नाविद्वांस्तु कदाचन।
वानरानुपदिश्याज्ञान्स्थानभ्रंशं ययुः खगाः ॥ २ ॥

---

## XVI. (III. 3.)

### DER ESEL IN DER TIGERHAUT.

अस्ति हस्तिनापुरे कर्पूरविलासो नाम रजकः। तस्य गर्दभो ऽतिभारवाहाद्दुर्बलो मुमूर्षुरिवाभवत्। ततस्तेन रजकेनासौ व्याघ्रचर्मणा प्रच्छाद्यारण्यसंनिधाने शस्यक्षेत्रमध्ये नियुक्तः। ततो दूरात्तमवलोक्य व्याघ्रबुद्ध्या क्षेत्रपतयः सत्वरं पलायन्ते। स च सुखेन शस्यं चरति। अथैकदा केनापि शस्यरक्षकेण धूसरकम्बलकृततनुत्राणेन धनुः सज्जीकृत्यानतकायेनैकान्ते स्थितं। तं च दूराद्दृष्ट्वा गर्दभः पुष्टाङ्गो जातबलो गर्दभीयमिति मत्वा शब्दं कुर्वाणस्तदभिमुखं धावति। ततस्तेन रक्षकेण गर्दभो ऽयमिति ज्ञात्वा लीलयैव व्यापादितः। अतो ऽहं ब्रवीमि।

सुचिरं हि चरन्नित्यं क्षेत्रे शस्यमबुद्धिमान्।
द्वीपिचर्मपरिच्छन्नो वाग्दोषाद्गर्दभो हतः ॥ १ ॥

---

## XVII. (III. 4.)

## DIE ELEPHANTEN UND DIE HASEN.

कदाचिद्वर्षास्वपि वृष्टेरभावात्तृषार्त्तो गजयूथो यूथपतिमाह । नाथ । को ह्युपायो ऽस्माकं जीवनाय । अस्त्यत्र क्षुद्रजन्तूनां निमज्जनस्थानं । वयं च निमज्जनाभावादन्धा इव बभ्रामः । किं कुर्मः । ततो हस्तिराजो नातिदूरं गत्वा निर्मलं ह्रदं तेषां दर्शितवान् ततस्तत्तीरावस्थिताः शशका हस्तिपादाहतिभिर्बहवश्चूर्णिताः । अनन्तरं शिलीमुखो नाम शशकः सर्वानाहूय चिन्तयामास । अनेन गजयूथेन पिपासाकुलितेन प्रत्यहमेवात्रागन्तव्यं । अतो विनश्यत्यस्मत्कुलं । अथ विजयो नाम वृद्धशशको ऽवदत् मा विषीदत । मयात्र प्रतीकारः कर्तव्यः । इत्यसौ प्रतिज्ञाय चलितः । गच्छता च तेनालोचितं । कथं मया गजयूथनिकटे स्थित्वा वक्तव्यं । यतः

स्पृशन्नपि गजो हन्ति जिघ्रन्नपि भुजंगमः ।
पालयन्नपि भूपालः प्रहसन्नपि दुर्जनः ॥ १ ॥

अतो ऽहं पर्वतशिखरमारुह्य यूथनाथं वदामि । तथानुष्ठिते यूथनाथ उवाच । कस्त्वं । कुतः समायातः । स ब्रूते । दूतो ऽहं भगवता चन्द्रेण प्रेषितः । यूथपतिराह । कार्यमुच्यतां । विजयो वदति । शृणु गजेन्द्र ।

उद्यतेष्वपि शस्त्रेषु दूतो वदति नान्यथा ।
सदैवावध्यभावेन यथार्थस्य हि वाचकः ॥ २ ॥

तदहं तदाज्ञया ब्रवीमि । शृणु । यदेते चन्द्रसरोरक्षकाः शशकास्त्वया निःसारिताः । तन्न भद्रं कृतं । यतो रक्षकास्ते ऽस्मदीयाः । अत एव लोके मे शशाङ्क इति प्रसिद्धिः । एवमुक्तवति दूते स यूथपतिर्भयादिदमाह । इदमज्ञानतः कृतं । पुनर्नागमिष्यामि । दूत उवाच । तदत्र सरसि भगवन्तं प्रकोपात्कम्पमानं प्रणम्य प्रसाद्य च गच्छ । ततस्तेन रात्रौ नीत्वा तत्र ह्रदजले

चञ्चलं प्रतिबिम्बं दर्शयित्वा यूथपतिः प्रणामं कारितः। देव। अज्ञानादेवानेन कृतं क्षम्यतामित्युक्त्वा प्रस्थापितः। अतो ऽहं ब्रवीमि।

व्यपदेशेन सिद्धिः स्यादतिशक्ते नराधिपे।
शशिनो व्यपदेशेन शशकाः सुखमासते॥ ३॥

---

## XVIII. (III. 5.)

### DIE GANS UND DIE KRÆHE.

अस्त्युज्जयिनीवर्त्मनि प्रान्तरे महान्पिप्पलवृक्षः। तत्र हंसकाकौ निवसतः। कदाचिद्ग्रीष्मसमये परिश्रान्तः कश्चित्पथिकस्तत्र तरुतले धनुः काण्डं च संनिधाने निधाय सुप्तः। ततः क्षणान्तरे तन्मुखाद्वृक्षच्छायापगता। अनन्तरं सूर्यतेजसा तन्मुखं व्याप्तमवलोक्य तद्वृक्षस्थितेन हंसेन कृपया पक्षौ प्रसार्य पुनस्तत्र छाया कृता। ततो निर्भरनिद्रासुखिना तेनाध्वगेन मुखव्यादानं कृतं। अथ परसुखमसहिष्णुः स्वभावदौर्जन्येन स काकस्तन्मुखे पुरीषोत्सर्गं कृत्वा पलायितः। ततो यावदसौ सहसोत्थाय वृक्षाग्रं निरीक्षते। तावत्तेनावलोकितो हंसः काण्डेन हतो व्यापादितश्च। अतो ऽहं ब्रवीमि।

न स्थातव्यं न गन्तव्यं दुर्जनेन समं क्वचित्।
काकसंगाद्धतो हंसस्तिष्ठन्गच्छंश्च वर्तकः॥ १॥

---

## XIX. (III. 5.)

### DIE KRÆHE UND DIE WACHTEL.

एकदा सर्वे पक्षिणो भगवतो गरुडस्य यात्राप्रसङ्गेन समुद्रतीरं प्रचलिताः। तत्र काकेन सह वर्तकश्चलितः। अथ गच्छतो गोपालस्य मस्तकावस्थितदधिभाण्डाद्वारं वारं तेन काकेन दधि खाद्यते। ततो यावदसौ दधिभाण्डं

भूमौ निधाय ऊर्ध्वमवलोकते। तावत्तेन काकवर्तकौ दृष्टौ। ततस्तेन खेटितः काकः पलायितः। वर्तकश्च मन्दगतिः प्राप्तो व्यापादितः। अतो ऽहं ब्रवीमि। न स्थातव्यं न गन्तव्यमित्यादि।

---

## XX. (III. 6.)

## DER WAGNER UND SEINE FRAU.

अस्ति यौवनश्रीनगरे मन्दमतिर्नाम रथकारः। स च स्वभार्यां बन्धकीं जानात्येव। किंतु जारेण सममेकस्थाने न हि स्वचक्षुषा पश्यति। ततो ऽसौ रथकारो ऽहमन्यग्रामं गच्छामीत्युक्त्वा चलितः स किंयद्दूरं गत्वा पुनरागत्य स्वगृहे खट्वातले पतित्वा निभृतं स्थितः। अथ मम भर्ता ग्रामान्तरं गत इत्युपजातविश्वासया तया स जारः संध्याकाल एवाहूतः। पश्चात्तेन समं तस्यां खट्वायां सा निर्भरं क्रीडन्ती खट्वातलस्थितेन सह भूता किंचिदङ्गस्पर्शात्स्वामिनं विज्ञाय विषण्णाभवत् ततो जारेणोक्तं। किमिति त्वं मया सहाद्य निर्भरं न रमसे। विस्मितेव प्रतिभासि। तयोक्तं। यो ऽसौ प्राणेश्वरः। सो ऽद्य ग्रामान्तरं गतः। तेन विना सकलजनपूर्णो ऽप्ययं ग्रामो ऽरण्यवन्मां प्रतिभाति। किं भावि तत्र परस्थाने। किं खादितवान् कथं वा प्रसुप्त इत्यस्मद्धृदयं विदीर्यते। जारेणोक्तं। किमेवंविधः स्नेहभूमिः स ते रथकारः। यः कलहकारी बन्धकीति ब्रूते। ततस्तयोक्तं। शृणु रे वर्वर। किं ब्रवीषि।

परुषाण्यपि चोक्ता या दृष्टा वा क्रोधचक्षुषा।
सुप्रसन्नमुखी भर्तुः सा नारी धर्मभागिनी ॥ १ ॥

अपरं च।

नगरस्थो वनस्थो वा पापो वा यदि वा शुचिः।
यासां स्त्रीणां प्रियो भर्ता तासां लोका महोदयाः ॥ २ ॥

अन्यच्च ।

भर्ता हि परमं नार्या भूषणं भूषणैर्विना ।
एषा विरहिता तेन शोभितापि न शोभते ॥ ३ ॥

त्वं च जारो मनोलौल्यात्पुष्पताम्बूलसदृशः कदाचित्सेव्यसे । स च स्वामी मां विक्रेतुं देवेभ्यो ब्राह्मणेभ्यो वा दातुं समर्थः । किं बहुना ।

तस्मिञ्जीवति जीवामि मृते तस्मिन्म्रिये पुनः ।
तन्मरणे ऽनुमरणमेष मे दृढनिश्चयः ॥ ४ ॥

यतः ।

तिस्रः कोट्यो ऽर्धकोटी च यानि लोमानि मानवे ।
तावत्कालं वसेत्स्वर्गे भर्तारं यानुगच्छति ॥ ५ ॥

अन्यच्च ।

व्यालग्राही यथा व्यालं बलादुद्धरते बिलात् ।
तद्वद्भर्तारमादाय स्वर्गलोके महीयते ॥ ६ ॥

अपरं च ।

चितौ परिष्वज्य विचेतनं पतिं
प्रिया हि या मुञ्चति देहमात्मनः ।
कृतातिपापं शतलक्षमप्यसौ
पतिं गृहीत्वा सुरलोकमाप्नुयात् ॥ ७ ॥

एतत्सर्वं श्रुत्वा स रथकारो धन्यो ऽहं यस्यैतादृशी भार्या सज्जनवत्सला प्रियवादिनी चेति मनसि निधाय तां खट्वां स्त्रीपुरुषसहितां मूर्ध्नि कृत्वा चिरं ननर्त । अतो ऽहं ब्रवीमि ।

प्रत्यक्षे ऽपि कृते दोषे मूर्खः सान्त्वेन तुष्यति ।
रथकारो निजां भार्यां सजारां शिरसाकरोत् ॥ ८ ॥

## XXI. (III. 7.)

## DER BLAUE SCHAKAL.

अस्ति शृगालः कश्चित् स स्वेच्छया नगरोपान्ते भ्राम्यन्नीलीभाण्डे निपतितः। पश्चात्तत उत्थातुमसमर्थः प्रातरात्मानं मृतवत्संदर्श्य स्थितः। अथ नीलीभाण्डस्वामिना तं शृगालमूर्ध्वचरणं निमीलितनयनं दन्तनिष्काशितं दृष्ट्वा मृत इति मत्वा ग्रामाद्दूरं नीत्वासौ धृतः। ततो ऽसौ वनं गत्वात्मानं नीलवर्णमवलोक्याचिन्तयत् अहमिदानीमुत्तमवर्णः। तत्किमात्मोत्कर्षं न साधयामि। इत्यालोच्य शृगालानाहूय तेनोक्तं। अहं भगवत्या वनदेवतया स्वहस्तेनारण्यराज्ये सर्वौषधिरसेनाभिषिक्तः। तत्पश्यत मम वर्णं। तदद्यारभ्यास्मदाज्ञयास्मिन्नरण्ये व्यवहारः कार्यः। शृगालाश्च विशिष्टवर्णं तमवलोक्य साष्टाङ्गपातं प्रणम्योचुः। यथाज्ञापयति देवः। ततो ऽनेनैव क्रमेण सर्वेषु पशुष्वरण्यवर्तिष्वाधिपत्यं तस्याभवत् तेन स्वज्ञातिभिरावृतेनाधिकं साधितं। ततस्तेन सिंहव्याघ्रादीनुत्तमपरिजनान्प्राप्य शृगालानवलोक्य लज्जमानेनावज्ञया दूरीकृताः स्वज्ञातयः। ततो विषण्णाञ्शृगालानवलोक्य वृद्धशृगालेन केनचित्प्रतिज्ञातं। मा विषीदत। एवं यावता नीतिज्ञेन वयं मर्मज्ञाः परिभूताः। तद्यथायं विनश्यति। तथा विधेयं। यतो ऽमी व्याघ्रादयो वर्णमात्रविप्रलब्धाः शृगालमज्ञात्वा राजानमिमं मन्यन्ते। तद्यथायं परिचीयते। तथा कुरुत। तत्र चैवमनुष्ठीयतां। यदा सर्वे संध्यासमये तत्संनिधाने यूयं महारावमेकदैव करिष्यथ। ततस्तं शब्दमाकर्ण्य स्वभावात्तेनापि शब्दः कर्तव्यः। यतः

यः स्वभावो हि यस्य स्यात्तस्यासौ दुरतिक्रमः।
श्वा यदि क्रियते भोगी स किं नाश्नात्युपानहं॥ १॥

ततः शब्दाच्छृगालो ऽयमित्यभिज्ञाय व्याघ्रेण हन्तव्यः। तथानुष्ठिते सति तद्वृत्तं। तथा चोक्तं।

छिद्रं मर्म च वीर्यं च सर्वं वेत्ति निजो रिपुः ।
दहत्यन्तर्गतश्चैव शुष्कवृक्षमिवानलः ॥ २ ॥

अतो ऽहं ब्रवीमि ।

आत्मपक्षं परित्यज्य परपक्षेषु यो रतः ।
स परैर्हन्यते मूढो नीलवर्णशृगालवत् ॥ ३ ॥

---

## XXII. (III. 8.)

### DER KRIEGER, DER SEINEN EIGENEN SOHN OPFERT.

अहं पुरा शूद्रकस्य राज्ञः क्रीडासरसि कर्पूरकेलिनाम्नो राजहंसस्य पुत्र्या कर्पूरमञ्जर्या सहानुरागवानभवं । तत्र वीरवरो नाम राजपुत्रः कुतश्चिद्देशादागत्य राजद्वारि प्रतीहारमुपगम्योवाच । अहं वर्तनार्थी राजपुत्रः । मां राजदर्शनं कारय । ततस्तेनासौ राजदर्शनं कारितो ब्रूते । देव । यदि मया सेवकेन प्रयोजनमस्ति । तदास्मद्वर्तनं क्रियतां । शूद्रक उवाच । किं ते वर्तनं । वीरवरो ऽवदत् प्रत्यहं टङ्कशतचतुष्टयं । राजाह । का ते सामग्री । स आह । द्वौ बाहू तृतीयश्च खड्गः । राजोवाच । नैतद्दातुं शक्यं । एतच्छ्रुत्वा वीरवरः प्रणम्य चलितः । अथ मन्त्रिभिरुक्तं । देव । दिनचतुष्टयस्य वर्तनं दत्त्वा ज्ञायतामस्य स्वरूपं । किमुपयुक्तो ऽयमेतावद्वर्तनं गृह्णात्यथानुपयुक्तो वा । ततस्तद्वचनादाहूय वीरवरस्य ताम्बूलं दत्त्वा टङ्कशतचतुष्टयं दत्तवान् तद्विनियोगश्च राज्ञा सुनिरूपितः । तत्रार्धं देवेभ्यो ब्राह्मणेभ्यो दत्तं तेन । अपरार्धं च दुःखितेभ्यः । तदवशिष्टं च भोजनव्ययेन व्ययितं । तथैव तत्सर्वं नित्यकृत्यं कृत्वा स राजद्वारमहर्निशं खड्गपाणिः सेवते । यदा च राजा स्वयं समादिशति । तदा स्वगृहमुपयाति । अथ चतुर्थ्यां रात्रौ निशीथे स राजा क्रन्दनध्वनिं शुश्राव । तं श्रुत्वा शूद्रको ब्रूते । कः को ऽत्र द्वारि । तेनोक्तं । देव । अहं

वीरवरः । राजोवाच । क्रन्दनानुसरणं क्रियतां । वीरवरो ऽपि यदाज्ञापयति देव इत्युक्त्वा चलितः । ततो राज्ञा चिन्तितं । नैतदुचितं कृतं । यदयं राजपुत्रः सूचीभेद्ये तमसि प्रेषितः । तदहमपि गत्वा किमेतदिति निरूपयामि । ततो राजापि खड्गमादाय तदनुसरणक्रमेण नगराद्बहिर्निर्जगाम । तत्र गत्वा च वीरवरेण काचित्स्त्री रुदती रूपयौवनसंपन्ना सर्वालंकारभूषिता विलोकिता पृष्टा च । का त्वं । किमर्थं रोदिषि । ततस्तयोक्तं । अहमेतस्य शूद्रकस्य राज्ञो लक्ष्मीश्चिरादेतस्य भुजच्छायायां महता सुखेन विश्रान्ता इदानीं चान्यत्र गमिष्यामि । वीरवरो ब्रूते । कथं पुनरिहावलम्बनं भगवत्याः संभवति । लक्ष्मीरुवाच । यदि त्वमात्मनः पुत्रं शक्तिवरं द्वात्रिंशल्लक्षणोपेतं भगवत्याः सर्वमङ्गलाया उपहारीकरोषि । तदाहं पुनरत्र सुचिरं सुखेन निवसामि । इत्युक्त्वा सादृश्याभवत् ततो वीरवरेण स्वगृहं गत्वा निद्रावधूतः पुत्रः प्रबोधितः पत्नी च । तौ निद्रां परित्यज्योत्थायोपविष्टौ । वीरवरश्च तयोः समक्षं तत्सर्वं लक्ष्मीवचनमुक्तवान् तच्छ्रुत्वा सानन्दं शक्तिवरो ब्रूते । धन्यो ऽहमेवंभूतः । स्वामिराज्यरक्षायां यस्योपयोगः । तत्को ऽधुना विलम्बनहेतुः । कदापि तावदेवंविधे कर्मण्येतस्य देहस्य विनियोगः श्लाघ्यः । यतः ।

धनानि जीवितं चैव परार्थे प्राज्ञ उत्सृजेत् ।
सन्निमित्ते वरं त्यागो विनाशे नियते सति ॥ १ ॥

शक्तिवरमातोवाच । यद्येतन्न कर्तव्यं । तत्केनान्येन कर्मणामुष्य महावर्तनस्य निष्क्रयो भविष्यति । इत्यालोच्य सर्वे सर्वमङ्गलायतनं गताः । तत्र सर्वमङ्गलां संपूज्य वीरवरो ब्रूते । देवि । प्रसीद । विजयतां शूद्रको राजा । गृह्यतामयमुपहारः । इत्युक्त्वा पुत्रस्य शिरश्चिच्छेद । अथ वीरवरश्चिन्तयामास । गृहीतराजवर्तनस्य तावन्निस्तारो भूतः । अधुनापुत्रस्य जीवनं विडम्बनं । इत्यालोच्यात्मनो ऽपि शिरश्छिन्नवान् ततः स्त्रियापि स्वामिनः पुत्रस्य च शोकार्त्तया तथैवानुष्ठितं । तत्सर्वं श्रुत्वा दृष्ट्वा च साश्चर्यं स राजा चिन्तयामास ।

जीवन्ति च म्रियन्ते च मद्विधाः क्षुद्रजन्तवः ।
अनेन सदृशो लोके न भूतो न भविष्यति ॥ २ ॥

तदेतत्परित्यक्तेन राज्येन न मे प्रयोजनमस्ति । इति शूद्रकेणापि स्वशिरश्छेत्तुमुद्यामितः खड्गः । अथ साक्षान्मूर्तिमत्या सर्वमङ्गलया राजा हस्ते धृत उक्तश्च । पुत्र । अलं साहसेन । इदानीं तव राज्यभङ्गो नास्ति । राजा साष्टाङ्गपातं प्रणम्योवाच । देवि । किं मे राज्येन जीवितेन वा प्रयोजनमस्ति । यदि ममानुकम्पा विद्यते । तदायं वीरवरः सपुत्रदारो जीवतु । अन्यथाहं यथाप्राप्तिं गतिं गच्छामि । भगवत्युवाच । अनेन सत्त्वोत्कर्षेण भृत्यवात्सल्येन च सर्वसंतुष्टास्मि । इदानीं गच्छ । विजयी भव । अयमपि सदारपुत्रो जीवतु राजपुत्रः । इत्युक्त्वा देव्यदृश्याभवत् राजा तां प्रणम्यालक्षितश्चलितः प्रासादगर्भं गत्वा सुप्तः । वीरवरो ऽपि सपुत्रदारः प्राप्तजीवनः स्वगृहं गतः । अथ पुनर्द्वारस्थो वीरवरो भूपालेन पृष्टः सन्नुवाच । देव । सा रुदती स्त्री मामालोक्यादृश्याभवत् न काप्यन्या विद्यते वार्ता । ततस्तद्वचनमाकर्ण्य संतुष्टो राजाचिन्तयत् कथमयं श्लाघ्यतां महासत्त्वः । यतः ।

प्रियं ब्रूयादकृपणः शूरः स्यादविकत्थनः ।
दाता नापात्रवर्षी च प्रगल्भः स्यादनिष्ठुरः ॥ ३ ॥

एतन्महापुरुषलक्षणमेतस्मिन्सर्वमस्ति । ततः स राजा प्रातः शिष्टसभां कृत्वा सर्ववृत्तान्तं प्रस्तुत्य प्रसादत्वेन तस्य कर्णाटराज्यं ददौ ।

---

## XXIII. (III. 9.)

### DER BARBIER, DER EINEN BETTLER ERSCHLÆGT.

अस्त्ययोध्यायां पुरि चूडामणिर्नाम क्षत्रियः । तेन धनार्थं महता क्लेशेन भगवांश्चन्द्रार्धचूडामणिराराधितः । ततः प्रक्षीणपापो भगवतो दर्शनं स्वप्ने

प्राप्तवान् अथ भगवतः प्रसादाद्धनेश्वरेणादिष्टं । त्वमद्य प्रातः क्षौरं कृत्वा लगुडहस्तः स्वगृहद्वारि सुनिभृतं स्थास्यसि । ततः समागतं भिक्षुं प्राङ्गणे यं द्रक्ष्यसि । तमेव निर्दयं लगुडेन हनिष्यसि । ततः स भिक्षुः सुवर्णपरिपूर्णकलशो भविष्यति । तेनैव त्वया स्वेच्छया यावज्जीवं सुखिना भवितव्यं । तदनन्तरं तथानुष्ठिते सति तद्भूतं । तच्च क्षौरकरणानीतनापितेनालोक्य चिन्तितं । अये निधिप्राप्तेरयमुपायः । तदहमप्येवं किं न करोमि । ततः प्रभृति स नापितः प्रतिदिनं तथाविधानो लगुडहस्तः प्रातः सुनिभृतं भिक्षोरागमनं प्रतीक्षते । एकदा तेन तथा प्राप्तो भिक्षुर्लगुडेन हत्वा व्यापादितः । तस्मादपराधात्सो ऽपि नापितो राजपुरुषैस्ताडितः पञ्चत्वमगमत् अतो ऽहं ब्रवीमि ।

पुण्याल्लब्धं यदेकेन तन्ममापि भविष्यति ।
हत्वा भिक्षुमतो मोहान्निध्यर्थी नापितो हतः ॥ १ ॥

---

## XXIV. XXV. (IV. 2. 3.)

## DIE BEIDEN GÆNSE UND DIE SCHILDKRŒTE.

## DIE DREI FISCHE.

अस्ति मगधदेशे फुल्लोत्पलाभिधानं सरः । तत्र चिराद्धंसौ निवसतः । तयोर्मित्रं कूर्मश्च प्रतिवसति । अथ धीवरैरागत्य तत्रोक्तं । यदत्रास्माभिरद्योषित्वा प्रातः कूर्ममत्स्यादयो व्यापादयितव्याः । तदाकर्ण्य कूर्मो हंसावाह । सुहृदौ । श्रुतो ऽयं धीवरालापः । अधुना मया किं विधातव्यं । हंसावाहतुः । ज्ञायतां पुनस्तावत् प्रातर्यदुचितं । तत्कर्तव्यं । कूर्मो ब्रूते । मा मैवं । यतो दृष्टव्यतिकरो ऽहमत्र । तथा चोक्तं ।

अनागतविधाता च प्रत्युत्पन्नमतिस्तथा ।
द्वावेतौ सुखमेधेते यद्भविष्यो विनश्यति ॥ १ ॥

तावाहतुः । कथमेतत् कूर्मः कथयति । पुरैतस्मिन्नेव सरस्येवंविधेष्वेव धी-

वरेषूपस्थितेषु मत्स्यत्रयेणालोचितं । तत्रैको ऽनागतविधातृनामा मत्स्यः । तेनोक्तं । अहं पुनर्जलाशयान्तरं तावद्गच्छामि । इत्युक्त्वा ह्रदान्तरं गतः । अपरेण च प्रत्युत्पन्नमतिनाम्ना मत्स्येनाभिहितं । भाविन्यर्थे प्रमाणाभावात्कुत्र किं समाधातव्यं । तदुत्पन्नकार्ये कार्यमनुष्ठेयं । ततो यद्भविष्येणोक्तं ।

यदभावि न तद्भावि भावि चेन्न तदन्यथा ।
इति चिन्ताविषघ्नो ऽयमगदः किं न पीयते ॥ २ ॥

अथ प्रातर्जालेन बद्धः सन्प्रत्युत्पन्नमतिर्मृतवदात्मानं प्रदर्श्य स्थितः । ततो जालादपसारितो यथाशक्त्युत्प्लुत्य गभीरनीरं प्रविष्टः । यद्भविष्यश्च धीवरैः प्राप्तो व्यापादितः । अतो ऽहं ब्रवीमि । अनागतविधातेत्यादि । तद्यथाहमन्यह्रदं प्राप्नोमि । तथा क्रियतां । हंसावाहतुः । स्थले गच्छतस्तव कुतः कुशलं । कूर्मो ब्रूते । यथाहमपि भवद्भ्यां सहाकाशवर्त्मना गच्छामि । स उपायो विधीयतां । हंसौ ब्रूतः । कथं संभवत्येष उपायः । सो ऽब्रवीत् युवाभ्यां चञ्च्वा काष्ठमेकं धर्तव्यं । अहं तस्मिन्काष्ठखण्डे मुखेनावलम्बनं कृत्वा भवतोः पक्षबलेन गमिष्यामि । हंसावाहतुः । संभवत्येष उपायः । किंतु एवमावाभ्यां नीयमानं त्वामवलोक्य लोकैः किंचिद्वक्तव्यमेव । तदाकार्य यदा त्वमुत्तरं ददासि । तदा त्वन्मरणं खलु । तत्सर्वथेहैव स्थीयतां । कूर्मो ब्रूते । किमहमप्राज्ञः । न किमपि मया वक्तव्यं । तथानुष्ठिते तथाविधं कूर्ममवलोक्य सर्वे गोरक्षकाः पश्चाद्धावन्ति वदन्ति च । अहो महदाश्चर्यं । पक्षिभ्यां कूर्मो समुह्यते । तत्र कश्चिद्वदति । यद्ययं कूर्मः पतति । तदात्रैव पक्त्वा भोक्तव्यः । कश्चिद्वदति । गृहं नेतव्यः । ततस्तत्परुषवचनं श्रुत्वा स कूर्मः क्रोधाद्विस्मृतपूर्वसंस्कारस्तान्प्राह । युष्माभिर्भस्म भक्षितव्यमिति वदन्नपतदेव । पतितस्तैः प्राप्तो व्यापादितः । अतो ऽहं ब्रवीमि ।

सुहृदां हितकामानां यो वाक्यं नाभिनन्दति ।
स कूर्म इव दुर्बुद्धिः काष्ठाद्भ्रष्टो विनश्यति ॥ ३ ॥

---

## XXVI. (IV 4.)

### DER KAUFMANN UND SEINE LISTIGE FRAU.

अस्ति विक्रमपुरे समुद्रदत्तनामा वणिग् तस्य रत्नप्रभा नाम वधूः केनापि स्वसेवकेन सह सदा रमते । अथैकदा सा तस्य सेवकस्य मुखे चुम्बनं ददती समुद्रदत्तेनावलोकिता । ततो बन्धकी सा सत्वरं भर्तुः समीपमुपगम्याह । नाथ । एतस्य सेवकस्य तावन्महती निर्वृतिः । यतो युष्मदर्थं नीयमानं कर्पूरमश्नाति । कर्पूरगन्धो मयास्य मुखे प्रत्यक्षेणाघ्रातः । तच्छ्रुत्वा सेवकेनापि प्रकुप्योक्तं । यस्य गृहस्यैतादृशी चेष्टा । तत्र सेवकेन कथं स्थातव्यं । यत्र प्रतिक्षणं गृहिणी सेवकस्य मुखं जिघ्रति । ततोऽसावुत्थाय चलितः सन्साधुना प्रबोध्यानीय यत्नाद्धृतः । अतोऽहं ब्रवीमि ।

उत्पन्नामापदं यस्तु समाधत्ते स बुद्धिमान् ।
वणिजो भार्यया जारः प्रत्यक्षे निह्नुतो यथा ॥ १ ॥

---

## XXVII. (IV. 5.)

### DIE KRANICHE UND DIE ICHNEUMONE.

अस्त्युत्तरापथे गृध्रकूटो नाम गिरिः । तत्रैरावतीतीरे न्यग्रोधे वका निवसन्ति । तस्यैव च वृक्षस्याधस्ताद्विवरे सर्पस्तिष्ठति । स च तेषां बालापत्यानि खादति । ततः शोकार्त्तानां वकानां प्रलापं श्रुत्वा केनचिद्वृद्धवकेनोक्तं । एवं कुरुत यूयं । मत्स्यानानीय नकुलविवरादारभ्य सर्पविवरं यावत्पङ्क्तिक्रमेणैकैकशो मत्स्या-न्धत्त । ततस्तदाहारलुब्धैर्नकुलैरागत्य सर्पो द्रष्टव्यः स्वभावद्वेषाद्व्यापादयि-तव्यश्च । तथानुष्ठिते तद्वृत्तं । अथ तैर्नकुलैस्तत्र वृक्षे वकशावकारावः श्रुतः । पश्चात्तैर्वृक्षमारुह्य शावकाः सर्व एव व्यापादिताः । अत आवां ब्रूवः ।

उपायं चिन्तयन्प्राज्ञो ह्यपायमपि चिन्तयेत् ।
पश्यतो वकमूर्खस्य नकुलैर्भक्षिताः प्रजाः ॥ १ ॥

---

## XXVIII. (IV. 6.)

### DER EINSIEDLER UND DIE MAUS.

अस्ति गौतमस्य महर्षेस्तपोवने महातपा नाम मुनिः । तेनाश्रमसंनिधाने मूषिकशावकः श्येनमुखाद्भ्रष्टो दृष्टः । पश्चाद्दयालुना मुनिना नीवारकणैः स पालितः । तं च मूषिकं खादितुं यत्नादन्विष्यन्बिडालो मुनिना दृष्टः । ततस्तेन तपःप्रभावान्मूषिको बिडालः कृतः । स च कुक्कुराद्बिभेति । ततोऽसौ बिडालः कुक्कुरः कृतः । कुक्कुरस्य च व्याघ्राद्भयं महत् तदनन्तरं स कुक्कुरो व्याघ्रः कृतः । अथ व्याघ्रमपि तं मुनिर्मूषिकनिर्विशेषेण पश्यति । तं च मुनिं दृष्ट्वा सर्वे वदन्ति । अनेन मुनिना मूषिकोऽयं व्याघ्रतां नीतः । एतच्छ्रुत्वा स व्याघ्रः सव्यथोऽचिन्तयत् यावदनेन मुनिना जीवितव्यं । तावदिदं स्वरूपाख्यानं ममाकीर्तिकरं न पलायिष्यते । इत्यालोच्य मुनिं हन्तुमुद्यतः । ततो मुनिना तज्ज्ञात्वा पुनर्मूषिको भव इत्युक्त्वा मूषिक एव कृतः । अतोऽहं ब्रवीमि ।

नीचः श्लाघ्यपदं प्राप्य स्वामिनं हन्तुमिच्छति ।<br>
मूषिको व्याघ्रतां प्राप्य मुनिं हन्तुं गतो यथा ॥ १ ॥

---

## XXIX. (IV. 7.)

### DER KRANICH UND DER KREBS.

अस्ति मालवविषये पद्मगर्भाभिधानं सरः । तत्रैको वृद्धबकः सामर्थ्यहीन उद्विग्नमिवात्मानं दर्शयित्वा स्थितः । स च केनचित्कुलीरेण दूरादेव दृष्टः पृष्टश्च । किमिति भवानाहारपरित्यागेन तिष्ठति । बकेनोक्तं । मत्स्या मम जीवनहेतवः । ते चावश्यमत्र कैवर्तैर्व्यापादयितव्याः । इति नगरोपान्ते पर्यालोचना मयाकर्णिता । अतो वर्तनाभावादेवास्मन्मरणमुपस्थितं । इति

ज्ञात्वाहमाहारे ऽपि मन्दादरः कृतः। तच्छ्रुत्वा सर्वैर्मत्स्यैरालोचितं। इह समये तावदुपकारक एवास्माकमिति लक्ष्यते। तदयमेव यथाकर्तव्यं पृच्छ्यतां। तथा चोक्तं।

उपकर्त्रारिणा संधिर्न मित्रेणापकारिणा।
उपकारापकारौ हि लक्ष्यं लक्षणमेतयोः॥ १॥

मत्स्या ऊचुः। को ऽत्र रक्षणोपायः। वको ब्रूते। अस्ति रक्षाहेतुर्जलाशयान्तरगमनं। तत्राहं युष्मान्नयामि। मत्स्यैरपि भयादुक्तं। एवमस्तु। ततो ऽसौ दुष्टवको मत्स्यांस्तानेकैकशो नीत्वाभक्षयत् अनन्तरं कुलीरः कश्चित्तमुवाच। भो वक। मामपि तत्र नय। ततो वको ऽप्यपूर्वकुलीरमांसार्थी सादरं तं नीतवान् अथ वकेन नीतः स्थले स धृतः। कुलीरो ऽपि मत्स्यकङ्कालाकीर्णं भूतलमवलोक्याचिन्तयत् हा हतो ऽस्मि मन्दभाग्यः। भवतु। इदानीं समयोचितं व्यवहरामि। इत्यालोच्य यदासौ ग्रीवां प्रसार्य तं हन्तुमुद्यतः। तदैवासौ कुलीरः करेण तस्य वकस्य ग्रीवां चिच्छेद। अतो ऽहं ब्रवीमि।

भक्षयित्वा बहून्मत्स्यानुत्तमाधममध्यमान्।
अतिलौल्याद्वकः पश्चान्मृतः कर्कटसंग्रहात्॥ २॥

---

## XXX. (IV. 8.)

## DER BRAHMANE UND SEINE SCHÜSSEL.

अस्ति देवीकोट्टनगरे देवशर्मा नाम ब्राह्मणः। तेन विषुवसमये शक्तुभृतः शरावः एकः प्राप्तः। ततस्तमादायासौ भाण्डपूर्णकुम्भकारमण्डपिकैकदेशे शय्यानिक्षिप्तदेहः सन्रात्रावचिन्तयत् यद्यहमिमं शक्तुशरावं विक्रीय दश कपर्दकान्प्राप्नोमि। तदा तैरिह समये शरावांस्ततो घटादीनुपक्रीय विक्रीयानेकधा वृद्धैर्धनैः पुनः पुनः पूगवस्त्रादिकमुपक्रीय लक्षसंख्यानि धनान्युत्पाद्य

विवाहचतुष्टयं करोमि। ततस्तासु पत्नीषु याधिकरूपवती। तस्यामधिकानुरागं करोमि। अनन्तरं जातेर्ष्यास्तत्सपत्न्यो यदा द्वन्द्वं कुर्वन्ति। तदा कोपाकुलो ऽहं ताः पत्नीर्लगुडेनेत्थं ताडयामि। इत्यभिधायोत्थाय तेन लगुडः क्षिप्तः। अतः शक्तुशरावश्चूर्णितो भाण्डानि च बहूनि भग्नानि। ततो भाण्डभङ्गशब्देनागतकुम्भकारेण तद्दृष्ट्वा स ब्राह्मणस्तिरस्कृतो मण्डपिकागर्भाद्बहिष्कृतः। अतो ऽहं ब्रवीमि।

अनागतवतीं चिन्तां कृत्वा यस्तु प्रहृष्यति।
स तिरस्कारमाप्नोति भग्नभाण्डो द्विजो यथा॥ १॥

---

## XXXI. (IV. 9.)

### DIE BEIDEN DAITJA'S.

पुरा दैत्यौ महोदरौ सुन्दोपसुन्दनामानौ महता कायक्लेशेन त्रैलोक्यराज्यकामनया चिराच्चन्द्रशेखरमाराधितवन्तौ। ततस्तयोर्भगवान्परितुष्टः सन्वरं वरयतमित्युवाच। अनन्तरं तयोर्हृदिस्थयोः समादिष्टया सरस्वत्या तावन्यद्वक्तुकामावन्यदभिहितवन्तौ। यद्यावयोर्भगवान्परितुष्टः। तदा स्वप्रियां पार्वतीं परमेश्वरो ददातु। अथ भगवता क्रुद्धेन वरप्रदानस्यावश्यकतया विचारमूढयोः पार्वती प्रदत्ता। ततस्तस्या रूपलावण्यलुब्धाभ्यां जगद्घातिभ्यां मनसोत्सुकाभ्यां पापतिमिराभ्यां ममेत्यन्योऽन्यकलहाभ्यां प्रमाणपुरुषः कश्चित्पृच्छ्यतामिति मतौ कृतायां स एव भर्ता वृद्धद्विजरूपी समागत्य तत्रोपस्थितः। अनन्तरमावाभ्यामियं स्वबललब्धा कस्येयमावयोर्भवतीति ब्राह्मणमपृच्छताम्। ब्राह्मणो ब्रूते।

वर्णश्रेष्ठो द्विजः पूज्यः क्षत्रियो बलवानपि।
धनधान्याधिको वैश्यः शूद्रस्तु द्विजसेवया॥ १॥

तद्युवाभ्यां तत्त्वधर्मो ऽनुगन्तव्यः । युद्ध एव युवयोर्नियमः । इत्यभिहिते सति साधूक्तमनेनेत्युक्त्वान्योऽन्यतुल्यवीर्यौ समकाले ऽन्योऽन्यघातेन विनाशमुपगतौ । अतो ऽहं ब्रवीमि ।

संधिमिच्छेत्समेनापि संदिग्धो विजयो युधि ।
न हि संशयितुं कुर्यादित्युवाच बृहस्पतिः ॥ २ ॥
युद्धे विनाशो भवति कदाचिदुभयोरपि ।
सुन्दोपसुन्दावन्योऽन्यं समवीर्यौ हतौ न किं ॥ ३ ॥

---

## XXXII. (IV. 10.)

### DER BRAHMANE UND SEINE ZIEGE.

अस्ति गौतमारण्ये प्रस्तुतयज्ञः कश्चिद्ब्राह्मणः । स च यज्ञार्थं ग्रामान्तराच्छागमुपक्रीय स्कन्धे कृत्वा गच्छन्धूर्तत्रयेणावलोकितः । ततस्ते धूर्ता यद्येष च्छागः केनाप्युपायेन प्राप्य खाद्यते तदा मतिप्रकर्षो भवतीत्यालोच्य प्रान्तरे वृक्षत्रयतले ब्राह्मणस्य वर्त्मन्युपविश्य स्थिताः । तत्रैकेन धूर्तेन स ब्राह्मणो गच्छन्नभिहितः । भो ब्राह्मण । किमिति त्वया कुक्कुरः स्कन्धेनोह्यते । ब्राह्मणो ब्रूते । नायं श्वा। यज्ञच्छागो ऽयं । अनन्तरं पुनर्द्वितीयेन क्रोशमात्रावस्थितेन तदेवोक्तं । तदाकर्ण्य ब्राह्मणस्तं छागं भूमौ निधाय मुहुर्मुहुर्निरीक्ष्य पुनः स्कन्धे कृत्वा दोलायमानमतिश्चलितः । तदनन्तरं पुनर्गच्छन्स ब्राह्मणस्तृतीयेन धूर्तेनोक्तः । भो ब्राह्मण । किमिति कुक्कुरं स्कन्धेन भवान्वहति। तदाकर्ण्य निश्चितमेवायं कुक्कुर इति मत्वा छागं त्यक्त्वा स्नात्वा स्वगृहं ययौ। स च्छागो तैर्धूर्तैर्नीत्वा भक्षितः । अतो ऽहं ब्रवीमि ।

आत्मौपम्येन यो वेत्ति दुर्जनं सत्यवादिनं ।
स तथा वञ्च्यते धूर्तैर्ब्राह्मणश्छागतो यथा ॥ १ ॥

---

## XXXIII. (IV. 11.)

## DER LŒWE, DIE KRÆHE, DER TIGER, DER SCHAKAL UND DAS KAMEEL.

अस्ति कस्मिंश्चिद्वनोद्देशे मदोत्कटो नाम सिंहः । तस्यानुचरास्त्रयः काको व्याघ्रः शृगालश्च । अथ तैर्भ्रमद्भिः सार्थाद्भ्रष्ट उष्ट्रो दृष्टः पृष्टश्च । कुतो भवानागतः । स चात्मवृत्तान्तमकथयत् तैश्च नीत्वा सिंहे समर्पितः । तेन चाभयवाचं दत्त्वा चित्रकर्ण इति नाम कृत्वा स्थापितः । अथ कदाचित्सिंहस्य शरीरवैकल्याद्भूरिवृष्टिकारणाच्चाहारमलभमानास्ते व्याकुला बभूवुः । ततः काकव्याघ्रगोमायुभिरालोचितं । चित्रकर्णमेव यथा स्वामी व्यापादयति । तथानुष्ठीयतां । किमनेन कण्टकभुजास्माकं । व्याघ्रो ब्रूते । स्वामिनाभयवाचं दत्त्वा स्वीकृतः । तत्कथमेवं संभवति । वायसो वदति । इह समये परिक्षीणः स्वामी पापमपि करिष्यति । यतः ।

त्यजेत्क्षुधार्त्ता महिलापि पुत्रं खादेत्क्षुधार्त्ता भुजगी स्वमण्डं ।
बुभुक्षितः किं न करोति पापं क्षीणा नरा निष्करुणा भवन्ति ॥ १ ॥

अन्यच्च ।

मत्तः प्रमत्तश्चोन्मत्तो श्रान्तः क्रुद्धो बुभुक्षितः ।
लुब्धो भीरुस्त्वरायुक्तः कामुकश्च न धर्मविद् ॥ २ ॥

इति निश्चित्य सर्वे सिंहान्तिकं जग्मुः । सिंहेनोक्तं । आहारार्थं प्राप्तं किंचित् काको ब्रूते । देव । यत्नादपि न किंचित्प्राप्तं । सिंहो ऽवदत् को ऽधुना जीवनोपायः । काको वदति । नाथ । स्वाधीनाहारपरित्यागेन सर्वनाशो ऽयमुपस्थितः । सिंहो ऽब्रवीत् अत्राहारः कः स्वाधीनः । काकः कर्णे कथयति । चित्रकर्ण इति । सिंहो भूमिं स्पृष्ट्वा कर्णौ स्पृशति ब्रूते च । मयैतस्य प्रागभयवाक्प्रदत्ता । तत्कथमिदानीमेवं संभवति । तथा चोक्तं ।

न गोप्रदानं न महीप्रदानं न चान्नदानं न तथाम्बुदानं ।
यथा वदन्तीह महाप्रदानं सर्वप्रदानेष्वभयप्रदानं ॥ ३ ॥

अन्यच्च ।

सर्वकामसमृद्धस्य अश्वमेधस्य यत्फलं ।
तत्फलं समवाप्नोति रक्षिते शरणागते ॥ ४ ॥

काको ब्रूते । नासौ स्वामिना व्यापादयितव्यः । किंतु वयमेव तथा कुर्मः । यथासौ स्वयमेव देहदानमङ्गीकरोति । तच्छ्रुत्वा सिंहस्तूष्णीं स्थितः । ततोऽसौ लब्धावकाशः स्फुटं कृत्वा सर्वान्गृहीत्वा सिंहसमीपं गतः । अथ काकेनोक्तं । देव । यत्नादप्याहारो न प्राप्तः । अनेकोपवासक्लिष्टः स्वामी तत्सर्वथा मदीयमांसमुपभुज्यतां । यतः ।

स्वामिमूला भवन्त्येव सर्वाः प्रकृतयः खलु ।
समूलेषु हि वृक्षेषु प्रयत्नः सफलो नृणां ॥ ५ ॥

सिंहेनोक्तं । भद्र । वरं प्राणपरित्यागः । न पुनरीदृशी वृत्तिः । ततो जम्बुकेनापि तथोक्तं । ततः सिंहेनोक्तं । आस्तां । मा मैवं । व्याघ्र उवाच । मद्देहेन जीवतु स्वामी । सिंहेनोक्तं । न कदाचिदेवमुचितं । अथ चित्रकर्णोऽपि जातप्रत्ययस्तथैवात्मदेहदानमाह । ततस्तद्वदन्नेवासौ व्याघ्रेण कुक्षिं विदार्य व्यापादितः सर्वैर्भक्षितश्च । अतोऽहं ब्रवीमि ।

मतिर्दोलायते नूनं सतामपि खलोक्तिभिः ।
ताभिर्विश्वासितो यः स म्रियते चित्रकर्णवत् ॥ ६ ॥

---

## XXXIV. (IV. 13.)

## DER BRAHMANE UND DAS ICHNEUMON.

अस्त्युज्जयिन्यां माठरो नाम ब्राह्मणः । तस्य ब्राह्मणी बालापत्यस्य रक्षार्थं ब्राह्मणमवस्थाप्य स्नातुं गता । अथ ब्राह्मणस्य कृते राज्ञः श्राद्धं दातुमाह्वा-

नमागतं। तच्छ्रुत्वा ब्राह्मणः सहजदारिद्र्याद्चिन्तयत् यदि सत्वरं न गच्छामि। तदान्यः कश्चिच्छ्राद्धं ग्रहीष्यति।

आदानस्य प्रदानस्य कर्तव्यस्य च कर्मणः।
क्षिप्रमक्रियमाणस्य कालः पिबति तद्रसं ॥ १ ॥

किंतु बालकस्यात्र रक्षको नास्ति। तत्किं करोमि। यातु। चिरकालपालितमिमं पुत्रनिर्विशेषं नकुलं बालकरक्षार्थमवस्थाप्य गच्छामि। तथा कृत्वा स तत्र गतः। ततस्तेन नकुलेन बालकसमीपमागच्छता कृष्णसर्पो दृष्टो व्यापादितश्च। अथासौ नकुलो ब्राह्मणमायान्तमवलोक्य रक्तविलिप्तमुखपादः सत्वरमुपागम्य तस्य चरणयोर्लुलोठ। ततो ऽसौ ब्राह्मणस्तं तथाविधं दृष्ट्वा मम पुत्रो ऽनेन भक्षित इत्यवधार्य व्यापादितवान् अनन्तरं यावदसावुपसृत्य पश्यति ब्राह्मणः। तावद्बालकः सुस्थः सर्पश्च व्यापादितस्तिष्ठति। ततस्तमुपकारकमेव नकुलं निरूप्य विभावितकृत्यः संतप्तचेताः स परं विषादमगमत् अतो ऽहं ब्रवीमि।

यो ऽर्थतत्त्वमविज्ञाय क्रोधस्यैव वशं गतः।
स तथा तप्यते मूढो ब्राह्मणो नकुलाद्यथा ॥ २ ॥

---

## 39 DISTICHA AUS AMARŪ-ÇATAKA.

अलसवलितैः प्रेमार्द्रार्द्रैर्मुहुर्मुकुलीकृतैः
क्षणमभिमुखैर्लज्जालोलैर्निमेषपराङ्मुखैः।
हृदयनिहितं भावाकूतं वमद्भिरिवेक्षणैः
कथय सुकृती को ऽयं मुग्धे त्वयाद्य विलोक्यते ॥ ४ ॥

दृष्टो ऽस्याः प्रणयस्त्वयैव भवता चेयं चिरं लालिता
दैवादद्य किल त्वमेव कृतवानस्या नवं विप्रियं ।
मन्युर्दुःसह एष यात्युपशमं नो शान्तवादैः स्फुटं
हे निस्त्रिंश विमुक्तकण्ठकरुणं तावत्सखी रोदितु ॥ ५ ॥

---

लिखन्नास्ते भूमिं बहिरवनतः प्राणदयितो
निराहाराः सख्यः सततरुदितोच्छूननयनाः ।
परित्यक्तं सर्वं हसितपठितं पञ्जरशुकै-
स्तवावस्था चेयं विसृज कठिने मानमधुना ॥ ६ ॥

---

प्रहरविरतौ मध्ये वाह्नस्ततो ऽपि परे ऽथवा
किमुत सकले याते वाह्नि प्रिय त्वमिहैष्यसि ।
इति दिनशतप्राप्यं देशं प्रियस्य यियासतो
हरति गमनं बालालापैः सबाष्पगलज्जलैः ॥ ९ ॥

---

याताः किं न मिलन्ति सुन्दरि पुनश्चिन्ता त्वया मत्कृते
नो कार्या नितरां कृशासि कथयत्येवं सबाष्पे मयि ।
लज्जामन्थरतारकेण निपतद्धाराश्रुणा चक्षुषा
दृष्ट्वा मां हसितेन भाविमरणोत्साहस्तया सूचितः ॥ १० ॥

---

घोरं वारिधरस्य वारि किरतः श्रुत्वा निशीथे ध्वनिं
दीर्घोच्छ्वाससमुदश्रुणा विरहिणीं बालां चिरं ध्यायता ।
अधन्येन विमुक्तकण्ठमखिलां रात्रिं तथा क्रन्दितं
ग्रामीणैर्व्रजतो जनस्य वसतिर्ग्रामे निषिद्धा यथा ॥ ११ ॥

---

कथमपि सखि क्रीडाकोपाद्व्रजेति मयोदिते
कठिनहृदयस्त्यक्त्वा शय्यां बलाद्गत एव सः ।
इति सरभसं ध्वस्तप्रेम्णि व्यपेतघृणे जने
पुनरपि हतव्रीडं चेतः प्रयाति करोमि किं ॥ १२ ॥

---

दंपत्योर्निशि जल्पतोर्गृहशुकेनाकर्णितं यद्वच-
स्तत्प्रातर्गुरुसंनिधौ निगदतस्तस्योपहारं वधूः ।
कर्णालंकृतिपद्मरागशकलं विन्यस्य चञ्चूपुटे
व्रीडार्त्ता प्रकरोति दालिमफलव्याजेन वाग्बन्धनं ॥ १३ ॥

---

एकत्रासनसंस्थितिः परिहृता प्रत्युद्गमाद्दूरत-
स्ताम्बूलानयनच्छलेन रभसाश्लेषो ऽपि संविघ्नितः ।
आलापो ऽपि न विश्रुतः परिजनं व्यापारयत्यान्तिके
कान्तं प्रत्युपचारतश्चतुरया कोपः कृतार्थीकृतः ॥ १५ ॥

---

दृष्ट्वैकासनसंस्थिते प्रियतमे पश्चादुपेत्यादरा-
देकस्या नयने पिधाय विहितक्रीडानुबन्धच्छलः ।
ईषद्वक्रिमकंधरः सपुलकः प्रेमोल्लसन्मानसा-
मन्तर्हासलसत्कपोलफलकां धूर्तो ऽपरां चुम्बति ॥ १६ ॥

---

चरणपतनप्रत्याख्यानात्पराङ्मुखे
निभृतकितवाचारेत्युक्त्वा रुषा परुषीकृते ।
व्रजति रमणे निःश्वस्योच्चैः स्तनस्थितहस्तया
नयनसलिलच्छन्ना दृष्टिः सखीषु निवेशिता ॥ १७ ॥

---

एकस्मिञ्शयने पराग्मुखतया वीतोत्तरं ताम्यतो-
रन्योऽन्यस्य हृदि स्थितेऽप्यनुनये संरक्षतोर्गौरवं ।
दंपत्योः शनकैरपाङ्गवलनान्मिश्रीभवच्चक्षुषो-
र्भग्नो मानकलिः सहासरभसं व्यासक्तकण्ठग्रहं ॥ १९ ॥

---

पश्यामो मयि किं प्रपद्यत इति स्थैर्यं मयालम्बितं
किं मामालपतीत्ययं खलु शठः कोपस्तयाप्याश्रितः ।
इत्यन्योऽन्यविलक्षदृष्टिचतुरे तस्मिन्नवस्थान्तरे
सव्याजं हसितं मया धृतिहरो बाष्पस्तु मुक्तस्तया ॥ २० ॥

---

भ्रूभङ्गे रचितेऽपि दृष्टिरधिकं सोत्कण्ठमुद्वीक्षते
कार्कश्यं गमितेऽपि चेतसि तनू रोमाञ्चमालम्बते ।
रुद्धायामपि वाचि सस्मितमिदं दग्धाननं जायते
दृष्टे निर्वहणं भविष्यति कथं मानस्य तस्मिञ्जने ॥ २४ ॥

---

कान्ते कत्यपि वासराणि गमय त्वं मीलयित्वा दृशौ
स्वस्ति स्वस्ति निमीलयामि नयने यावन्न शून्या दिशः ।
आयाता वयमागमिष्यति सुहृद्वर्गस्य भाग्योदयैः
संदेशो वद कस्तवाभिलषितस्तीर्थेषु तोयाञ्जलिः ॥ २५ ॥

---

सा पत्युः प्रथमापराधसमये सख्योपदेशं विना
नो जानाति सविभ्रमाङ्गवलनावक्रोक्तिसंसूचनं ।
स्वच्छैरच्छकपोलमूलगलितैः पर्यस्तनेत्रोत्पला
बाला केवलमेव रोदिति लुठल्लोलालकैरश्रुभिः ॥ २६ ॥

---

भवतु विदितं भाव्यालापैरलं खलु गम्यतां
तनुरपि न ते दोषो ऽस्माकं विधिस्तु पराङ्मुखः ।
तव यदि तथाभूतं प्रेम प्रपन्नमिमां दशां
प्रकृतितरले का नः पीडा गते हतजीविते ॥ २७ ॥

---

प्रस्थानं वलयैः कृतं प्रियसखैरस्रैरजस्रं गतं
धृत्या न क्षणमासितं व्यवसितं चित्तेन गन्तुं पुरः ।
यातुं निश्चितचेतसि प्रियतमे सर्वे समं प्रस्थिता
गन्तव्ये सति जीवितप्रिय सुहृत्सार्थः किमु त्यज्यते ॥ ३१ ॥

---

संदष्टाधरपल्लवा सचकितं हस्ताग्रमाधुन्वती
मा मा मुञ्च शठेति कोपवचनैरानर्तितभ्रूलता ।
शीत्काराञ्चितलोचना सरभसं यैश्चुम्बिता मानिनी
प्राप्तं तैरमृतं मुधैव मथितो मूढैः सुरैः सागरः ॥ ३२ ॥

---

सुतनु जहिहि कोपं पश्य पादानतं मां
न खलु तव कदाचित्कोप एवंविधो ऽभूत् ।
इति निगदति नाथे तिर्यगामीलिताक्ष्या
नयनजलमनल्पं मुक्तमुक्तं न किंचित् ॥ ३५ ॥

---

गते प्रेमाबन्धे प्रणयबहुमाने विगलिते
निवृत्ते सद्भावे जन इव जने गच्छति पुरः ।
तदुत्प्रेक्ष्योत्प्रेक्ष्य प्रियसखि गतांस्तांश्च दिवसा-
न्न जाने को हेतुर्दलति शतधा यन्न हृदयं ॥ ३८ ॥

---

दूरादुत्सुकमागते विवलितं संभाषिणि स्फारितं
संश्लिष्यत्यरुणं गृहीतवसने किंचिन्नतभ्रूलतं ।
मानिन्याश्चरणानतिव्यतिकरे बाष्पाम्बुपूर्णेक्षणं
चक्षुर्जातमहो प्रपञ्चचतुरं जातागसि प्रेयसि ॥ ४४ ॥

---

अङ्गानामतितानवं कथमिदं कम्पश्च कस्मात्कुतो
मुग्धे पाण्डुकपोलमाननमिति प्राणेश्वरे पृच्छति ।
तन्व्या सर्वमिदं स्वभावजमिति व्याहृत्य पक्ष्मान्तर-
व्यापी बाष्पभरस्तया चलितया निःश्वस्य मुक्तो ऽन्यतः ॥ ४५ ॥

---

बाले नाथ विमुञ्च मानिनि रुषं रोषान्मया किं कृतं
खेदो ऽस्मासु न मे ऽपराध्यति भवान्सर्वे ऽपराधा मयि ।
तत्किं रोदिषि गद्गदेन वचसा कस्याग्रतो रुद्यते
नन्वेतन्मम का तवास्मि दयिता नास्मीत्यतो रुद्यते ॥ ५३ ॥

---

वरमसौ दिवसो न पुनर्निशा ननु निशैव वरं न पुनर्दिवा ।
उभयमेतदुपैत्वथवा क्षयं प्रियजनेन न यत्र समागमः ॥ ६० ॥

---

लग्ना नांशुकपल्लवे भुजलता न द्वारदेशे ऽर्पिता
नो वा पादतले तया निपतितं तिष्ठेति नोक्तं वचः ।
काले केवलमम्बुदातिमलिने गन्तुं प्रवृत्तः शठ-
स्तन्व्या बाष्पजलौघकल्पितनदीपूरेण बद्धः प्रियः ॥ ६२ ॥

---

न जाने संमुखायाते प्रियाणि वदति प्रिये ।
सर्वाण्यङ्गानि मे यान्ति श्रोत्रतां किमु नेत्रतां ॥ ६३ ॥

---

विरहविषमः कामो वामस्तनुं कुरुते तनुं
दिवसगणनादक्षश्चासौ व्यपेतघृणो यमः ।
त्वमपि वशगो मानव्याधेर्विचिन्तय नाथ हे
किसलयमृदुर्जीवेदेवं कथं प्रमदाजनः ॥ ६४ ॥

---

मुग्धे मुग्धतयैव नेतुमखिलः कालः किमारभ्यते
मानं धत्स्व धृतिं बधान ऋजुतां दूरे कुरु प्रेयसि ।
सख्यैवं प्रतिबोधिता प्रतिवचस्तामाह भीतानना
नीचैः शंस हृदि स्थितो ननु स मे प्राणेश्वरः श्रोष्यति ॥ ६७ ॥

---

पीतो यतः प्रभृति कामपिपासितेन
तस्या मयाधररसः प्रचुरः प्रियायाः ।
तृष्णा ततः प्रभृति मे द्विगुणत्वमेति
लावण्यमस्ति बहु तत्र किमत्र चित्रं ॥ ६८ ॥

---

क्व प्रस्थितासि करभोरु घने निशीथे
प्राणाधिको वसति यत्र जनः प्रियो मे ।
एकाकिनी वद कथं न बिभेषि बाले
नन्वस्ति पुङ्खितशरो मदनः सहायः ॥ ६९ ॥

---

स्फुटतु हृदयं कामः कामं करोतु तनुं तनुं
न सखि चटुलप्रेम्णा कार्यं पुनर्दयितेन मे ।
इति सरभसं मानोद्रेकादुदीर्य वचस्तया
रमणपदवी सारंगाक्ष्या सशङ्कमुदीक्षिता ॥ ७१ ॥

---

दृष्टः कातरनेत्रया चिरतरं बद्धाञ्जलिं याचितः
पश्चादंशुकपल्लवेन विधृतो निर्व्याजमालिङ्गितः ।
इत्याक्षिप्य यदा समस्तमघृणो गन्तुं प्रवृत्तः शठः
पूर्वं प्राणपरिग्रहो दयितया मुक्तस्ततो वल्लभः ॥ ७९ ॥

---

स्वं दृष्ट्वा करजक्षतं मधुमदक्षीबाविचार्येर्ष्यया
गच्छन्ती क्व नु गच्छसीति विधृता बाला पटान्ते मया ।
प्रत्यावृत्तमुखी सबाष्पनयना मां मुञ्च मुञ्चेति सा
कोपात्प्रस्फुरिताधरा यदवदत्तत्केन विस्मर्यते ॥ ८५ ॥

---

कपोले पत्त्राली करतलनिरोधेन मृदिता
निपीतो निःश्वासैरयममृतहृद्यो ऽधररसः ।
मुहुः कण्ठे लग्नस्तरलयति बाष्पः स्तनतटं
प्रियो मन्युर्जातस्तव निरनुरोधे न तु वयं ॥ ८७ ॥

---

देशैरन्तरिता शतैश्च सरितामुर्वीभृतां काननै-
र्यत्नेनापि न याति लोचनपथं कान्तेति जानन्नपि ।
उद्ग्रीवश्चरणार्धरुद्धवसुधः कृत्वाश्रुपूर्णो दृशौ
तामाशां पथिकस्तथापि किमपि ध्यायन्मुहुः क्षीयते ॥ ९३ ॥

---

कोपस्त्वया हृदि कृतो यदि पङ्कजाक्षि
सो ऽस्तु प्रियस्तव किमत्र विधेयमन्यद् ।
आश्लेषमर्पय मदर्पितपूर्वमुच्चै-
रुच्चैः समर्पय मदर्पितचुम्बनं च ॥ ९४ ॥

---

चपलहृदये किं स्वातन्त्र्यात्तथा गृहमागत-
    श्चरणपतितः प्रेमार्द्रार्द्रः प्रियः समुपेक्षितः ।
तदिदमधुना यावज्जीवं निरस्तसुखोदया
    रुदितशरणा दुर्जातीनां सहस्व रुषां फलं ॥ ९९ ॥

---

हारो ऽयं हरिणाक्षीणां लुठति स्तनमण्डले ।
मुक्तानामप्यवस्थेयं के वयं स्मरकिंकराः ॥ १०० ॥

## SPRUCHE VON BHARTṚHARI.

भ्रूचातुर्याकुञ्चिताक्षाः कटाक्षाः
    स्निग्धा वाचो लज्जिताश्चैव हासाः ।
लीलामन्दं प्रस्थितं च स्थितं च
    स्त्रीणामेतद्भूषणं चायुधं च ॥ १ ॥

---

द्रष्टव्येषु किमुत्तमं मृगदृशां प्रेमप्रसन्नं मुखं
    घ्रातव्येष्वपि किं तदास्यपवनः श्रव्येषु किं तद्वचः ।
किं स्वाद्येषु तदोष्ठपल्लवरसः स्पृश्येषु किं तत्तनु-
    र्ध्येयं किं नवयौवनं सुहृदयैः सर्वत्र तद्विभ्रमः ॥ २ ॥

---

सति प्रदीपे सत्यग्नौ सत्सु ताराखीन्दुषु ।
विना मे मृगशावाक्ष्या तमोभूतमिदं जगत् ॥ ३ ॥

---

तावदेव कृतिनामपि स्फुरत्येष निर्मलविवेकदीपकः ।
यावदेव न कुरंगचक्षुषां ताड्यते चपललोचनाञ्चलैः ॥ ४ ॥

---

विश्वामित्रपराशरप्रभृतयो वाताम्बुपर्णाशना-
स्ते ऽपि स्त्रीमुखपङ्कजं सुललितं दृष्ट्वैव मोहं गताः ।
शाल्यन्नं सघृतं पयो दधियुतं भुञ्जन्ति ये मानवा-
स्तेषामिन्द्रियनिग्रहो यदि भवेद्विन्ध्यस्तरेत्सागरं ॥ ५ ॥

---

श्रुता भवति तापाय दृष्टा चोन्मादवर्धिनी ।
स्पृष्टा भवति मोहाय सा नाम दयिता कथं ॥ ६ ॥

---

तावदेवामृतमयी यावल्लोचनगोचरा ।
चक्षुःपथादपगता विषादप्यतिरिच्यते ॥ ७ ॥

---

नामृतं न विषं किंचिदेकां मुक्त्वा नितम्बिनीं ।
सैवामृतलता रक्ता विरक्ता विषवल्लरी ॥ ८ ॥

---

जल्पन्ति सार्धमन्येन पश्यन्त्यन्यं सविभ्रमाः ।
हृदये चिन्तयन्त्यन्यं प्रियः को नाम योषितां ॥ ९ ॥

---

मधु तिष्ठति वाचि योषितां हृदि हालाहलमेव केवलं ।
अत एव निपीयते ऽधरो हृदयं मुष्टिभिरेव ताड्यते ॥ १० ॥

---

विस्तारितं मकरकेतनधीवरेण
स्त्रीसंज्ञितं बडिशमत्र भवाम्बुराशौ ।
येनाचिरात्तदधरामिषलोलमर्त्य-
मत्स्यान्विकृष्य पचतीत्यनुरागवह्नौ ॥ ११ ॥

---

यां चिन्तयामि सततं मयि सा विरक्ता
सा चान्यमिच्छति जनं स जनो ऽन्यसक्तः ।
अस्मत्कृते च परितुष्यति काचिदन्या
धिक्तां च तं च मदनं च इमां च मां च ॥ १२ ॥

---

अज्ञः सुखमाराध्यः सुखतरमाराध्यते विशेषज्ञः ।
ज्ञानलवदुर्विदग्धं ब्रह्मापि नरं न रञ्जयति ॥ १३ ॥

---

लभेत सिकतासु तैलमपि यत्नतः पीडय-
न्पिबेच्च मृगतृष्णिकासु सलिलं पिपासार्दितः ।
कदाचिदपि पर्यटञ्शशविषाणमासादये-
न्न तु प्रतिनिविष्टमूर्खजनचित्तमाराधयेत् ॥ १४ ॥

---

व्यालं बालमृणालतन्तुभिरसौ रोद्धुं समुज्जृम्भते
छेत्तुं वज्रमणीञ्शिरीषकुसुमप्रान्तेन संनह्यति ।
माधुर्यं मधुबिन्दुना रचयितुं क्षाराम्बुधेरीहते
नेतुं वाञ्छति यः सतां पथि खलान्सूक्तैः सुधास्यन्दिभिः ॥ १५ ॥

---

वरं पर्वतदुर्गेषु भ्रान्तं वनचरैः सह ।
न मूर्खजनसंसर्गः सुरेन्द्रभवनेष्वपि ॥ १६ ॥

---

विद्या नाम नरस्य रूपमधिकं विद्यातिगुप्तं धनं
    विद्या भोगकरी यशःसुखकरी विद्या गुरूणां गुरुः ।
विद्या बन्धुजनो विदेशगमने विद्यादयं संबलं
    विद्या राजसु पूजिता शुचि धनं विद्याविहीनः पशुः ॥ १७ ॥

---

परिवर्तिनि संसारे मृतः को वा न जायते ।
स जातो येन जातेन याति वंशः समुन्नतिं ॥ १८ ॥

---

कुसुमस्तवकस्येव द्वयी वृत्तिर्मनस्विनः ।
सर्वेषां मूर्ध्नि वा तिष्ठेद्विशीर्येत वने ऽथवा ॥ १९ ॥

---

यदचेतनो ऽपि पादैः स्पृष्टः प्रज्वलति सवितुरतिकान्तः ।
तत्तेजस्वी पुरुषः परकृतनिकृतं कथं सहते ॥ २० ॥

---

सिंहः शिशुरपि निपतति मदमलिनकपोलभित्तिषु गजेषु ।
प्रकृतिरियं सत्ववतां न खलु वयस्तेजसो हेतुः ॥ २१ ॥

---

यस्यास्ति वित्तं स नरः कुलीनः स पण्डितः स श्रुतवान्गुणज्ञः ।
स एव वक्ता स च दर्शनीयः सर्वे गुणाः काञ्चनमाश्रयन्ति ॥ २२ ॥

---

राजन्दुधुक्षसि यदि क्षितिधेनुमेतां
    तेनाद्य वत्समिव लोकमिमं पुषाण ।
तस्मिंश्च सम्यगनिशं परिपोष्यमाणे
    नानाफलैः फलति कल्पलतेव भूमिः ॥ २३ ॥

---

आरम्भगुर्वी क्षयिणी क्रमेण लघ्वी पुरा वृद्धिमती च पश्चात् ।
दिनस्य पूर्वार्धपरार्धभिन्ना छायेव मैत्री खलसज्जनानां ॥ २४ ॥

---

विपदि धैर्यमथाभ्युदये क्षमा
सदसि वाक्पटुता युधि विक्रमः ।
यशसि चाभिरुचिर्व्यसनं श्रुतौ
प्रकृतिसिद्धमिदं हि महात्मनां ॥ २५ ॥

---

संतप्तायसि संस्थितस्य पयसो नामापि न ज्ञायते
मुक्ताकारतया तदेव नलिनीपत्त्रस्थितं राजते ।
स्वात्यां सागरशुक्तिमध्यपतितं तन्मौक्तिकं जायते
प्रायेणाधममध्यमोत्तमगुणाः संसर्गतो जायते ॥ २६ ॥

---

प्रीणाति यः सुचरितैः पितरं स पुत्रो
यद्भर्तुरेव हितमिच्छति तत्कलत्रं ।
तन्मित्रमापदि सुखे च समं प्रयाति
एतत्त्रयं जगति पुण्यकृतो लभन्ते ॥ २७ ॥

---

भवन्ति नम्रास्तरवः फलोद्गमै-
र्नवाम्बुभिर्दूरविलम्बिनो घनाः ।
अनुद्धताः सत्पुरुषाः समृद्धिभिः
स्वभाव एवैष परोपकारिणां ॥ २८ ॥

---

श्रोत्रं श्रुतेनैव न कुण्डलेन दानेन पाणिर्न कङ्कणेन ।
विभाति कायः करुणापराणां परोपकारेण न चन्दनेन ॥ २९ ॥

---

पापान्निवारयति योजयते हिताय
गुह्यानि गूहति गुणान्प्रकटीकरोति ।
आपद्गतं च न जहाति ददाति काले
सन्मित्रलक्षणमिदं प्रवदन्ति सन्तः ॥ ३० ॥

---

पद्माकरं दिनकरो विकचीकरोति
चन्द्रो विकाशयति कैरवचक्रवालं ।
नाभ्यर्थितोऽपि जलदो सलिलं ददाति
सन्तः स्वयं परहितेषु कृताभियोगाः ॥ ३१ ॥

---

तृष्णां छिन्धि भज क्षमां त्यज मदं पापे रतिं मा कृथाः
सत्यं ब्रूह्यनुयाहि साधुपदवीं सेवस्व विद्वज्जनान् ।
मान्यान्मानय विद्विषोऽप्यनुनय प्रच्छादय स्वान्गुणा-
न्कीर्तिं पालय दुःखिते कुरु दयामेतत्सतां लक्षणं ॥ ३२ ॥

---

रत्नैर्महार्हैस्तुतुषुर्न देवा न भेजिरे भीमविषेण भीतिं ।
सुधां विना न प्रययुर्विरामं न निश्चितार्थाद्विरमन्ति धीराः ॥ ३३ ॥

---

प्रारभ्यते न खलु विघ्नभयेन नीचैः
प्रारभ्य विघ्नविहता विरमन्ति मध्याः ।
विघ्नैः पुनः पुनरपि प्रतिहन्यमानाः
प्रारब्धमुत्तमजना न परित्यजन्ति ॥ ३४ ॥

---

आलस्यं हि मनुष्याणां शरीरस्थो महान्रिपुः ।
नास्त्युद्यमसमो बन्धुः कुर्वाणो नावसीदति ॥ ३५ ॥

---

कदर्थितस्यापि हि धैर्यवृत्तेर्न शक्यते धैर्यगुणाः प्रमार्ष्टुं ।
अधोमुखस्यापि कृतस्य वह्नेर्नाधः शिखा याति कदाचिदेव ॥ ३६ ॥

---

वरं तुङ्गाच्छृङ्गाद्गुरुशिखरिणः क्वापि पुलिने
पतित्वायं कायः कठिनदृषदन्तर्विदलितः ।
वरं न्यस्तो हस्तः फणिपतिमुखे तीक्ष्णदशने
वरं वह्नौ पातस्तदपि न कृतः शीलविलयः ॥ ३७ ॥

---

वह्निस्तस्य जलायते जलनिधिः कुल्यायते तत्क्षणा-
न्मेरुः स्वल्पशिलायते मृगपतिः सद्यः कुरंगायते ।
व्यालो माल्यगुणायते विषरसः पीयूषवर्षायते
यस्याङ्गे ऽखिललोकवल्लभतमं शीलं समुन्मीलति ॥ ३८ ॥

---

निन्दन्तु नीतिनिपुणा यदि वा स्तुवन्तु
लक्ष्मीः समाविशतु गच्छतु वा यथेष्टं ।
अद्यैव वा मरणमस्तु युगान्तरे वा
न्याय्यात्पथः प्रविचलन्ति पदं न धीराः ॥ ३९ ॥

---

भग्नाशस्य करण्डपीडिततनोर्म्लानेन्द्रियस्य क्षुधा
कृत्वाखुर्विवरं स्वयं निपतितो नक्तं मुखे भोगिनः ।
तृप्तस्तत्पिशितेन सत्वरमसौ तेनैव यातः पथा
स्वस्थास्तिष्ठत दैवमेव हि नृणां वृद्धौ क्षये कारणं ॥ ४० ॥

---

पत्त्रं नैव यदा करीरविटपे दोषो वसन्तस्य किं
नोलूको ऽप्यवलोकयते यदि दिवा सूर्यस्य किं दूषणं ।
धारा नैव पतन्ति चातकमुखे मेघस्य किं दूषणं
यत्पूर्वं विधिना ललाटलिखितं तन्मार्जितुं कः क्षमः ॥ ४१ ॥

---

मज्जत्वम्भसि यातु मेरुशिखरं शत्रुं जयत्वाहवे
वाणिज्यं कृषिसेवनादिसकला विद्याः कलाः शिक्षतु ।
आकाशं विपुलं प्रयातु खगवत्कृत्वा प्रयत्नं परं
नाभाव्यं भवतीह कर्मवशतो भाव्यस्य नाशः कुतः ॥ ४२ ॥

---

नैवाकृतिः फलति नैव कुलं न शीलं
विद्यापि नैव न च यत्नकृतापि सेवा ।
भाग्यानि पूर्वतपसा खलु संचितानि
काले फलन्ति पुरुषस्य यथैव वृक्षाः ॥ ४३ ॥

---

वलिभिर्मुखमाक्रान्तं पलितैरङ्कितं शिरः ।
गात्राणि शिथिलायन्ते तृष्णैका तरुणायते ॥ ४४ ॥

---

अवश्यं यातारश्चिरतरमुषित्वापि विषया
वियोगे को भेदस्त्यजति न जनो यत्स्वयममून् ।
व्रजन्तः स्वातन्त्र्यादतुलपरितापाय मनसः
स्वयं त्यक्तास्त्वेते शमसुखमनन्तं विदधति ॥ ४५ ॥

---

व्याघ्रीव तिष्ठति जरा परितर्जयन्ती
रोगाश्च शत्रव इव प्रहरन्ति देहे ।
आयुः परिस्रवति भिन्नघटादिवाम्भो
लोकस्तथाप्यहितमाचरतीति चित्रं ॥ ४६ ॥

---

आयुर्वर्षशतं नृणां परिमितं रात्रौ तदर्धं गतं
तस्यार्धस्य परस्य चार्धमपरं बालत्ववृद्धत्वयोः ।
शेषं व्याधिवियोगदुःखसहितं सेवादिभिर्नीयते
जीवे वारितरंगचञ्चलतरे सौख्यं कुतः प्राणिनां ॥ ४७ ॥

---

क्षणं बालो भूत्वा क्षणमपि युवा कामरसिकः
क्षणं वित्तैर्हीनः क्षणमपि च संपूर्णविभवः ।
जराजीर्णैरङ्गैर्नट इव वलीमण्डिततनु-
र्नरः संसारान्ते विशति यमधानीयवनिकां ॥ ४८ ॥

---

यावत्स्वस्थमिदं शरीरमरुजं यावज्जरा दूरतो
यावच्चेन्द्रियशक्तिरप्रतिहता यावत्क्षयो नायुषः ।
आत्मश्रेयसि तावदेव विदुषा कार्यः प्रयत्नो महा-
न्संदीप्ते भवने तु कूपखननं प्रत्युद्यमः कीदृशः ॥ ४९ ॥

# RAGHUVAMÇA.

## BUCH XII.

निर्विष्टविषयस्नेहः स दशान्तमुपेयिवान् ।
आसीदासन्ननिर्वाणः प्रदीपार्चिरिवोषसि ॥ १ ॥
तं कर्णमूलमागत्य रामे श्रीर्न्यस्यतामिति ।
कैकेयीशङ्कयेवाह पलितच्छद्मना जरा ॥ २ ॥
सा पौरान्पौरकान्तस्य रामस्याभ्युदयश्रुतिः ।
प्रत्येकं ह्लादयांचक्रे कुल्येवोद्यानपादपान् ॥ ३ ॥
तस्याभिषेकसंभारं कल्पितं क्रूरनिश्चया ।
दूषयामास कैकेयी शोकोष्णैः पार्थिवाश्रुभिः ॥ ४ ॥
सा किलाश्वासिता चण्डी भर्त्रा तत्संश्रुतौ वरौ ।
उद्ववामेन्द्रसिक्ता भूर्विलमग्नाविवोरगौ ॥ ५ ॥
तयोश्चतुर्दशैकेन रामं प्राव्राजयत्समाः ।
द्वितीयेन सुतस्यैच्छद्वैधव्यैकफलां श्रियं ॥ ६ ॥
पित्रा दत्तां रुदन्रामः प्राग्महीं प्रत्यपद्यत ।
पश्चाद्वनाय गच्छेति तदाज्ञां मुदितोऽग्रहीत् ॥ ७ ॥
दधतो मङ्गलक्षौमे वसानस्य च वल्कले ।
ददृशुर्विस्मितास्तस्य मुखरागं समं जनाः ॥ ८ ॥
स सीतालक्ष्मणसखः सत्याद्गुरुमलोपयन् ।
विवेश दण्डकारण्यं प्रत्येकं च सतां मनः ॥ ९ ॥
राजापि तद्वियोगार्त्तः स्मृत्वा शापं स्वकर्मजं ।
शरीरत्यागमात्रेण शुद्धिलाभममन्यत ॥ १० ॥

विप्रोषितकुमारं तद्राज्यमस्तमितेश्वरं ।
रन्ध्रान्वेषणदक्षाणां द्विषामामिषतां ययौ ॥ ११ ॥

अथानाथाः प्रकृतयो मातृबन्धुनिवासिनं ।
मौलैरानाययामासुर्भरतं स्तम्भिताश्रुभिः ॥ १२ ॥

श्रुत्वा तथाविधं मृत्युं कैकेयीतनयः पितुः ।
मातुर्न केवलं स्वस्याः श्रियो ऽप्यासीत्पराङ्मुखः ॥ १३ ॥

ससैन्यश्चान्वगाद्रामं दर्शितानाश्रमालयैः ।
तस्य पश्यन्ससौमित्रेरुदश्रुर्वसतिद्रुमान् ॥ १४ ॥

चित्रकूटवनस्थं च कथितस्वर्गतिर्गुरोः ।
लक्ष्म्या निमन्त्रयांचक्रे तमनुच्छिष्टसंपदा ॥ १५ ॥

स हि प्रथमजे तस्मिन्नकृतश्रीपरिग्रहे ।
परिवेत्तारमात्मानं मेने स्वीकरणाद्भुवः ॥ १६ ॥

तमशक्यमपाक्रष्टुं निर्देशात्स्वर्गिणः पितुः ।
ययाचे पादुके पश्चात्कर्तुं राज्याधिदेवते ॥ १७ ॥

स विसृष्टस्तथेत्युक्त्वा भ्रात्रा नैवाविशत्पुरीं ।
नन्दिग्रामगतस्तस्य राज्यं न्यासमिवाभुनक् ॥ १८ ॥

दृढभक्तिरिति ज्येष्ठे राज्यतृष्णापराङ्मुखः ।
मातुः पापस्य शुद्ध्यर्थं प्रायश्चित्तमिवाकरोत् ॥ १९ ॥

रामो ऽपि सह वैदेह्या वने वन्येन वर्तयन् ।
चचार सानुजः शान्तो वृद्धेक्ष्वाकुव्रतं युवा ॥ २० ॥

प्रभावस्तम्भितच्छायमाश्रितः स वनस्पतिं ।
कदाचिदङ्के सीतायाः शिश्ये किंचिदिव श्रमात् ॥ २१ ॥

ऐन्द्रिः किल नखैस्तस्या विददार स्तनौ द्विजः ।
प्रियोपभोगचिह्नेषु पौरोभाग्यमिवाचरन् ॥ २२ ॥

तस्मिन्नास्थदिषीकास्त्रं रामो रामावबोधितः ।
आत्तश्च मुमुचे तस्मादेकनेत्रव्ययेन सः ॥ २३ ॥
रामस्त्वासन्नदेशत्वाद्भरतागमनं पुनः ।
आशङ्क्योत्सुकसारंगां चित्रकूटस्थलीं जहौ ॥ २४ ॥
प्रययावातिथेयेषु वसन्नृषिकुलेषु सः ।
दक्षिणां दिशमृक्षेषु वार्षिकेष्विव भास्करः ॥ २५ ॥
बभौ तमनुगच्छन्ती विदेहाधिपतेः सुता ।
प्रतिषिद्धापि कैकेय्या लक्ष्मीरिव गुणोन्मुखी ॥ २६ ॥
अनसूयानिसृष्टेन पुण्यगन्धेन काननं ।
सा चकाराङ्गरागेण पुष्पोच्चलितषट्पदं ॥ २७ ॥
संध्याभ्रकपिशस्तत्र विराधो नाम राक्षसः ।
अतिष्ठन्मार्गमावृत्य रामस्येन्दोरिव ग्रहः ॥ २८ ॥
स जहार तयोर्मध्ये मैथिलीं लोकशोषणः ।
नभोनभस्ययोर्वृष्टिमवग्रह इवान्तरे ॥ २९ ॥
तं विनिष्पिष्य काकुत्स्थौ पुरा दूषयति स्थलीं ।
गन्धेनाशुचिना चेति वसुधायां निचख्नतुः ॥ ३० ॥
पञ्चवट्यां ततो रामः शासनात्कुम्भजन्मनः ।
अनपोढस्थितिस्तस्थौ विन्ध्याद्रिः प्रकृताविव ॥ ३१ ॥
रावणावरजा तत्र राघवं मदनातुरा ।
अभिपेदे निदाघार्त्ता व्यालीव मलयद्रुमं ॥ ३२ ॥
सा सीतासंनिधावेव तं वव्रे कथितान्वया ।
अत्यारूढो हि नारीणामकालज्ञो मनोभवः ॥ ३३ ॥
कलत्रवानहं बाले कनीयांसं भजस्व मे ।
इति रामो वृषस्यन्तीं वृषस्कन्धः शशास तां ॥ ३४ ॥

ज्येष्ठाभिगमनात्पूर्वं तेनाप्यनभिनन्दिता ।
साभूद्रामाश्रया भूयो नदीवोभयकूलभाग् ॥ ३५ ॥
संरम्भं मैथिलीहासः क्षणं सौम्यां निनाय तां ।
निवातस्तिमितां वेलां चन्द्रोदय इवोदधेः ॥ ३६ ॥
फलमस्योपहासस्य सद्यः प्राप्स्यसि पश्य मां ।
मृग्याः परिभवो व्याघ्र्यामित्यवेहि त्वया कृतं ॥ ३७ ॥
इत्युक्त्वा मैथिलीं भर्तुरङ्के निर्विशतीं भयात् ।
रूपं शूर्पणखा नाम्नः सदृशं प्रत्यपद्यत ॥ ३८ ॥
लक्ष्मणः प्रथमं श्रुत्वा कोकिलामञ्जुभाषिणीं ।
शिवाघोरस्वनां पश्चाद्बुबुधे विकृतेति तां ॥ ३९ ॥
पर्णशालामथ क्षिप्रं विधृतासिः प्रविश्य सः ।
वैरूप्यपौनरुक्त्येन भीषणां तामयोजयत् ॥ ४० ॥
सा वक्रनखधारिण्या वेणुकर्कशपर्वया ।
अङ्कुशाकारयाङ्गुल्या तावतर्जयदम्बरे ॥ ४१ ॥
प्राप्य चाशु जनस्थानं खरादिभ्यस्तथाविधं ।
रामोपक्रममाचख्यौ रक्षःपरिभवं नवं ॥ ४२ ॥
मुखावयवलूनां तां नैर्ऋता यत्पुरोदधुः ।
रामाभियायिनां तेषां तदेवाभूदमङ्गलं ॥ ४३ ॥
उदायुधानापततस्तान्दृप्तान्प्रेक्ष्य राघवः ।
निदधे विजयाशंसां चापे सीतां च लक्ष्मणे ॥ ४४ ॥
एको दाशरथी रामो यातुधानाः सहस्रशः ।
ते तु यावन्त एवाजौ तावांश्च ददृशे स तैः ॥ ४५ ॥
असज्जनेन काकुत्स्थः प्रयुक्तमथ दूषणं ।
न चक्षमे शुभाचारः स दूषणमिवात्मनः ॥ ४६ ॥

तं शरैः प्रतिजग्राह खरत्रिशिरसौ च सः ।
क्रमशस्ते पुनस्तस्य चापात्सममिवोद्ययुः ॥ ४७ ॥
तैस्त्रयाणां शितैर्बाणैर्यथापूर्वविशुद्धिभिः ।
आयुर्देहातिगैः पीतं रुधिरं तु पतत्रिभिः ॥ ४८ ॥
तस्मिन्रामशरोत्कृत्ते बले महति रक्षसां ।
उत्थितं ददृशेऽन्यच्च कबन्धेभ्यो न किंचन ॥ ४९ ॥
सा बाणवर्षिणं रामं योधयित्वा सुरद्विषां ।
अप्रबोधाय सुष्वाप गृध्रच्छाये वरूथिनी ॥ ५० ॥
राघवास्त्रविदीर्णानां रावणं प्रति रक्षसां ।
तेषां शूर्पणखैवैका दुष्प्रवृत्तिहराभवत् ॥ ५१ ॥
निग्रहात्स्वसुराप्तानां वधाच्च धनदानुजः ।
रामेण निहितं मेने पदं दशसु मूर्धसु ॥ ५२ ॥
रक्षसा मृगरूपेण वञ्चयित्वा स राघवौ ।
जहार सीतां पक्षीन्द्रप्रयासक्षणविघ्नितः ॥ ५३ ॥
तौ सीतान्वेषिणौ गृध्रं लूनपक्षमपश्यतां ।
प्राणैर्दशरथप्रीतेरनृणं कण्ठवर्तिभिः ॥ ५४ ॥
स रावणहृतां ताभ्यां वचसाचष्ट मैथिलीं ।
आत्मनः सुमहत्कर्म व्रणैरावेद्य संस्थितः ॥ ५५ ॥
तयोस्तस्मिन्नवीभूतपितृव्यापत्तिशोकयोः ।
पितरीवाग्निसंस्कारात्परा निववृते क्रिया ॥ ५६ ॥
वधनिर्धूतशापस्य कबन्धस्योपदेशतः ।
मुमूर्छ सख्यं रामस्य समानव्यसने हरौ ॥ ५७ ॥
स हत्वा वालिनं वीरस्तत्पदे चिरकाङ्क्षिते ।
धातोः स्थान इवादेशं सुग्रीवं संन्यवेशयत् ॥ ५८ ॥

इतस्ततश्च वैदेहीमन्वेष्टुं भर्तृचोदिताः ।
कपयश्चेरुरार्तस्य रामस्येव मनोरथाः ॥ ५९ ॥
प्रवृत्तावुपलब्धायां तस्याः संपातिदर्शनात् ।
मारुतिः सागरं तीर्णः संसारमिव निर्ममः ॥ ६० ॥
दृष्टा विचिन्वता तेन लङ्कायां राक्षसीवृता ।
जानकी विषवल्लीभिः परीतेव महौषधिः ॥ ६१ ॥
तस्यै भर्तुरभिज्ञानमङ्गुलीयं ददौ कपिः ।
प्रत्युद्गतमिवानुष्णैस्तदानन्दाश्रुविन्दुभिः ॥ ६२ ॥
निर्वाप्य प्रियसंदेशैः सीतामक्षवधोद्धतः ।
स ददाह पुरीं लङ्कां क्षणसोढारिनिग्रहः ॥ ६३ ॥
प्रत्यभिज्ञानरत्नं च रामायादर्शयत्कृती ।
हृदयं स्वयमायातं वैदेह्या इव मूर्तिमत् ॥ ६४ ॥
स प्राप हृदयन्यस्तमणिस्पर्शनिमीलितः ।
अपयोधरसंसर्गां प्रियालिङ्गननिर्वृतिं ॥ ६५ ॥
श्रुत्वा रामः प्रियोदन्तं मेने तत्संगमोत्सुकः ।
महार्णवपरिक्षेपं लङ्कायाः परिखालघुं ॥ ६६ ॥
स प्रतस्थेऽरिनाशाय हरिसैन्यैरनुद्रुतः ।
न केवलं भुवः पृष्ठे व्योम्नि संवाधवर्तिभिः ॥ ६७ ॥
निविष्टमुदधेः कूले तं प्रपेदे विभीषणः ।
स्नेहाद्राक्षसलक्ष्म्येव वुद्धिमादिश्य चोदितः ॥ ६८ ॥
तस्मै निशाचरैश्वर्यं प्रतिशुश्राव राघवः ।
काले खलु समारब्धाः फलं वध्नन्ति नीतयः ॥ ६९ ॥
स सेतुं वन्धयामास प्लवगैर्लवणाम्भसि ।
रसातलादिवोन्मग्नं शेषं स्वप्नाय शार्ङ्गिणः ॥ ७० ॥

तेनोत्तीर्य पथा लङ्कां रोधयामास पिङ्गलैः ।
द्वितीयं हेमप्राकारं कुर्वद्भिरिव वानरैः ॥ ७१ ॥
रणः प्रववृते तत्र भीमः प्लवगरक्षसां ।
दिग्विजृम्भितकाकुत्स्थपौलस्त्यजयघोषणः ॥ ७२ ॥
पादपाविद्धपरिघः शिलानिष्पिष्टमुद्गरः ।
अतिशस्त्रनखन्यासः शैलरुग्णमतंगजः ॥ ७३ ॥
अथ रामशिरश्छेददर्शनोद्भ्रान्तचेतनां ।
सीतां मायेति शंसन्ती त्रिजटा समजीवयत् ॥ ७४ ॥
कामं जीवति मे नाथ इति सा विजहौ शुचं ।
प्राग्मत्वा सत्यमस्यान्तं जीवितास्मीति लज्जिता ॥ ७५ ॥
गरुडापातविश्लिष्टमेघनादास्त्रबन्धनः ।
दाशरथ्योः क्षणात्क्लेशः स्वप्नवृत्त इवाभवत् ॥ ७६ ॥
ततो बिभेद पौलस्त्यः शक्त्या वक्षसि लक्ष्मणं ।
रामस्त्वनाहतो ऽप्यासीद्विदीर्णहृदयः शुचा ॥ ७७ ॥
स मारुतिसमानीतमहौषधिहतव्यथः ।
लङ्कास्त्रीणां पुनश्चक्रे विलापाचार्यकं शरैः ॥ ७८ ॥
नादं स मेघनादस्य धनुश्चेन्द्रायुधप्रभं ।
मेघस्येव शरत्कालो न किंचित्पर्यशेषयत् ॥ ७९ ॥
कुम्भकर्णः कपीन्द्रेण तुल्यावस्थः स्वसुः कृतः ।
रुरोध रामं शृङ्गीव टङ्कच्छिन्नमनःशिलः ॥ ८० ॥
अकाले बोधितो भ्रात्रा प्रियस्वप्नो वृथा भवान् ।
रामेषुभिरितीवासौ दीर्घनिद्रां प्रवेशितः ॥ ८१ ॥
इतराण्यपि रक्षांसि पेतुर्वानरकोटिषु ।
रजांसि समरोत्थानि तच्छोणितनदीष्विव ॥ ८२ ॥

निर्ययावथ पौलस्त्यः पुनर्युद्धाय मन्दिरात् ।
अरावणमरामं वा जगदद्येति निश्चितः ॥ ८३ ॥
रामं पदातिमालोक्य लङ्केशं च वरूथिनं ।
हरियुग्यं रथं तस्मै प्रजिघाय पुरंदरः ॥ ८४ ॥
तमाधूतध्वजपटं व्योमगङ्गोर्मिवायुभिः ।
देवसूतभुजालम्बी जैत्रमध्यास्त राघवः ॥ ८५ ॥
मातलिस्तस्य माहेन्द्रमामुमोच तनुच्छदं ।
यत्रोत्पलदलक्लैव्यमस्त्राण्यापुः सुरद्विषां ॥ ८६ ॥
अन्योऽन्यदर्शनप्राप्तविक्रमावसरं चिरात् ।
रामरावणयोर्युद्धं चरितार्थमिवाभवत् ॥ ८७ ॥
भुजमूर्धोरुबाहुल्यादेको ऽपि धनदानुजः ।
ददृशे सो ऽयथापूर्वो मातृवंश इव स्थितः ॥ ८८ ॥
जेतारं लोकपालानां स्वमुखैरर्चितेश्वरं ।
रामस्तुलितकैलाशमरातिं बह्वमन्यत ॥ ८९ ॥
तस्य स्फुरति पौलस्त्यः सीतासंगमशंसिनि ।
निचखानाधिकक्रोधः शरं सव्येतरे भुजे ॥ ९० ॥
रावणस्यापि रामास्तो भित्त्वा हृदयमाशुगः ।
विवेश भुवमाख्यातुमुरगेभ्य इव प्रियं ॥ ९१ ॥
वचसैव तयोर्वाक्यमस्त्रमस्त्रेण निघ्नतोः ।
अन्योऽन्यजयसंरम्भो ववृधे वादिनोरिव ॥ ९२ ॥
विक्रमव्यतिहारेण सामान्याभूद्द्वयोरपि ।
जयश्रीरन्तरा वेदिर्मत्तवारणयोरिव ॥ ९३ ॥
कृतप्रतिकृतप्रीतैस्तयोर्मुक्तां सुरासुरैः ।
परस्परं शरव्राताः पुष्पवृष्टिं न सेहिरे ॥ ९४ ॥

अयःशङ्कुचितां रक्षः शतघ्नीमथ शत्रवे ।
हृतां वैवस्वतस्येव कूटशाल्मलिमक्षिपत् ॥ ९५ ॥
राघवो रथमप्राप्तां तामाशां च सुरद्विषां ।
अर्धचन्द्रमुखैर्बाणैश्चिच्छेद कदलीसुखं ॥ ९६ ॥
अमोघं संदधे चास्मै धनुष्येकधनुर्धरः ।
ब्राह्ममस्त्रं प्रियाशोकशल्यनिष्कर्षणौषधं ॥ ९७ ॥
तद्व्योम्नि दशधा भिन्नं ददृशे दीप्तिमन्मुखं ।
वपुर्महोरगस्येव करालफणमण्डलं ॥ ९८ ॥
तेन मन्त्रप्रयुक्तेन निमेषार्धादपातयत् ।
स रावणशिरःपङ्क्तिमज्ञातव्रणवेदनां ॥ ९९ ॥
बालार्कप्रतिमेवाप्सु वीचिभिन्ना पतिष्यतः ।
रराज रक्षःकायस्य कण्ठच्छेदपरंपरा ॥ १०० ॥
मरुतां पश्यतां तस्य शिरांसि पतितान्यपि ।
मनो नातिविशश्वास पुनःसंधानशङ्किनां ॥ १०१ ॥
अथ मदगुरुपक्षैर्लोकपालद्विपानामनुगतमलिवृन्दैर्गण्डभित्तीर्विहाय ।
उपनतमणिबन्धे मूर्ध्नि पौलस्त्यशत्रोः सुरभि सुरविमुक्तं पुष्पवर्षं पपात ॥ १०२ ॥
यन्ता हरेः सपदि संहृतकार्मुकज्यमापृच्छ्य राघवमनुष्ठितदेवकार्यं ।
नामाङ्करावणशराङ्कितकेतुयष्टिमूर्ध्वं रथं हरिसहस्रयुजं निनाय ॥ १०३ ॥
रघुपतिरपि जातवेदोविशुद्धां प्रगृह्य प्रियां
प्रियसुहृदि बिभीषणे संगमय्य श्रियं वैरिणः ।
रविसुतसहितेन तेनानुयातः ससौमित्रिणा
भुजविजितविमानरत्नाधिरूढः प्रतस्थे पुरीं ॥ १०४ ॥

॥ इति श्रीरघुवंशे महाकाव्ये कविश्रीकालिदासकृतौ
रावणवधो नाम द्वादशः सर्गः ॥

# GESCHICHTE DES VIDŪSHAKA.

Aus dem Kathāsaritsāgara.

अस्ति भूतलविख्याता येयमुज्जयिनी पुरी
तस्यामादित्यसेनाख्यः पूर्वमासीन्महीपतिः ॥ १ ॥
आदित्यस्येव यस्येह न चस्खाल किल क्वचित् ।
प्रतापनिलयस्यैकचक्रवर्तितया रथः ॥ २ ॥
भासयत्युच्छ्रिते व्योम यच्छत्त्रे तुहिनत्विषि ।
न्यवर्तन्तातपत्राणि राज्ञामपगतोष्मणां ॥ ३ ॥
समस्तभूतलाभोगसंभवानां बभूव सः ।
भाजनं सर्वरत्नानामम्बुराशिरिवाम्भसां ॥ ४ ॥
स कदाचन कस्यापि हेतोर्यत्रागतो नृपः ।
ससैन्यो जाह्नवीकूलमासाद्यावस्थितोऽभवत् ॥ ५ ॥
तत्रं तं गुणवर्माख्यः कोऽप्याढ्यस्तत्प्रदेशजः ।
अभ्यगाद्भूपमादाय कन्यारत्नमुपायनं ॥ ६ ॥
रत्नं त्रिभुवनेऽप्येषा कन्योत्पन्ना गृहे मम ।
नान्यत्र दातुं शक्या च देवो हि प्रभुरीदृशः ॥ ७ ॥
इत्यावेद्य प्रतीहारमुखेनात्र प्रविश्य सः ।
गुणवर्मा निजां तस्मै राज्ञे कन्यामदर्शयत् ॥ ८ ॥
स तां तेजस्वतीं नाम दीप्तिद्योतितदिङ्मुखां ।
अनङ्गमङ्गलावासरत्नदीपशिखामिव ॥ ९ ॥

पश्यन्स्नेहमयो राजाश्लिष्टस्तत्कालतेजसा ।
कामाग्निनेव संतप्तः स्विन्नो विगलितः स च ॥ १० ॥
स्वीकृत्यैतां च तत्कालं महादेवीपदोचितां ।
चकार गुणवर्माणं परितुष्यात्मनः समं ॥ ११ ॥
ततस्तां परिणीयैव प्रियां तेजस्वतीं नृपः ।
कृतार्थमानी स तया साकमुज्जयिनीं ययौ ॥ १२ ॥
तत्र तन्मुखसक्तैकदृष्टी राजा ह्यभूत्तथा ।
ददर्श राजकार्याणि न यथा सुमहान्त्यपि ॥ १३ ॥
तेजस्वतीकलालापकीलितेव किल श्रुतिः ।
नावसन्नप्रजाक्रन्दैस्तस्याक्रष्टुमशक्यत ॥ १४ ॥
चिरप्रविष्टो निरगान्नैव सोऽन्तःपुरान्नृपः ।
निरगादरिवर्गस्य हृदयात्तु हृज्ज्वरः ॥ १५ ॥
कालेन तस्य जज्ञे च राज्ञः सर्वाभिनन्दिता ।
कन्या तेजस्वतीदेव्यां बुद्धौ च विजिगीषुता ॥ १६ ॥
परमाद्भुतरूपा सा तृणीकृत्य जगत्त्रयं ।
हर्षं तस्याकरोत्कन्या प्रतापं च जिगीषुता ॥ १७ ॥
अथाभियोक्तुमुत्सिक्तं सामन्तं कंचिदेकदा ।
आदित्यसेनः प्रययावुज्जयिन्याः स भूपतिः ॥ १८ ॥
तां च तेजस्वतीं राज्ञीं समारूढकरेणुकां ।
सहप्रयायिणीं चक्रे सैन्यस्येवाधिदेवतां ॥ १९ ॥
आरुरोह वराश्वं च दर्पोद्धृतनिर्करं ।
जङ्गमाद्रिनिभं तुङ्गं सश्रीवृक्षं समेखलं ॥ २० ॥
आसन्नोत्थितपादाभ्यामभ्यस्यन्तमिवाम्बरे ।
गतिं गरुत्मतो दृष्ट्वा व्योमसञ्चारिणः ॥ २१ ॥

नवस्य मम पर्यन्तः किं नु स्यादिति मेदिनीं ।
कलयन्तमिवोन्नम्य कंधरां धीरया दृशा ॥ २२ ॥
किंचिद्गत्वा च संप्राप्य समां भूमिं स भूपतिः ।
अश्वमुत्तेजयामास तेजस्वत्याः प्रदर्शयन् ॥ २३ ॥
सो ऽश्वस्तत्पार्ष्णिघातेन यन्त्रेणेवेरितः शरः ।
जगाम क्वाप्यतिजवादलक्ष्यो लोकलोचनैः ॥ २४ ॥
तद्दृष्ट्वा विह्वले सैन्ये हयारोहाः सहस्रधा ।
अन्वधावन्न च प्रापुस्तमश्वापहृतं नृपं ॥ २५ ॥
ततश्चानिष्टमाशङ्क्य ससैन्या मन्त्रिणो भयात् ।
आदाय देवीं क्रन्दन्तीं निवृत्योज्जयिनीं ययुः ॥ २६ ॥
तत्र ते पिहितद्वारकृतप्राकारगुप्तयः ।
राज्ञः प्रवृत्तिं चिन्वन्तस्तस्थुराश्वासितप्रजाः ॥ २७ ॥
अत्रान्तरे स राजापि नीतो ऽभूत्तेन वाजिना ।
सरौद्रसिंहसंचारां दुर्गां विन्ध्याटवीं क्षणात् ॥ २८ ॥
तत्र दैवात्स्थिते तस्मिन्नश्वे स सहसा नृपः ।
आसीन्महाटवीदत्तदिग्मोहो विह्वलाकुलः ॥ २९ ॥
गतिमन्यामपश्यंश्च सो ऽवतीर्य प्रणम्य च ।
तं जगादाश्वजातिज्ञो राजा वरतुरंगमं ॥ ३० ॥
देवस्त्वं न प्रभुद्रोहं त्वादृशः कर्तुमर्हति ।
तन्मे त्वमेव शरणं शिवेन नय मां पथा ॥ ३१ ॥
तच्छ्रुत्वा सानुतापः सन्सो ऽश्वो जातिस्मरस्तदा ।
तत्तथेत्यग्रहीद्बुद्ध्या दैवतं हि हयोत्तमाः ॥ ३२ ॥
ततो राज्ञि समारूढे स प्रतस्थे तुरंगमः ।
स्वच्छशीताम्बुसरसा मार्गेणाध्वक्लमच्छिदा ॥ ३३ ॥

सायं च प्रापयामास स योजनशतान्तरं ।
उज्जयिन्याः समीपं तं राजानं वाजिसत्तमः ॥ ३४ ॥
तद्वेगविजितान्वीक्ष्य सप्तापि निजवाजिनः ।
अस्ताद्रिकन्दरालीने लज्जयेवांशुमालिनि ॥ ३५ ॥
तमसि प्रसृते द्वाराण्युज्जयिन्यां विलोक्य सः ।
पिहितानि श्मशानं च बहिस्तत्कालभीषणं ॥ ३६ ॥
निनायैनं निवासाय भूपतिं बुद्धिमान्हयः ।
वाह्यैकान्तस्थितं तत्र गुप्तं विप्रमठं निशि ॥ ३७ ॥
निशातिवाह्ययोग्यं च तं स दृष्ट्वा मठं नृपः ।
आदित्यसेनः प्रारेभे प्रवेष्टुं आत्तवाहनः ॥ ३८ ॥
रुरुधुस्तस्य विप्राश्च प्रवेशं तन्निवासिनः ।
श्मशानपालश्चौरो वा को ऽप्यसाविति वादिनः ॥ ३९ ॥
निर्ययुस्ते च संसक्तकलहालोलनिष्ठुराः ।
भयकार्कश्यकोपानां गृहं हि छान्दसा द्विजाः ॥ ४० ॥
रटत्सु तेषु तत्रैको निर्जगाम ततो मठात् ।
विदूषकाख्यो गुणवान्धुर्यः सत्ववतां द्विजः ॥ ४१ ॥
यो युवा बाहुशाली च तपसाराध्य पावकं ।
प्राप खड्गोत्तमं तस्माद्ध्यातमात्रोपगामिनं ॥ ४२ ॥
स दृष्ट्वा तं निशि प्राप्तं धीरो भव्याकृतिं नृपं ।
प्रच्छन्नः को ऽपि देवो ऽयमिति दध्यौ विदूषकः ॥ ४३ ॥
विधूय विप्रांश्चान्यांस्तान्स सर्वानुचिताशयः ।
नृपं प्रवेशयामास मठान्तः प्रश्रयानतः ॥ ४४ ॥
विश्रान्तस्य च दासीभिर्धूताध्वरजसः क्षणात् ।
आहारं कल्पयामास राज्ञस्तस्य निजोचितं ॥ ४५ ॥

तं चापनीतपर्याणं तदीयं तुरगोत्तमं ।
यवसादिप्रदानेन चकार विगतश्रमं ॥ ४६ ॥
हन्तास्म्यहं शरीरं ते तत्सुखं स्वपिहि प्रभो ।
इत्युवाच च तं श्रान्तमास्तीर्णशयनं नृपं ॥ ४७ ॥
सुप्ते च तस्मिन्द्वारस्थो जागरामास स द्विजः ।
चिन्तितोपस्थिताग्नेयखड्गहस्तो ऽखिलां निशां ॥ ४८ ॥
प्रातश्च तस्य नृपतेः प्रबुद्धस्यैव स स्वयं ।
अनुक्त एव तुरगं सज्जीचक्रे विदूषकः ॥ ४९ ॥
राजापि स तमामन्त्र्य समारुह्य च वाजिनं ।
विवेशोज्जयिनीं दूराद्दृष्टो हर्षाकुलैर्जनैः ॥ ५० ॥
प्रविष्टमभिजग्मुस्तं सर्वाः प्रकृतयः क्षणात् ।
तदागमनजानन्दलसत्कलकलारवाः ॥ ५१ ॥
आययौ राजभवनं स राजा सचिवान्वितः ।
ययौ तेजस्वतीदेव्या मनसश्च महाज्वरः ॥ ५२ ॥
वाताहतोत्सवाक्षिप्तपताकांशुकपङ्क्तिभिः ।
उत्सारिता इवाभूवन्नगर्यास्तत्क्षणं शुचः ॥ ५३ ॥
अकरोदादिनान्तं च देवी तावन्महोत्सवं ।
यावन्नगरलोको ऽभूत्सार्कः सिन्दूरपिङ्गलः ॥ ५४ ॥
अन्येद्युः स तमादित्यसेनो राजा विदूषकं ।
मठादानाययामास तस्मात्सर्वैर्द्विजैः सह ॥ ५५ ॥
प्रख्याप्य रात्रिवृत्तान्तं ददौ तस्मै स तत्क्षणं ।
विदूषकाय ग्रामाणां सहस्रमुपकारिणे ॥ ५६ ॥
पौरोहित्ये च चक्रे तं प्रदत्तच्छत्रवाहनं ।
विप्रं कृतज्ञो नृपतिः कौतुकालोकितं जनैः ॥ ५७ ॥

एवं तत्रैव सामन्ततुल्यः सोऽभूद्विदूषकः ।
मोघा हि नाम जायेत महत्सूपकृतिः कुतः ॥ ५८ ॥
यांश्च प्राप नृपाद्ग्रामांस्तान्स सर्वान्महाशयः ।
तन्मठाश्रयिभिर्विप्रैः समं साधारणं व्यधात् ॥ ५९ ॥
तस्थौ च सेवमानस्तं राजानं स तदाश्रितः ।
भुञ्जानश्च सहान्यैस्तैर्ब्राह्मणैर्ग्रामसंचयं ॥ ६० ॥
काले गच्छति चान्ये ते सर्वे प्राधान्यमिच्छवः ।
नैव तं गणयामासुर्द्विजा धनमदोद्धताः ॥ ६१ ॥
विभिन्नैः सप्तसंख्याकैरेकस्थानाश्रयैर्मिथः ।
संघर्षात्तैरबाध्यन्त ग्रामा दुष्टैर्ग्रहैरिव ॥ ६२ ॥
उच्छृङ्खलेषु तेष्वासीदुदासीनो विदूषकः ।
अल्पसत्त्वेषु धीराणामवज्ञैव हि शोभते ॥ ६३ ॥
एकदा कलहासक्तान्दृष्ट्वा तानभ्युपाययौ ।
कश्चिच्चक्रधरो नाम विप्रः प्रकृतिनिष्ठुरः ॥ ६४ ॥
परार्थन्यायवादेषु काणोऽप्यज्ञानदर्शनः ।
कुब्जोऽपि वाचि सुस्पष्टो विप्रस्तानित्यभाषत । ६५ ॥
प्राप्ता भिक्षाचरैर्भूत्वा भवद्भिः श्रीरियं शठाः ।
तन्नाशयथ किं ग्रामानन्योऽन्यमसहिष्णवः ॥ ६६ ॥
विदूषकस्य दोषोऽयं येन यूयमुपेक्षिताः ।
तदसंदिग्धमचिरात्पुनर्भिक्षां भ्रमिष्यथ ॥ ६७ ॥
वरं हि दैवायत्तैकबुद्धि स्थानमनायकं ।
न तु विप्लुतसर्वार्थं विभिन्नं बहुनायकं ॥ ६८ ॥
तदेकं नायकं धीरं कुरुध्वं वचसा मम ।
स्थिरया यदि कृत्यं वो धुर्यरक्षितया श्रिया ॥ ६९ ॥

तच्छ्रुत्वा नायकत्वं ते सर्वे ऽप्यैच्छन्यदात्मनः ।
तदा विचिन्त्य मूढांस्तान्पुनश्चक्रधरो ऽब्रवीत् ॥ ७० ॥
संघर्षशालिनां तर्हि समयं वो ददाम्यहं ।
इतः श्मशाने शूलायां त्रयश्चौरा निसूदिताः ॥ ७१ ॥
नासास्तेषां निशि च्छित्त्वा यः सुसत्त्व इहानयेत् ।
स युष्माकं प्रधानं स्याद्वीरो हि स्वाम्यमर्हति ॥ ७२ ॥
इति चक्रधरेणोक्तान्विप्रांस्तानन्तिकस्थितः ।
कुरुध्वमेतत्को दोष इत्युवाच विदूषकः ॥ ७३ ॥
ततस्ते ऽभ्यावदन्विप्रा नैतत्कर्तुं क्षमा वयं ।
यो वा शक्तः स कुरुतां समये च वयं स्थिताः ॥ ७४ ॥
ततो विदूषको ऽवादीदहमेतत्करोमि भोः ।
आनयामि निशि च्छित्त्वा नासास्तेषां श्मशानतः ॥ ७५ ॥
ततस्तद्दुष्करं मत्वा ते ऽपि मूढास्तमब्रुवन् ।
एवं कृते त्वमस्माकं स्वामी नियम एष नः ॥ ७६ ॥
इत्येवं व्याप्य नियमं प्राप्तायां रजनौ च तान् ।
आमन्त्र्य विप्रान्प्रययौ श्मशानं स विदूषकः ॥ ७७ ॥
प्रविवेश च तद्वीरो नितं कर्मेव भीषणं ।
चिन्तितोपस्थिताग्नेयकृपाणैकपरिग्रहः ॥ ७८ ॥
डाकिनीनादसंवृद्धगृध्रवायसवाशिते ।
उल्कामुखमुखोल्काग्निविस्तारितचितानले ॥ ७९ ॥
ददर्श तत्र मध्ये च स ताञ्शूलाधिरोपितान् ।
पुरुषान्नासिकाच्छेदभियेवोर्ध्वकृताननान् ॥ ८० ॥
यावच्च निकटं तेषां प्राप तावत्त्रयो ऽपि ते ।
वेतालाधिष्ठितास्तस्मिन्प्रजह्रन्ति स्म मुष्टिभिः ॥ ८१ ॥

निष्कम्प एव खड्गेन सो ऽपि प्रतिजघान तान्।
न शिक्षितः प्रयत्नो हि धीराणां हृदये भिया ॥ ८२ ॥
तेनापगतवेतालविकाराणां स नासिकाः।
तेषां चकर्त बद्ध्वा च कृती जग्राह वाससि ॥ ८३ ॥
आगच्छंश्च ददर्शैकं शवस्योपरि संस्थितं।
प्रव्राजकं श्मशाने ऽत्र जपन्तं स विदूषकः ॥ ८४ ॥
तच्चेष्टालोकनक्रीडाकौतुकादुपगम्य च।
प्रच्छन्नः पृष्ठतस्तस्य तस्थौ प्रव्राजकस्य सः ॥ ८५ ॥
क्षणात्प्रव्राजकस्याधः फूत्कारं मुक्तवाञ्शवः।
निरगाच्च मुखात्तस्य ज्वाला नाभेश्च सर्षपाः ॥ ८६ ॥
गृहीत्वा सर्षपांस्तांश्च स परिव्राजकस्ततः।
उत्थाय ताडयामास शवं पाणितलेन तं ॥ ८७ ॥
उदतिष्ठत्स चोत्तालवेतालाधिष्ठितः शवः।
आरुरोह च तस्यैव स्कन्धे प्रव्राजको ऽथ सः ॥ ८८ ॥
तदारूढश्च सहसा गन्तुं प्रववृते ततः।
विदूषको ऽपि तं तूष्णीमन्वगच्छदलक्षितः ॥ ८९ ॥
नातिदूरमतिक्रम्य स ददर्श विदूषकः।
शून्यं कात्यायनीमूर्तिसनाथं देवतागृहं ॥ ९० ॥
तत्रावतीर्य वेतालस्कन्धात्प्रव्राजकस्ततः।
विवेश गर्भभवनं वेतालो ऽप्यपतद्भुवि ॥ ९१ ॥
विदूषकश्च तत्रासीद्गुप्तया पश्यन्नलक्षितः।
प्रव्राजको ऽपि संपूज्य तत्र देवीं व्यजिज्ञपत् ॥ ९२ ॥
तुष्टासि यदि तद्देवि देहि मे वरमीप्सितं।
अन्यथात्मोपहारेण प्रीणामि भवतीमहं ॥ ९३ ॥

इत्युक्तवन्तं तं तीव्रमन्त्रसाधनगर्वितं ।
प्रव्राजकं जगादैवं वाणी गर्भगृहोद्गता ॥ ९४ ॥
आदित्यसेननृपतेः सुतामानीय कन्यकां ।
उपहारीकुरुष्वेह ततः प्राप्स्यसि वाञ्छितं ॥ ९५ ॥
एतच्छ्रुत्वा स निर्गत्य करेणाहत्य तं पुनः ।
प्रव्राडुत्थापयामास वेतालं मुक्तफूत्कृतिं ॥ ९६ ॥
तस्य च स्कन्धमारुह्य निर्यदुल्कानलार्चिषः ।
आनेतुं राजपुत्रीं तामुत्पत्य नभसा ययौ ॥ ९७ ॥
विदूषको ऽपि तत्सर्वं दृष्ट्वा तत्र व्यचिन्तयत् ।
कथं राज्ञः सुतानेन हन्यते मयि जीवति ॥ ९८ ॥
इहैव तावत्तिष्ठामि यावदायात्यसौ शठः ।
इत्यालोच्य स तत्रैव तस्थौ छन्नो विदूषकः ॥ ९९ ॥
प्रव्राजकश्च गत्वैव वातायनपथेन सः ।
प्रविश्यान्तःपुरं प्राप सुप्तां निशि नृपात्मजां ॥ १०० ॥
आययौ च गृहीत्वा तां गगणेन तमोमयः ।
कान्तिप्रकाशितदिशं राहुः शशिकलामिव ॥ १०१ ॥
हा तात हाम्बेति च तां क्रन्दन्तीं कन्यकां वहन् ।
तत्रैव देवीभवने सो ऽन्तरिक्षादवातरत् ॥ १०२ ॥
प्रविवेश च तत्कालं वेतालं प्रविमुच्य सः ।
कन्यारत्नं तदादाय देवीगर्भगृहान्तरं ॥ १०३ ॥
तत्र यावद्विहन्तुं तां राजपुत्रीमियेष सः ।
तावदाकृष्टखड्गो ऽत्र प्रविवेश विदूषकः ॥ १०४ ॥
आः पाप मालतीपुष्पमश्मना हन्तुमीहसे ।
यदस्यामाकृतौ शस्त्रं व्यापारयितुमिच्छसि ॥ १०५ ॥

इत्युक्ताकृष्य केशेषु शिरस्तस्य विवेल्लतः ।
प्रव्राजकस्य चिच्छेद खड्गेन स विदूषकः ॥ १०६ ॥
आश्वासयामास च तां राजपुत्रीं भयाकुलां ।
प्रविशन्तीमिवाङ्गानि किंचित्प्रत्यभिजानतीं ॥ १०७ ॥
कथमन्तःपुरं रात्रौ राजपुत्रीमिमामितः ।
नयेयमिति तत्कालं स च वीरो व्यचिन्तयत् ॥ १०८ ॥
भो विदूषक शृणवेतद्यो ऽयं प्रव्राड्त्वया हतः ।
मह्यानेतस्य वेतालः सिद्धो ऽभूत्सर्षपास्तथा ॥ १०९ ॥
ततो ऽस्य पृथ्वीराज्ये च वाञ्छा राजात्मजासु च ।
उदपद्यत तेनायमेवं मूढो ऽद्य वञ्चितः ॥ ११० ॥
तद्गृहाणैतदीयांस्त्वं सर्षपान्वीर येन ते ।
इमामेकां निशामद्य भविष्यत्यम्बरे गतिः ॥ १११ ॥
इत्याकाशगता वाणी जातहर्षं जगाद तं ।
अनुगृह्णन्ति हि प्रायो देवता अपि तादृशं ॥ ११२ ॥
ततो वस्त्राञ्चलात्तस्य स परिव्राजकस्य तान् ।
जग्राह सर्षपान्हस्ते तामङ्के च नृपात्मजां ॥ ११३ ॥
यावच्च देवीभवनात्स तस्मान्निर्ययौ बहिः ।
उच्चचार पुनस्तावदन्या नभसि भारती ॥ ११४ ॥
इहैव देवीभवने मासस्यान्ते पुनस्त्वया ।
आगन्तव्यं महावीर विस्मर्तव्यमिदं न ते ॥ ११५ ॥
तच्छ्रुत्वा स तथेत्युक्त्वा सद्यो देवीप्रसादतः ।
उत्पपात नभो बिभ्रद्राजपुत्रीं विदूषकः ॥ ११६ ॥
गत्वा च गगणेनाशु स तामन्तःपुरान्तरं ।
प्रावेशयद्राजसुतां समाश्वस्तामुवाच च ॥ ११७ ॥

न मे भविष्यति प्रातर्गतिर्व्योम्नि ततश्च मां ।
सर्वे द्रक्ष्यन्ति निर्यान्तं तत्संप्रत्येव याम्यहं ॥ ११८ ॥
इति तेनोदिता बाला बिभ्यती सा जगाद तं ।
गते त्वयि मम प्राणास्त्रासाक्रान्ताः प्रयान्त्यमी ॥ ११९ ॥
तन्महाभाग मा गास्त्वं देहि मे जीवितं पुनः ।
प्रतिपन्नार्थनिर्वाहः सत्त्वं हि सतां व्रतं ॥ १२० ॥
तच्छ्रुत्वा चिन्तयामास स सुसत्त्वो विदूषकः ।
त्यक्त्वेमां यदि गच्छामि मुञ्चेत्प्राणान्भयादियं ॥ १२१ ॥
ततश्च नृपतेर्भक्तिः का मया विहिता भवेत् ।
इत्यालोच्य स तत्रैव तस्थावन्तःपुरे निशि ॥ १२२ ॥
व्यायामजागरश्रान्तो ययौ निद्रां शनैश्च सः ।
राजपुत्री त्वनिद्रैव भीता तामनयन्निशां ॥ १२३ ॥
विश्राम्यतु क्षणं तावदिति प्रेमार्द्रमानसा ।
सुप्तं प्रबोधयामास सा प्रभाते ऽपि नैव तं ॥ १२४ ॥
ततः प्रविष्टा ददृशुस्तमन्तःपुरचारिकाः ।
ससंभ्रमाश्च गत्वैव राजानं तं व्यजिज्ञपन् ॥ १२५ ॥
राजाप्यवेक्षितुं तत्त्वं प्रतीहारं व्यसर्जयत् ।
प्रतीहारश्च गत्वान्तस्तत्रापश्यद्विदूषकं ॥ १२६ ॥
शुश्राव च यथावृत्तं स तद्राजसुतामुखात् ।
तथैव गत्वा राज्ञे च स समग्रं न्यवेदयत् ॥ १२७ ॥
विदूषकस्य सत्त्वज्ञस्तच्छ्रुत्वा स महीपतिः ।
किमेतत्स्यादिति क्षिप्रं समुद्भ्रान्त इवाभवत् ॥ १२८ ॥
आनाययच्च दुहितुर्मन्दिरात्तं विदूषकं ।
दत्तानुयात्रं मनसा तस्याः स्नेहानुपातिना ॥ १२९ ॥

पप्रच्छ च यथावृत्तं स राजा तमुपागतं ।
आमूलतश्च सो ऽप्यस्मै विप्रो वृत्तान्तमब्रवीत् ॥ १३० ॥
अदर्शयच्च वस्त्रान्ते निवद्धाश्चौरनासिकाः ।
प्रव्राड्वन्धिनस्तांश्च सर्षपान्भूमिभेदिनः ॥ १३१ ॥
ततः संभाव्य सत्यं तत्तांश्चानाय्य मठद्विजान् ।
सर्वांश्च चक्रधरोपेतान्पृष्ट्वा तन्मूलकारणं ॥ १३२ ॥
स्वयं श्मशाने गत्वा च दृष्ट्वा तांश्छिन्ननासिकान् ।
पुरुषांस्तं च निर्लूनकण्ठं प्रव्राजकाधमं ॥ १३३ ॥
उत्पन्नप्रत्ययो राजा स तुतोष महाशयः ।
विदूषकाय कृतिने सुताप्राणप्रदायिने ॥ १३४ ॥
ददौ तस्मै च तामेव तदैव तनयां निजां ।
किमदेयमुदाराणामुपकारिषु तुष्यतां ॥ १३५ ॥
अहिवासाम्बुजप्रीत्या नूनं राजसुताकरे ।
गृहीतपाणिर्येनास्या लेभे लक्ष्मीं विदूषकः ॥ १३६ ॥
ततो राजोपचारेण स तया कान्तया सह ।
आदित्यसेननृपतेस्तस्थौ श्लाघ्ययशा गृहे ॥ १३७ ॥
अथ यातेषु दिवसेष्वेकदा दैवचोदिता ।
तमुवाच निशायां सा राजपुत्री विदूषकं ॥ १३८ ॥
नाथ स्मरसि यत्तत्र तव देवीगृहे निशि ।
मासान्ते त्वमिहागच्छेरित्युक्तं दिव्यया गिरा ॥ १३९ ॥
तत्र चाद्य गतो मासो भवतस्तच्च विस्मृतं ।
इत्युक्तः प्रियया स्मृत्वा स जहर्ष विदूषकः ॥ १४० ॥
साधु स्मृतं त्वया तन्वि विस्मृतं तन्मया पुनः ।
इत्युक्त्वालिङ्गनं चास्यै स ददौ पारितोषिकं ॥ १४१ ॥

सुप्तायां च ततस्तस्यां निर्गत्यान्तःपुराद्दिशि ।
आदाय खड्गं स्वस्थः संस्तद्देवीभवनं ययौ ॥ १४२ ॥
प्राप्तो विदूषको ऽहं भोरिति तत्र वदन्बहिः ।
प्रविशेत्यशृणोद्वाचमन्तः केनाप्युदीरिताम् ॥ १४३ ॥
प्रविश्य चान्तरे सो ऽत्र दिव्यमावासमैक्षत ।
तदन्तर्दिव्यरूपां च कन्यां दिव्यपरिच्छदाम् ॥ १४४ ॥
स्वप्रभाभिन्नतिमिरां रजनीं ज्वलितामिव ।
हरकोपाग्निनिर्दग्धस्मरसंजीवनौषधीम् ॥ १४५ ॥
किमेतदिति साश्चर्यः स तया दृष्टया स्वयम् ।
सस्नेहबहुमानेन स्वागतेनाभ्यनन्द्यत ॥ १४६ ॥
उपविष्टं च संजातविश्रम्भं प्रेमदर्शनात् ।
तत्स्वरूपपरिज्ञानसोत्सुकं सा तमब्रवीत् ॥ १४७ ॥
अहं विद्याधरीकन्या भद्रा नाम महान्वया ।
इह कामचरत्वाच्च त्वामपश्यमहं तदा ॥ १४८ ॥
त्वद्गुणाकृष्टचित्ता च तत्कालमहमेव ताम् ।
अदृश्यां वाणीमसृजं पुनरागमनाय ते ॥ १४९ ॥
अद्य विद्याप्रयोगाच्च संमोह्य प्रेरिता मया ।
सा ते राजसुतैवास्मिन्कार्ये स्मृतिमजीजनत् ॥ १५० ॥
त्वदर्थं च स्थितास्मीह तत्तुभ्यमिदमर्पितम् ।
शरीरं सुन्दर मया कुरु पाणिग्रहं मम ॥ १५१ ॥
इत्युक्तो भद्रया भव्यो विद्याधर्या विदूषकः ।
तथेति परिणिन्ये तां गान्धर्वविधिना तदा ॥ १५२ ॥
अतिष्ठदथ तत्रैव दिव्यं भोगमवाप्य सः ।
स्वपौरुषफलान्येव प्रियया संगतस्तया ॥ १५३ ॥

अत्रान्तरे प्रबुद्धा सा राजपुत्री निशाक्षये ।
भर्तारं तमपश्यन्ती विषादं सहसागमत् ॥ १५४ ॥
उत्थाय चान्तिकं मातुः प्रस्खलद्भिः पदैर्ययौ ।
विह्वला सा गलद्बाष्पतरंगितविलोचना ॥ १५५ ॥
स पतिर्मे गतः क्वापि रात्राविति च मातरं ।
आत्मापराधसभया सानुतापा च साभ्यधात् ॥ १५६ ॥
ततस्तन्मातरि स्नेहात्संभ्रान्तायां क्रमेण तद् ।
बुद्ध्वा राजापि तत्रेत्य परमाकुलतामगात् ॥ १५७ ॥
जाने श्मशानवाह्यं तद्गतो ऽसौ देवतागृहं ।
इत्युक्तो राजसुतया राजा तत्र स्वयं ययौ ॥ १५८ ॥
तत्र विद्याधरोविद्याप्रभावेन तिरोहितं ।
विचित्यापि न लेभे तं स क्षितीशो विदूषकं ॥ १५९ ॥
ततो राज्ञि परावृत्ते निराशां तां नृपात्मजां ।
देहत्यागोन्मुखीमेत्य ज्ञानी को ऽप्यब्रवीदिदं ॥ १६० ॥
नारिष्टशङ्का कर्तव्या स हि ते वर्तते पतिः ।
युक्तो दिव्येन भोगेन त्वामुपैष्यति चाचिरात् ॥ १६१ ॥
तच्छ्रुत्वा राजपुत्री सा धारयामास जीवितं ।
हृदि प्रविष्टया रुद्धं तत्प्रत्यागमवाञ्छया ॥ १६२ ॥
विदूषकस्यापि ततस्तिष्ठतस्तत्र तां प्रियां ।
भद्रां योगेश्वरी नाम सखी काचिदुपाययौ ॥ १६३ ॥
उपेत्य स रहस्येनामिदं भद्रामथाब्रवीत् ।
सखि मानुषसंसर्गात्क्रुद्धा विद्याधरास्त्वयि ॥ १६४ ॥
पापं च ते चिकीर्षन्ति तदितो गम्यतां त्वया ।
अस्ति पूर्वाम्बुधेः पारे पुरं कार्कोटकाभिधं ॥ १६५ ॥

*

तदतिक्रम्य च नदी शीतोदा नाम पावनी ।
तीर्त्वा तामुदयाख्यश्च सिद्धिक्षेत्रं महागिरिः ॥ १६६ ॥
विद्याधरैरनाक्रम्यस्तत्र त्वं गच्छ सांप्रतं ।
प्रियस्य मानुषस्येह कृते चिन्तां च मा कृथाः ॥ १६७ ॥
एतद्धि सर्वमेतस्य कथयित्वा गमिष्यसि ।
येनैष पश्चात्तत्रैव सत्वरो ह्यागमिष्यति ॥ १६८ ॥
इत्युक्ता सा तया सख्या भद्रा भयवशीकृता ।
विदूषकानुरक्तापि प्रतिपेदे तथेति तद् ॥ १६९ ॥
उक्त्वा च तस्य तदुक्तया दत्त्वा च स्वाङ्गुलीयकं ।
विदूषकस्य रात्र्यन्तसमये सा तिरोदधे ॥ १७० ॥
विदूषकश्च पूर्वस्मिञ्शून्ये देवगृहे स्थितं ।
क्षणादपश्यदात्मानं न भद्रां न च मन्दिरं ॥ १७१ ॥
स्मरन्विद्याप्रपञ्चं च पश्यंश्चैवाङ्गुलीयकं ।
विषादविस्मयावेशवशः सो ऽभूद्विदूषकः ॥ १७२ ॥
अचिन्तयच्च तस्याः स वचः स्वप्नमिव स्मरन् ।
गता तावद्विवेक्यैव मम सोदयपर्वतं ॥ १७३ ॥
तन्मयाप्याशु तत्रैव गन्तव्यं तदवाप्तये ।
न चैवं लोकदृष्टं मां लब्ध्वा राजा परित्यजेत् ॥ १७४ ॥
तस्माद्युक्तिं करोमीह कार्यं सिध्यति मे यथा ।
इति संचिन्त्य मतिमान्रूपमन्यत्स शिश्रिये ॥ १७५ ॥
जीर्णवासा रजोलिप्तो भूत्वा देवीगृहात्ततः ।
निरगादथ हा भद्रे हा भद्र इति स ब्रुवन् ॥ १७६ ॥
तत्क्षणं च विलोक्यैनं जनास्तद्देशवर्तिनः ॥
सो ऽयं विदूषकः प्राप्त इति कोलाहलं व्यधुः ॥ १७७ ॥

बुद्ध्वा च राजा निर्गत्य स्वयं दृष्ट्वा तथाविधः ।
उन्मत्तचेष्टो ऽवष्टभ्य स नीतो ऽभूत्स्वमन्दिरं ॥ १७८ ॥
तत्र स्नेहाकुलैर्यत्नादुक्तो ऽभूद्भृत्यबान्धवैः ।
तत्र तत्र स हा भद्र इति प्रत्युत्तरं ददौ ॥ १७९ ॥
वैद्योपदिष्टैरभ्यङ्गैरभ्यक्तो ऽपि स तत्क्षणं ।
अङ्गमुद्धूलयामास भूरिणा भस्मरेणुना ॥ १८० ॥
स्नेहेन राजपुत्र्या च स्वहस्ताभ्यामुपाहृतः ।
आहारस्तेन सहसा पादेनाहत्य चिक्षिपे ॥ १८१ ॥
एवं स तस्थौ कतिचिद्दिवसांस्तत्र निःस्पृहः ।
पाटयन्निजवस्त्राणि कृतोन्मादो विदूषकः ॥ १८२ ॥
अशक्यप्रतिकारो ऽयं तत्किमर्थं कदर्थ्यते ।
त्यजेत्कदाचन प्राणान्ब्रह्महत्या भवेत्ततः ॥ १८३ ॥
स्वच्छन्दचारिणस्त्वस्य कालेन कुशलं भवेत् ।
इत्यालोच्य स चादित्यसेनो राजा मुमोच तं ॥ १८४ ॥
ततः स्वच्छन्दचारी सन्नन्येद्युः साङ्गुलीयकः ।
वीरो भद्रां प्रति स्वैरं स प्रतस्थे विदूषकः ॥ १८५ ॥
गच्छन्नहरहः प्राच्यां दिशि प्राप स च क्रमात् ।
मध्ये मार्गवशायातं नगरं पौण्ड्रवर्धनं ॥ १८६ ॥
मातरत्र वसाम्येकां रात्रिमित्यभिधाय सः ।
ब्राह्मण्यास्तत्र कस्याश्चिद्वृद्धायाः प्राविशद्गृहं ॥ १८७ ॥
प्रतिपन्नाश्रया सा च कृतातिथ्या क्षणान्तरे ।
ब्राह्मणी समुपेत्यैवं सान्तर्दुःखा जगाद तं ॥ १८८ ॥
तुभ्यमेव मया दत्तं पुत्र सर्वमिदं गृहं ।
तद्गृहाण यतो नास्ति जीवितं मम सांप्रतं ॥ १८९ ॥

कस्मादेवं ब्रवीषीति तेनोक्ता विस्मितेन सा ।
श्रूयतां कथयाम्येतदित्युक्ता पुनरब्रवीत् ॥ १९० ॥
अस्तीह देवसेनाख्यो नगरे पुत्र भूपतिः ।
तस्य चैका समुत्पन्ना कन्या भूतलभूषणं ॥ १९१ ॥
मया दुःखेन लब्धेयमिति तां दुःखलब्धिकां ।
नाम्ना चकारैष नृपस्तनयामतिवत्सलः ॥ १९२ ॥
कालेन यौवनारूढामानीताय स्ववेश्मनि ।
राज्ञे कच्छपनाथाय तां प्रादाच्चैव भूपतिः ॥ १९३ ॥
स कच्छपेश्वरस्तस्या बध्वा वासगृहं निशि ।
प्रविष्ट एव प्रथमं तत्कालं पञ्चतां ययौ ॥ १९४ ॥
ततो विमनसा राज्ञा भूयो ऽप्येतेन सा सुता ।
दत्तान्यस्मै नृपायाभूत्सो ऽपि तद्वद्यपद्यत ॥ १९५ ॥
तद्भयाच्च यदान्ये ऽपि नृपा वाञ्छन्ति नैव तां ।
तदा सेनापतिं राजा निजमेवं समादिशत् ॥ १९६ ॥
इतो देशाद्वयैकैकः क्रमादेकैकतो गृहात् ।
पुमान्प्रत्यहमानेयो ब्राह्मणः क्षत्रियो ऽपि वा ॥ १९७ ॥
आनीय च प्रवेश्यो ऽत्र रात्रौ मत्पुत्रिकागृहे ।
पश्यामो हि कियन्तो ऽत्र विपत्स्यन्ते कियच्चिरं ॥ १९८ ॥
यस्तरिष्यति पश्चाच्च सो ऽस्या भर्ता भविष्यति ।
गतिः शक्या परिच्छेत्तुं न ह्यद्भुतविधेर्विधेः ॥ १९९ ॥
इति सेनापती राज्ञा समादिष्टो दिने दिने ।
वारक्रमेण गेहेभ्यो नयत्येव नरानिह ॥ २०० ॥
एवं च तत्र यातानि क्षयं नरशतान्यपि ।
मम चाकृतपुण्याया एकः पुत्रो ऽत्र वर्तते ॥ २०१ ॥

तस्य वारो ऽद्य संप्राप्तस्तत्र गन्तुं विपत्तये ।
तदभावे मया कार्यं प्रातरग्निप्रवेशनं ॥ २०२ ॥
तज्जीवन्ती स्वहस्तेन तुभ्यं गुणवते गृहं ।
ददामि सर्वं येन स्यां न पुनर्दुःखभागिनी ॥ २०३ ॥
एवमुक्तवतीं धीरस्तामवादीद्विदूषकः ।
यद्येवमम्ब तर्हि त्वं मा स्म चिन्तावती कृथाः ॥ २०४ ॥
अहं तत्राद्य गच्छामि जीवत्वेकसुतस्तव ।
किमेनं घातयामीति कृपा ते मयि मा च भूत् ॥ २०५ ॥
सिद्धियोगाद्धि नास्त्येव भयं तत्र गतस्य मे ।
एवं विदूषकेणोक्ता ब्राह्मणी सा जगाद तं ॥ २०६ ॥
तर्हि पुण्यैर्ममायातः को ऽपि देवो भवानिह ।
तत्प्राणान्देहि नः पुत्र कुशलं च तवात्मनि ॥ २०७ ॥
एवं तया सो ऽनुमतः सायं राजसुतागृहं ।
सेनापतिनियुक्तेन किंकरेण समं ययौ ॥ २०८ ॥
तत्रापश्यन्नृपसुतां तां यौवनमदोद्धतां ।
लतामनुच्चितस्फीतपुष्पभारानतामिव ॥ २०९ ॥
ततो निशायां शयने राजपुत्र्या तयाश्रिते ।
ध्यातोपनतमाग्नेयं बिभ्रत्खड्गं करेण सः ॥ २१० ॥
वासवेश्मनि तत्रासीज्जाग्रन्नेव विदूषकः ।
पश्यामि तावत्को हन्ति नरानत्रेति चिन्तयन् ॥ २११ ॥
प्रसुप्ते च जने क्षिप्रादपावृत्तकपाटकं ।
स द्वारदेशादायान्तं घोरं राक्षसमैक्षत ॥ २१२ ॥
स च द्वारि स्थितस्तत्र राक्षसो वासकान्तरे ।
भुजं नरशताकाण्डयमदण्डं न्यवेशयत् ॥ २१३ ॥

विदूषकश्च चिच्छेद धावित्वा तस्य तं क्रुधा ।
एकखड्गप्रहारेण बाहुं सपदि रक्षसः ॥ २१४ ॥
छिन्नबाहुः पलाय्याशु जगाम स निशाचरः ।
भूयो नागमनायैव तत्सत्त्वोत्कर्षभीतितः ॥ २१५ ॥
प्रबुद्धा वीक्ष्य पतितं रक्षोबाहुं नृपात्मजा ।
भीता च जातहर्षा च विस्मिता च बभूव सा ॥ २१६ ॥
प्रातश्च ददृशे राज्ञा देवसेनेन तत्र सः ।
स्वसुतान्तःपुरद्वारि स्थितश्छिन्नच्युतो भुजः ॥ २१७ ॥
इतः प्रभृति नेहान्यैः प्रवेष्टव्यं नरैरिति ।
दत्तो विदूषकेणैव सुदीर्घः परिघार्गलः ॥ २१८ ॥
ततो दिव्यप्रभावाय तस्मै प्रीतः स पार्थिवः ।
विदूषकाय तनयां तां ददौ विभवोत्तरां ॥ २१९ ॥
ततस्तया समं तत्र कान्तया स विदूषकः ।
तस्थौ दिनानि कतिचिद्रूपवत्येव संपदा ॥ २२० ॥
एकस्मिंश्च दिने सुप्तां राजपुत्रीं विहाय तां ।
स ततः प्रययौ रात्रौ तां भद्रां प्रति सत्वरः ॥ २२१ ॥
राजपुत्री च सा प्रातस्तं ददर्श न दुःखिता ।
आसीदाश्वासिता पित्रा तत्प्रत्यावर्तनाशया ॥ २२२ ॥
सो ऽपि गच्छन्नहरहः क्रमात्प्राप विदूषकः ।
पूर्वाम्बुधेरदूरस्थां नगरीं ताम्रलिप्तिकां ॥ २२३ ॥
तत्र चक्रे स केनापि वणिजा सह संगतिं ।
स्कन्ददासाभिधानेन पारमब्धेर्यियासता ॥ २२४ ॥
तेनैव सह सो ऽनल्पतदीयधनसंभृतं ।
यानपात्रं समारुह्य प्रतस्थे ऽम्बुधिवर्त्मना ॥ २२५ ॥

ततः समुद्रमध्ये तद्यानपात्रमुपागतं ।
अकस्मादभवद्रुद्धं व्यासक्तमिव केनचित् ॥ २२६ ॥
अर्चिते ऽप्यर्णवे रत्नैर्यदा न विचचाल तद् ।
तदा स वणिगार्त्तः सन्स्कन्ददासो ऽब्रवीदिदं ॥ २२७ ॥
यो मोचयति संरुद्धमिदं प्रवहणं मम ।
तस्मै निजधनार्धं च स्वसुतां च ददाम्यहं ॥ २२८ ॥
तच्छ्रुत्वैव जगादैवं धीरचेता विदूषकः ।
अहमत्रावतीर्यान्तर्विचिनोम्यम्बुधेर्जलं ॥ २२९ ॥
क्षणाच्च मोचयाम्येतद्रुद्धं प्रवहणं तव ।
यूयं चाप्यवलम्बध्वं बद्ध्वा मां पाशरज्जुभिः ॥ २३० ॥
विमुक्ते च प्रवहणे तत्क्षणं वारिमध्यतः ।
उद्धर्तव्यो ऽस्मि युष्माभिरवलम्बनरज्जुभिः ॥ २३१ ॥
तथेति तेन वणिजा तद्वचस्यभिनन्दिते ।
बबन्धुः कर्णधारास्तं रज्जुबन्धेन कक्षयोः ॥ २३२ ॥
तद्बद्धो ऽवततारैव वारिधौ स विदूषकः ।
न जात्ववसरे प्राप्ते सत्ववानवसीदति ॥ २३३ ॥
ध्यातोपस्थितमाग्नेयं खड्गं कृत्वा च तं करे ।
वीरः प्रवहणस्याधो मध्ये वारि विवेश सः ॥ २३४ ॥
तत्र चैकं महाकायं सुप्तं पुरुषमैक्षत ।
जङ्घायां तस्य रुद्धं च यानपात्रं व्यलोकयत् ॥ २३५ ॥
चिच्छेद तां स जङ्घां च तस्य खड्गेन तत्क्षणां ।
चचाल च प्रवहणं रोधमुक्तं तदैव तद् ॥ २३६ ॥
तद्दृष्ट्वैव वणिक्पापश्छेदयामास तस्य सः ।
विदूषकस्य रज्जूस्ताः प्रतिपन्नार्थलोभतः ॥ २३७ ॥

वृत्तेन चैव मुक्तेन द्रुतं प्रवहणेन सः ।
स्वलोभस्येव महतः पारमम्बुनिधेर्ययौ ॥ २३८ ॥
विदूषकोऽपि संछिन्नरज्ज्वालम्बोऽम्बुमध्यगः ।
उद्गम्य तत्तया दृष्ट्वा धीरः क्षणमचिन्तयत् ॥ २३९ ॥
किमिदं वणिजा तेन कृतं किमथ चोच्यते ।
कृतघ्ना धनलोभान्धा नोपकारेक्षणक्षमाः ॥ २४० ॥
तदेष कालः सुतरामवैक्लव्यस्य सांप्रतं ।
न हि सत्त्वावसादेन स्वल्पाप्यापद्विलङ्घ्यते ॥ २४१ ॥
इति संचिन्त्य तत्कालं जङ्घां तामारुरोह सः ।
यामन्तर्जलसुप्तस्य पुंसस्तस्य न्यकृन्तत ॥ २४२ ॥
तया ततार नावेव हस्तन्यस्ताम्बुरम्बुधिं ।
दैवमेव हि साहाय्यं कुरुते सत्त्वशालिनां ॥ २४३ ॥
तं मारुतिमिवाम्भोधिपारं रामार्थमागतं ।
वलवत्तमुवाचैवमन्तरिक्षात्सरस्वती ॥ २४४ ॥
साधु साधु सुसत्त्वोऽस्ति कोऽन्यस्त्वत्तो विदूषक ।
अनेन तव धैर्येण तुष्टोऽस्मि तदिदं शृणु ॥ २४५ ॥
प्राप्तोऽसि नग्नविषयमिमं संप्रत्यतोऽपि च ।
कार्कोटकाख्यं नगरं दिनैः प्राप्स्यसि सप्तभिः ॥ २४६ ॥
ततो लब्धधृतिर्गत्वा शीघ्रं प्राप्स्यसि चेप्सितं ।
अहं चाराधितः पूर्वं भवता कव्यहव्यभुग् ॥ २४७ ॥
मद्वराच्च तवेदानीं क्षुत्तृष्णा च न वत्स्यति ।
तद्गच्छ सिद्धौ विश्रब्धमित्युक्त्वा विरराम वाक् ॥ २४८ ॥
विदूषकश्च तच्छ्रुत्वा प्रणम्याग्निं प्रहर्षितः ।
प्रतस्थे सप्तमे चाह्नि प्राप कार्कोटकं पुरं ॥ २४९ ॥

तत्र च प्रविवेशैकं मठमार्यैरधिष्ठितं ।
नानादेशोद्भवैस्तैस्तैर्द्विजैरभ्यागतप्रियैः ॥ २५० ॥
श्रीमता निर्मितं राज्ञा तत्रत्येनार्यवर्मणा ।
शृङ्गं समग्रसौवर्णकुम्भदेवकुलान्वितं ॥ २५१ ॥
तत्र सर्वैः कृतातिथ्यमेकस्तं ब्राह्मणो ऽतिथिं ।
स्नानेन भोजनैर्वस्त्रैर्नीत्वा गृहमुपाचरत् ॥ २५२ ॥
सायं च तन्मठस्थः सन्पुरे शुश्राव तत्र सः ।
विदूषकः सपटहं घोष्यमाणमिदं वचः ॥ २५३ ॥
ब्राह्मणः क्षत्रियो वापि परिणेतुं नृपात्मजां ।
प्रातरिच्छति यः सो ऽद्य रात्रौ वसतु तद्गृहे ॥ २५४ ॥
तच्छ्रुत्वा च निमित्तं च तदाशङ्क्य स तत्क्षणं ।
गन्तुं राजसुतावासमियेष प्रियसाहसः ॥ २५५ ॥
ऊचुस्तं मठविप्रास्ते ब्रह्मन्मा साहसं कृथाः ।
तत्र राजसुतासद्म तद्भृत्योर्विवृतं मुखं ॥ २५६ ॥
यो हि तत्र प्रविशति क्षपायां न स जीवति ।
गताः सुबहवश्चैवमत्र साहसिकाः क्षयं ॥ २५७ ॥
इत्युक्तो ऽपि स तैर्विप्रैरनङ्गीकृततद्वचाः ।
विदूषको राजगृहं ययौ तत्किंकरैः सह ॥ २५८ ॥
तत्रार्यवर्मणा राज्ञा स्वयं दृष्ट्वाभिनन्दितः ।
विवेश तत्सुतावासं नक्तमर्क इवानलं ॥ २५९ ॥
ददर्श राजकन्यां च तामाकृत्यानुरागिणीं ।
नैराश्यदुःखविधुरं पश्यन्तीं साश्रया दृशा ॥ २६० ॥
आसीच्च जाग्रदेवात्र स रात्राववलोकयन् ।
करे कृपाणमाग्नेयं चिन्तितोपनतं दधत् ॥ २६१ ॥

अकस्माच्च महाघोरं ददर्श द्वारि राक्षसं ।
छिन्नदक्षिणबाहुत्वात्प्रसारितभुजान्तरं ॥ २६२ ॥
दृष्ट्वा व्यचिन्तयच्चासौ हन्त सो ऽयं निशाचरः ।
यस्य बाहुर्मया छिन्नो नगरे पौण्ड्रवर्धने ॥ २६३ ॥
तदस्य न पुनर्बाहौ प्रहरिष्याम्यसौ हि मे ।
पलाय्य पूर्ववद्गच्छेत्तस्मात्साधु निहन्म्यमुं ॥ २६४ ॥
इत्यालोच्य प्रधाव्यैव केशेष्वाकृष्य तस्य सः ।
राक्षसस्य शिरश्छेत्तुं प्रारेभे स विदूषकः ॥ २६५ ॥
तत्क्षणं भीतभीतश्च तमुवाच स राक्षसः ।
मा मां वधीः सुसत्त्वस्त्वं तत्कुरुष्व कृपामिति ॥ २६६ ॥
किंनामा त्वं च केयं च तव चेष्टेति तेन सः ।
मुक्तः पृष्टश्च वीरेण पुनराह स्म राक्षसः ॥ २६७ ॥
यमदंष्ट्राभिधानस्य ममाभूतां सुते इमे ।
इयमेका तथा सा च पौण्ड्रवर्धनवर्तिनी ॥ २६८ ॥
अवीरपुरुषासङ्गाद्रक्षणीये नृपात्मजे ।
शंकराज्ञाप्रसादो हि ममाभूदयमीदृशः ॥ २६९ ॥
तत्रादौ बाहुरेकेन च्छिन्नो मे पौण्ड्रवर्धने ।
त्वया चाद्य जितो ऽस्मीह तत्समाप्तमिदं मम ॥ २७० ॥
तच्छ्रुत्वा स विहस्यैनं प्रत्युवाच विदूषकः ।
मयैव स भुजस्तत्र लूनस्ते पौण्ड्रवर्धने ॥ २७१ ॥
राक्षसो ऽप्यवदत्तर्हि देवांशस्त्वं न मानुषः ।
मन्ये त्वदर्थ एवाभूच्छार्वाज्ञानुग्रहः स मे ॥ २७२ ॥
तदिदानीं सुहृन्मे त्वं यदा मां च स्मरिष्यसि ।
तदाहं संनिधास्ये ते सिद्धये संकटेष्वपि ॥ २७३ ॥

एवं स राक्षसो मैत्र्याद्दरयित्वा विदूषकं ।
तेनाभिनन्दितवचा यमदंष्ट्रस्तिरोदधे ॥ २७४ ॥
विदूषको ऽपि सानन्दमभिनन्दितविक्रमः ।
राजपुत्र्या तया तत्र दृष्टस्तामनयन्निशां ॥ २७५ ॥
प्रातश्च ज्ञातवृत्तान्तस्तुष्टस्तस्मै ददौ नृपः ।
विभवैः सह शौर्यैकपताकामिव तां सुतां ॥ २७६ ॥
स तया समं तत्रासीद्रात्रीः काश्चिद्विदूषकः ।
पदात्पदमनुच्छत्या लक्ष्म्येव गुणबद्धया ॥ २७७ ॥
एकदा च निशि स्वैरं ततः प्रायात्प्रियोत्सुकः ।
लब्धदिव्यरसास्वादः को हि रज्येद्रसान्तरे ॥ २७८ ॥
नगराच्च विनिर्गत्य स तं सस्मार राक्षसं ।
स्मृतमात्रागतं तं च जगाद रचितानतिं ॥ २७९ ॥
सिद्धक्षेत्रे प्रयातव्यमुदयाद्रौ मया सखे ।
भद्राविद्याधरीहेतोरतस्त्वं तत्र मां नय ॥ २८० ॥
तथेत्युक्तवतस्तस्य स्कन्धमारुह्य रक्षसः ।
ययौ च स तया रात्र्या दुर्गमां षष्टियोजनीं ॥ २८१ ॥
प्रातश्च तीर्त्वा शितोदामलङ्घ्यां मानुषैर्नदीं ।
उदयाद्रेरथ प्रापत्संनिकर्षमितस्ततः ॥ २८२ ॥
अयं स पर्वतः श्रीमानुदयाख्यः पुरस्तव ।
अत्रोपरि च नास्त्येव सिद्धधाम्नि गतिर्मम ॥ २८३ ॥
इत्युक्त्वा राक्षसे तस्मिन्प्राप्तानुज्ञे तिरोहिते ।
दीर्घिकां स ददर्शैकां रम्यां तत्र विदूषकः ॥ २८४ ॥
वदन्त्याः स्वागतमिव भ्रमद्भ्रमरगुञ्जितैः ।
तस्यास्तीरे न्यषीदच्च फुल्लपद्माननश्रियः ॥ २८५ ॥

स्त्रीणामिवात्र चापश्यत्पदपङ्क्तिं सुविस्तरां ।
अयं प्रियागृहे मार्गस्तवेति ब्रुवतीमिव ॥ २८६ ॥
अलङ्घ्यो ऽयं गिरिर्मर्त्यैस्तदिहैव वरं क्षणं ।
स्थितो भवामि पश्यामि कस्येयं पदपद्धतिः ॥ २८७ ॥
इति चिन्तयतस्तस्य तत्र तोयार्थमाययुः ।
गृहीतकाञ्चनघटा भव्याः सुबह्वः स्त्रियः ॥ २८८ ॥
वारिपूरितकुम्भाश्च ताः स पप्रच्छ योषितः ।
कस्येदं नीयते तोयमिति प्रणयपेशलं ॥ २८९ ॥
आस्ते विद्याधरी भद्र भद्रा नामात्र पर्वते ।
इदं स्नानोदकं तस्या इति ताश्च तमब्रुवन् ॥ २९० ॥
चित्रं धातैव धीराणामारब्धोद्दामकर्मणां ।
परितुष्येव सामग्रीं घटयत्युपयोगिनीं ॥ २९१ ॥
यदेका सहसैव स्त्री तासां मध्यादुवाच तं ।
महाभाग मम स्कन्धे कुम्भ उत्क्षिप्यतामिति ॥ २९२ ॥
तथेति च घटे तस्याः स्कन्धोत्क्षिप्ते स बुद्धिमान् ।
निदधे भद्रया पूर्वं दत्तं रत्नाङ्गुलीयकं ॥ २९३ ॥
उपाविशच्च तत्रैव स पुनर्दीर्घिकातटे ।
ताश्च तज्जलमादाय ययुर्भद्रागृहं स्त्रियः ॥ २९४ ॥
तत्र ताभिश्च भद्राया यावत्स्नानाम्बु दीयते ।
तावत्तस्यास्तदुत्सङ्गे निपपाताङ्गुलीयकं ॥ २९५ ॥
तद्दृष्ट्वा प्रत्यभिज्ञाय भद्रा पप्रच्छ ताः सखीः ।
दृष्टः किं को ऽपि युष्माभिरिहापूर्वः पुमानिति ॥ २९६ ॥
दृष्ट एको युवास्माभिर्मानुषो वापिकातटे ।
तेनोत्क्षिप्तो घटश्चायमिति प्रत्यब्रुवंश्च ताः ॥ २९७ ॥

ततो भद्राब्रवीच्छीघ्रं प्रकृतस्नानमण्डनं ।
इहानयत गत्वा तं स हि भर्ता ममागतः ॥ २९८ ॥
इत्युक्ते भद्रया गत्वा यथावस्तु निवेद्य च ।
स्नातश्च तद्वयस्याभिस्तत्रानिन्ये विदूषकः ॥ २९९ ॥
प्राप्तश्च स ददर्शात्र भद्रां मार्गोन्मुखीं चिरात् ।
निजसत्वतरोः साक्षात्पक्वामिव फलश्रियं ॥ ३०० ॥
सापि दृष्ट्वा तमुत्थाय हर्षबाष्पाम्बुशीकरैः ।
दत्तार्घेव बबन्धास्य कण्ठे भुजलतास्रजं ॥ ३०१ ॥
परस्परालिङ्गितयोस्तयोः स्वेदच्छलादिव ।
अतिपीडनतः स्नेहः सस्यन्दे चिरसंभृतः ॥ ३०२ ॥
अथोपविष्टावन्योऽन्यमवितृप्तौ विलोकने ।
उभौ शतगुणीभूतामिवोत्कण्ठामुदूहतुः ॥ ३०३ ॥
आगतोऽसि कथं भूमिमिमामिति च भद्रया ।
परिपृष्टः स तत्कालमुवाचेदं विदूषकः ॥ ३०४ ॥
समालम्ब्य भवत्स्नेहमारुह्य प्राणसंशयान् ।
सुबहूनागतोऽस्मीह किमन्यद्वच्मि सुन्दरि ॥ ३०५ ॥
तच्छ्रुत्वा तस्य दृष्ट्वा तामनपेक्षितजीवितां ।
प्रीतिं कष्टागतं स्नेहात्सा भद्रा तमभाषत ॥ ३०६ ॥
आर्यपुत्र न मे कार्यं साध्वीभिर्न च सिद्धिभिः ।
त्वं मे प्राणा गुणैः क्रीता दासी चाहं तव प्रभो ॥ ३०७ ॥
विदूषकस्ततोऽवादीत्तर्ह्यागच्छ मया सह ।
मुक्त्वा दिव्यमिमं भोगं वस्तुमुज्जयिनीं प्रिये ॥ ३०८ ॥
तथेति प्रतिपेदे सा भद्रा सपदि तद्वचः ।
तत्संकल्पपरिभ्रष्टा विद्याश्च तृणवज्जहौ ॥ ३०९ ॥

ततस्तया समं तत्र स विशश्राम तां निशां ।
कृतोपचारस्तत्सख्या योगेश्वर्या विदूषकः ॥ ३१० ॥
प्रातश्च भद्रया साकमवतीर्योदयाद्रितः ।
सस्मार यमदंष्ट्रं तं राक्षसं स पुनः कृती ॥ ३११ ॥
स्मृतमात्रागतस्योक्त्वा गन्तव्याध्वक्रमं निजं ।
तस्यारुरोह स स्कन्धे भद्रामारोप्य तां पुरः ॥ ३१२ ॥
सापि सेहे तदत्युग्रराक्षसांशाधिरोपणं ।
अनुरागपरायत्ताः कुर्वते किं न योषितः ॥ ३१३ ॥
रक्षोऽधिरूढश्च ततः स प्रतस्थे प्रियासखः ।
विदूषकः पुनः प्राप तच्च कार्कोटकं पुरं ॥ ३१४ ॥
रक्षोदर्शनसत्रासं तत्र चालोकितो जनैः ।
दृष्ट्वार्यवर्मनृपतिं स्वां भार्यां मार्गति स्म सः ॥ ३१५ ॥
दत्तां तेन गृहीत्वा च तत्सुतां तां भुजार्जितां ।
तथैव राक्षसारूढः स प्रतस्थे पुरात्ततः ॥ ३१६ ॥
गत्वाम्बुधेस्तटे प्राप पापं तं वणिजं च सः ।
येनास्य वारिधौ पूर्वं छिन्नाः क्षिप्तस्य रज्जवः ॥ ३१७ ॥
जहार तस्य च सुतां वणिजः स धनैः सह ।
प्रागम्बुधिप्रवहणप्रमोचनपणार्जितां ॥ ३१८ ॥
धनापहारमेवास्य वधं मेने सपाप्मनः ।
कदर्याणां परे प्राणाः प्रायेण ह्यर्थसंचयाः ॥ ३१९ ॥
ततो रक्षोरथारूढस्तामादाय वणिक्सुतां ।
स भद्राराजपुत्रीभ्यां सहैवोदपतन्नभः ॥ ३२० ॥
दर्शयन्निजकान्तानां व्योममार्गेण ततार च ।
विलसत्सत्त्वसंरम्भं स्वपौरुषमिवाम्बुधिं ॥ ३२१ ॥

प्राप तच्च स भूयो ऽपि नगरं पौण्ड्रवर्धनं ।
दृष्टः सविस्मयं सर्वैर्वाहीकृतराक्षसः ॥ ३२२ ॥
तत्र तां देवसेनस्य सुतां राज्ञश्चिरोत्सुकां ।
भार्यां संभावयामास राक्षसावज्ञयार्जितां ॥ ३२३ ।
रुध्यमानो ऽपि तत्पित्रा स स्वदेशसमुत्सुकः ।
गृहीत्वा तामपि ततः प्रायादुज्जयिनीं प्रति ॥ ३२४ ॥
अचिरेण च तां प्राप पुरीं राक्षसवेगतः ।
बहिर्गतामिवात्मीयदेशदर्शननिर्वृतिं ॥ ३२५ ॥
अथोपरि स्थितस्तस्य महाकायस्य रक्षसः ।
अंशस्थतद्वधूचक्रकान्तिप्रकटितात्मनः ॥ ३२६ ॥
स जनैर्ददृशे तत्र शिखरज्वलितौषधेः ।
शशाङ्क इव पूर्वाद्रेरुदयस्थो विदूषकः ॥ ३२७ ॥
ततो विस्मितवित्रस्ते जने बुद्ध्वात्र भूपतिः ।
आदित्यसेनो निरगाच्छ्वशुरो ऽस्य तदा पुरः ॥ ३२८ ॥
विदूषकस्तु दृष्ट्वा तमवतीर्याशु राक्षसात् ।
प्रणम्य नृपमभ्यागाद्भूपो ऽप्यभिननन्द तं ॥ ३२९ ॥
अवतार्यैव तत्स्कन्धात्ताः स्वभार्यास्ततो ऽखिलाः ।
मुमोच कामचाराय राक्षसं स विदूषकः ॥ ३३० ॥
गते च राक्षसे तस्मिन्स तेन सह भूभृता ।
श्वशुरेण सभार्यः सन्प्राविशद्राजमन्दिरं ॥ ३३१ ॥
तत्र तां प्रथमां भार्यां तनयां तस्य भूपतेः ।
आनन्दयदुपागत्य चिरोत्कण्ठावशीकृतां ॥ ३३२ ॥
कथमेतास्त्वया भार्याः प्राप्ताः कश्चैष राक्षसः ।
इति पृष्टः स राज्ञात्र सर्वमस्मै शशंस तद् ॥ ३३३ ॥

ततः प्रभावतुष्टेन तेन तस्य महीक्षिता ।
जामातुर्निजराज्यार्धं प्रदत्तं कार्यवेदिना ॥ ३३४ ॥
तत्क्षणाच्च स राजाभूद्विप्रो भूत्वा विदूषकः ।
समुच्छ्रितसितच्छत्रो विधूतोभयचामरः ॥ ३३५ ॥
तदा च मङ्गलातोद्यवाद्यनिर्ह्रादनिर्भरा ।
प्रहर्षमुज्जगादेव रराजोज्जयिनी पुरी ॥ ३३६ ॥
इत्याप्तराज्यविभवः क्रमशः स कृत्स्नां जित्वा महीमखिलराजकपूजिताङ्घ्रिः ।
ताभिः समं विगतमत्सरनिर्वृताभिर्भद्रासखश्चिररमंस्त निजप्रियाभिः ॥ ३३७ ॥
इत्यनुकूले दैवे भवति निजं सत्त्वमेव धीराणां ।
लक्ष्मीरभसाकर्षणसिद्धमहामोहमन्त्रत्वं ॥ ३३८ ॥

॥ इति विदूषककथा समाप्ता ॥

# 19 HYMNEN AUS DEM ṚGVEDA.

## HYMNE I.

अग्निमीळे पुरोहितं यज्ञस्य देवमृत्विजं । होतारं रत्नधातमं ॥ १ ॥
अग्निः पूर्वेभिर्ऋषिभिरीड्यो नूतनैरुत । स देवाँ एह वक्षति ॥ २ ॥
अग्निना रयिमश्नवत्पोषमेव दिवे दिवे । यशसं वीरवत्तमं ॥ ३ ॥
अग्ने यं यज्ञमध्वरं विश्वतः परिभूरसि । स इद्देवेषु गच्छति ॥ ४ ॥
अग्निर्होता कविक्रतुः सत्यश्चित्रश्रवस्तमः । देवो देवेभिरागमत् ॥ ५ ॥
यदङ्ग दाशुषे त्वमग्ने भद्रं करिष्यसि । तवेत्तत्सत्यमङ्गिरः ॥ ६ ॥

---

## HYMNE I.

अग्निमीळे पुरोहितं । यज्ञस्य देवमृत्विजं । होतारं रत्नधातमं ॥ १ ॥
अग्निः पूर्वेभिर्ऋषिभिः । ईड्यो नूतनैरुत । स देवाँ एह वक्षति ॥ २ ॥
अग्निना रयिमश्नवत् । पोषमेव दिवे दिवे । यशसं वीरवत्तमं ॥ ३ ॥
अग्ने यं यज्ञमध्वरं । विश्वतः परिभूरसि । स इद्देवेषु गच्छति ॥ ४ ॥
अग्निर्होता कविक्रतुः । सत्यश्चित्रश्रवस्तमः । देवो देवेभिरागमत् ॥ ५ ॥
यदङ्ग दाशुषे त्वं । अग्ने भद्रं करिष्यसि । तवेत्तत्सत्यमङ्गिरः ॥ ६ ॥

---

## HYMNE I.

अग्निम् ईडे पुरोहितम् । यज्ञस्य देवम् ऋत्विजम् । होतारम् रत्नधातमम् ॥ १ ॥
अग्निस् पूर्वेभिस् ऋषिभिस् । ईड्यस् नूतनैस् उत । सस् देवान् आ इह वक्षति ॥ २ ॥
अग्निना रयिम् अश्नवत् । पोषम् एव दिवे दिवे । यशसम् वीरवत्तमम् ॥ ३ ॥
अग्ने यम् यज्ञम् अध्वरम् । विश्वतस् परिभूस् असि । सस् इद् देवेषु गच्छति ॥ ४ ॥
अग्निस् होता कविक्रतुस् । सत्यस् चित्रश्रवस्तमस् । देवस् देवेभिस् आ-गमत् ॥ ५ ॥
यद् अङ्ग दाशुषे त्वम् । अग्ने भद्रम् करिष्यसि । तव इद् तद् सत्यम् अङ्गिरस् ॥ ६ ॥

उप त्वाग्ने दिवे दिवे दोषावस्तर्धिया वयं । नमो भरन्त एमसि ॥ ७ ॥
राजन्तमध्वराणां गोपामृतस्य दीदिविं । वर्धमानं स्वे दमे ॥ ८ ॥
स नः पितेव सूनवे ऽग्ने सूपायनो भव । सचस्वा नः स्वस्तये ॥ ९ ॥

## HYMNE II.

1.

वायवायाहि दर्शतेमे सोमा अरंकृताः । तेषां पाहि श्रुधी हवं ॥ १ ॥
वाय उक्थेभिर्जरन्ते त्वामच्छा जरितारः । सुतसोमा अहर्विदः ॥ २ ॥
वायो तव प्रपृञ्चती धेना जिगाति दाशुषे । उरूची सोमपीतये ॥ ३ ॥

---

उप त्वाग्ने दिवेदिवे । दोषावस्तर्धिया वयं । नमो भरन्त एमसि ॥ ७ ॥
राजन्तमध्वराणां । गोपामृतस्य दीदिविं । वर्धमानं सुए दमे ॥ ८ ॥
सं नः पितेव सूनवे । अग्ने सूपायनो भव । सचस्वा नः सुअस्तये ॥ ९ ॥

## HYMNE II.

1.

वायवायाहि दर्शत । इमे सोमा अरंकृताः । तेषां पाहि श्रुधी हवं ॥ १ ॥
वाय उक्थेभिर्जरन्ते । तुआमच्छा जरितारः । सुतसोमा अहर्विदः ॥ २ ॥
वायो तव प्रपृञ्चती । धेना जिगाति दाशुषे । उरूची सोमपीतये ॥ ३ ॥

---

उप त्वा अग्ने दिवेदिवे । दोषावस्तर् धिया वयम् । नमस् भरन्तस् आ-इमसि ॥ ७ ॥
राजन्तम् अध्वराणाम् । गोपाम् ऋतस्य दीदिविम् । वर्धमानम् स्वे दमे ॥ ८ ॥
सस् नस् पिता इव सूनवे । अग्ने सूपायनस् भव । सचस्व नस् स्वस्तये ॥ ९ ॥

## HYMNE II.

1.

वायो आ-याहि दर्शत । इमे सोमास् अरंकृतास् । तेषाम् पाहि श्रुधि हवम् ॥ १ ॥
वायो उक्थेभिस् जरन्ते । त्वाम् अच्छ जरितारस् । सुतसोमास् अहर्विदस् ॥ २ ॥
वायो तव प्रपृञ्चती । धेना जिगाति दाशुषे । उरूची सोमपीतये ॥ ३ ॥

2.

इन्द्रवायू इमे सुता उप प्रयोभिरागतं । इन्दवो वामुशन्ति हि ॥ १ ॥
वायविन्द्रश्च चेतथः सुतानां वाजिनीवसू । तावायातमुप द्रवत् ॥ २ ॥
वायविन्द्रश्च सुन्वत आयातमुप निष्कृतं । मक्ष्वित्था धिया नरा ॥ ३ ॥

3.

मित्रं हुवे पूतदक्षं वरुणं च रिशादसं । धियं घृताचीं साधन्ता ॥ १ ॥
ऋतेन मित्रावरुणावृतावृधावृतस्पृशा । क्रतुं बृहन्तमाशाथे ॥ २ ॥
कवी नो मित्रावरुणा तुविजाता उरुक्षया । दक्षं दधाते अपसं ॥ ३ ॥

---

2.

इन्द्रवायू इमे सुताः । उप प्रयोभिरागतं । इन्दवो वामुशन्ति हि ॥ १ ॥
वायविन्द्रश्च चेतथः । सुतानां वाजिनीवसू । तावायातमुप द्रवत् ॥ २ ॥
वायविन्द्रश्च सुन्वतः । आयातमुप निष्कृतं । मक्षु इत्था धिया नरा ॥ ३ ॥

3.

मित्रं हुवे पूतदक्षं । वरुणं च रिशादसं । धियं घृताचीं साधन्ता ॥ १ ॥
ऋतेन मित्रावरुणा । ऋतावृधावृतस्पृशा । क्रतुं बृहन्तमाशाथे ॥ २ ॥
कवी नो मित्रावरुणा । तुविजाता उरुक्षया । दक्षं दधाते अपसं ॥ ३ ॥

---

2.

इन्द्रवायू इमे सुतास् । उप प्रयोभिस् आ-गतम् । इन्दवस् वाम् उशन्ति हि ॥ १ ॥
वायो इन्द्रस् च चेतथस् । सुतानाम् वाजिनीवसू । तौ आ-यातम् उप द्रवत् ॥ २ ॥
वायो इन्द्रस् च सुन्वतस् । आ-यातम् उप निष्कृतम् । मक्षु इत्था धिया नरा ॥ ३ ॥

3.

मित्रम् हुवे पूतदक्षम् । वरुणम् च रिशादसम् । धियम् घृताचीम् साधन्ता ॥ १ ॥
ऋतेन मित्रावरुणा । ऋतवृधौ ऋतस्पृशा । क्रतुम् बृहन्तम् आशाथे ॥ २ ॥
कवी नस् मित्रावरुणा । तुविजाता उरुक्षया । दक्षम् दधाते अपसम् ॥ ३ ॥

## HYMNE III.

1.

अश्विना यज्वरीरिषो द्रवत्पाणी शुभस्पती । पुरुभुजा चनस्यतं ॥ १ ॥

अश्विना पुरुदंससा नरा शवीरया धिया । धिष्ण्या वनतं गिरः ॥ २ ॥

दस्रा युवाकवः सुता नासत्या वृक्तबर्हिषः । आयातं रुद्रवर्तनी ॥ ३ ॥

2.

इन्द्रायाहि चित्रभानो सुता इमे त्वायवः । अण्वीभिस्तना पूतासः ॥ १ ॥

इन्द्रायाहि धियेषितो विप्रजूतः सुतावतः । उप ब्रह्माणि वाघतः ॥ २ ॥

इन्द्रायाहि तूतुजान उप ब्रह्माणि हरिवः । सुते दधिष्व नश्चनः ॥ ३ ॥

---

## HYMNE III.

1.

अश्विना यज्वरीरिषः । द्रवत्पाणी शुभस्पती । पुरुभुजा चनस्यतं ॥ १ ॥

अश्विना पुरुदंससा । नरा शवीरया धिया । धिष्ण्या वनतं गिरः ॥ २ ॥

दस्रा युवाकवः सुताः । नासत्या वृक्तबर्हिषः । आयातं रुद्रवर्तनी ॥ ३ ॥

2.

इन्द्रायाहि चित्रभानो । सुता इमे त्वायवः । अण्वीभिस्तना पूतासः ॥ १ ॥

इन्द्रायाहि धियेषितः । विप्रजूतः सुतावतः । उप ब्रह्माणि वाघतः ॥ २ ॥

इन्द्रायाहि तूतुजानः । उप ब्रह्माणि हरिवः । सुते दधिष्व नश्चनः ॥ ३ ॥

---

## HYMNE III.

1.

अश्विना यज्वरीस् इषस् । द्रवत्पाणी शुभस् पती । पुरुभुजा चनस्यतम् ॥ १ ॥

अश्विना पुरुदंससा । नरा शवीरया धिया । धिष्ण्या वनतम् गिरस् ॥ २ ॥

दस्रा युवाकवस् सुतास् । नासत्या वृक्तबर्हिषस् । आ-यातम् रुद्रवर्तनी ॥ ३ ॥

2.

इन्द्र आ-याहि चित्रभानो । सुतास् इमे त्वायवस् । अण्वीभिस् तना पूतासस् ॥ १ ॥

इन्द्र आ-याहि धिया इषितस् । विप्रजूतस् सुतवतस् । उप ब्रह्माणि वाघतस् ॥ २ ॥

इन्द्र आ-याहि तूतुजानस् । उप ब्रह्माणि हरिवस् । सुते दधिष्व नस् चनस् ॥ ३ ॥

3.

ओमासश्चर्षणीधृतो विश्वे देवास आगत । दाश्वांसो दाशुषः सुतं ॥ १ ॥
विश्वे देवासो अप्तुरः सुतमागन्त तूर्णयः । उस्रा इव स्वसराणि ॥ २ ॥
विश्वे देवासो अस्रिध एहिमायासो अद्रुहः । मेधं जुषन्त वह्नयः ॥ ३ ॥

4.

पावका नः सरस्वती वाजेभिर्वाजिनीवती । यज्ञं वष्टु धियावसुः ॥ १ ॥
चोदयित्री सूनृतानां चेतन्ती सुमतीनां । यज्ञं दधे सरस्वती ॥ २ ॥
महो अर्णः सरस्वती प्रचेतयति केतुना । धियो विश्वा विराजति ॥ ३ ॥

---

3.

ओमासश्चर्षणीधृतः । विश्वे देवास आगत । दाश्वांसो दाशुषः सुतं ॥ १ ॥
विश्वे देवासो अप्तुरः । सुतमागन्त तूर्णयः । उस्रा इव स्वसराणि ॥ २ ॥
विश्वे देवासो अस्रिधः । एहिमायासो अद्रुहः । मेधं जुषन्त वह्नयः ॥ ३ ॥

4.

पावका नः सरस्वती । वाजेभिर्वाजिनीवती । यज्ञं वष्टु धियावसुः ॥ १ ॥
चोदयित्री सूनृतानां । चेतन्ती सुमतीनां । यज्ञं दधे सरस्वती ॥ २ ॥
महो अर्णः सरस्वती । प्रचेतयति केतुना । धियो विश्वा विराजति ॥ ३ ॥

---

3.

ओमासस् चर्षणीधृतस् । विश्वे देवासस् आ-गत । दाश्वांसस् दाशुषस् सुतम् ॥ १ ॥
विश्वे देवासस् अप्तुरस् । सुतम् आ-गन्त तूर्णयस् । उस्रास् इव स्वसराणि ॥ २ ॥
विश्वे देवासस् अस्रिधस् । एहिमायासस् अद्रुहस् । मेधम् जुषन्त वह्नयस् ॥ ३ ॥

4.

पावका नस् सरस्वती । वाजेभिस् वाजिनीवती । यज्ञम् वष्टु धियावसुस् ॥ १ ॥
चोदयित्री सूनृतानाम् । चेतन्ती सुमतीनाम् । यज्ञम् दधे सरस्वती ॥ २ ॥
महस् अर्णास् सरस्वती । प्र-चेतयति केतुना । धियस् विश्वास् वि-राजति ॥ ३ ॥

## HYMNE IV.

सुरूपकृत्नुमूतये सुदुघामिव गोदुहे । जुहूमसि द्यविद्यवि ॥ १ ॥

उप नः सवनागहि सोमस्य सोमपाः पिब । गोदा इद्रेवतो मदः ॥ २ ॥

अथा ते अन्तमानां विद्याम सुमतीनां । मा नो अतिख्य आगहि ॥ ३ ॥

परेहि विग्रमस्तृतमिन्द्रं पृच्छा विपश्चितं । यस्ते सखिभ्य आ वरं ॥ ४ ॥

उत ब्रुवन्तु नो निदो निरन्यतश्चिदारत । दधाना इन्द्र इद्दुवः ॥ ५ ॥

उत नः सुभगाँ अरिर्वोचेयुर्दस्म कृष्टयः । स्यामेदिन्द्रस्य शर्मणि ॥ ६ ॥

एमाशुमाशवे भर यज्ञश्रियं नृमादनं । पतयन्मन्दयत्सखं ॥ ७ ॥

## HYMNE IV.

सुरूपकृत्नुमूतये । सुदुघामिव गोदुहे । जुहूमसि द्यविद्यवि ॥ १ ॥

उप नः सवनागहि । सोमस्य सोमपाः पिब । गोदा इद्रेवतो मदः ॥ २ ॥

अथा ते अन्तमानां । विद्याम सुमतीनां । मा नो अतिख्य आगहि ॥ ३ ॥

परेहि विग्रमस्तृतं । इन्द्रं पृच्छा विपश्चितं । यस्ते सखिभ्य आ वरं ॥ ४ ॥

उत ब्रुवन्तु नो निदः । निरन्यतश्चिदारत । दधाना इन्द्र इद्दुवः ॥ ५ ॥

उत नः सुभगाँ अरिः । वोचेयुर्दस्म कृष्टयः । स्यामेदिन्द्रस्य शर्मणि ॥ ६ ॥

एमाशुमाशवे भर । यज्ञश्रियं नृमादनं । पतयन्मन्दयत्सखं ॥ ७ ॥

## HYMNE IV.

सुरूपकृत्नुम् ऊतये । सुदुघामिव गोदुहे । जुहूमसि द्यवि द्यवि ॥ १ ॥

उप नस् सवना आ-गहि । सोमस्य सोमपास् पिब । गोदास् इद् रेवतस् मदस् ॥ २ ॥

अथ ते अन्तमानाम् । विद्याम सुमतीनाम् । मा नस् अति-ख्यस् आ-गहि ॥ ३ ॥

परा-इहि विग्रम् अस्तृतम् । इन्द्रम् पृच्छ विपश्चितम् । यस् ते सखिभ्यस् आ वरम् ॥ ४ ॥

उत ब्रुवन्तु नस् निदस् । निस् अन्यतस् चिद् आरत । दधानास् इन्द्रे इद् दुवस् ॥ ५ ॥

उत नस् सुभगान् अरिस् । वोचेयुस् दस्म कृष्टयस् । स्याम इद् इन्द्रस्य शर्मणि ॥ ६ ॥

आ ईम् आशुम् आशवे भर । यज्ञश्रियम् नृमादनम् । पतयत् मन्दयत्सखम् ॥ ७ ॥

अस्य पीत्वा शतक्रतो घनो वृत्राणामभवः । प्रावो वाजेषु वाजिनं ॥ ८ ॥
तं त्वा वाजेषु वाजिनं वाजयामः शतक्रतो । धनानामिन्द्र सातये ॥ ९ ॥
यो रायो ऽवनिर्महान्त्सुपारः सुन्वतः सखा । तस्मा इन्द्राय गायत ॥ १० ॥

## HYMNE V.

आ त्वेता निषीदतेन्द्रमभि प्रगायत । सखायः स्तोमवाहसः ॥ १ ॥
पुरूतमं पुरूणामीशानं वार्याणां । इन्द्रं सोमे सचा सुते ॥ २ ॥
स घा नो योग आभुवत्स राये स पुरन्ध्यां । गमद्वाजेभिरा स नः ॥ ३ ॥

---

अस्य पीत्वा शतक्रतो । घनो वृत्राणामभवः । प्रावो वाजेषु वाजिनं ॥ ८ ॥
तं त्वा वाजेषु वाजिनं । वाजयामः शतक्रतो । धनानामिन्द्र सातये ॥ ९ ॥
यो रायो अवनिर्महान् । सुपारः सुन्वतः सखा । तस्मा इन्द्राय गायत ॥ १० ॥

## HYMNE V.

आ तु एता निषीदत । इन्द्रमभि प्रगायत । सखायः स्तोमवाहसः ॥ १ ॥
पुरूतमं पुरूणाआं । ईशानं वारिआणाआं । इन्द्रं सोमे सचा सुते ॥ २ ॥
स घा नो योग आभुवत् । स राये स पुरंध्यां । गमद्वाजेभिरा स नः ॥ ३ ॥

---

अस्य पीत्वा शतक्रतो । घनस् वृत्राणाम् अभवस् । प्र-आवर् वाजेषु वाजिनम् ॥ ८ ॥
तम् त्वा वाजेषु वाजिनम् । वाजयामस् शतक्रतो । धनानाम् इन्द्र सातये ॥ ९ ॥
यस् रायस् अवनिस् महान् । सुपारस् सुन्वतस् सखा । तस्मै इन्द्राय गायत ॥ १० ॥

## HYMNE V.

आ तु आ-इत नि-सीदत । इन्द्रम् अभि प्र-गायत । सखायस् स्तोमवाहसस् ॥ १ ॥
पुरुतमम् पुरूणाम् । ईशानम् वार्याणाम् । इन्द्रम् सोमे सचा सुते ॥ २ ॥
सस् घ नस् योगे आ-भुवत् । सस् राये सस् पुरंध्याम् । गमत् वाजेभिस् आ सस् नस् ॥ ३ ॥

यस्य संस्थे न वृण्वते हरी समत्सु शत्रवः । तस्मा इन्द्राय गायत ॥ ४ ॥
सुतपाव्ने सुता इमे शुचयो यन्ति वीतये । सोमासो दध्याशिरः ॥ ५ ॥
त्वं सुतस्य पीतये सद्यो वृद्धो अजायथाः । इन्द्र ज्यैष्ठ्याय सुक्रतो ॥ ६ ॥
आ त्वा विशन्त्वाशवः सोमास इन्द्र गिर्वणः । शं ते सन्तु प्रचेतसे ॥ ७ ॥
त्वां स्तोमा अवीवृधन्त्वामुक्था शतक्रतो । त्वां वर्धन्तु नो गिरः ॥ ८ ॥
अक्षितोतिः सनेदिमं वाजमिन्द्रः सहस्रिणं । यस्मिन्विश्वानि पौंस्या ॥ ९ ॥
मा नो मर्ता अभिद्रुहन्तनूनामिन्द्र गिर्वणः । ईशानो यवया वधं ॥ १० ॥

---

यस्य संस्थे न वृण्वते । हरी समत्सु शत्रवः । तस्मा इन्द्राय गायत ॥ ४ ॥
सुतपाव्ने सुता इमे । शुचयो यन्ति वीतये । सोमासो दधिआशिरः ॥ ५ ॥
तुअं सुतस्य पीतये । सद्यो वृद्धो अजायथाः । इन्द्र ज्यैष्ठ्याय सुक्रतो ॥ ६ ॥
आ त्वा विशन्तु आशवः । सोमास इन्द्र गिर्वणः । शं ते सन्तु प्रचेतसे ॥ ७ ॥
तुअं स्तोमा अवीवृधन् । तुअमुक्था शतक्रतो । तुअं वर्धन्तु नो गिरः ॥ ८ ॥
अक्षितोतिः सनेदिमं । वाजमिन्द्रः सहस्रिणं । यस्मिन्विश्वानि पौंसिआ ॥ ९ ॥
मा नो मर्ता अभिद्रुहन् । तनूनामिन्द्र गिर्वणः । ईशानो यवया वधं ॥ १० ॥

---

यस्य संस्थे न वृण्वते । हरी समत्सु शत्रवस् । तस्मै इन्द्राय गायत ॥ ४ ॥
सुतपाव्ने सुतास् इमे । शुचयस् यन्ति वीतये । सोमासस् दध्याशिरस् ॥ ५ ॥
त्वम् सुतस्य पीतये । सद्यस् वृद्धस् अजायथास् । इन्द्र ज्यैष्ठ्याय सुक्रतो ॥ ६ ॥
आ त्वा विशन्तु आशवस् । सोमासस् इन्द्र गिर्वणस् । शम् ते सन्तु प्रचेतसे ॥ ७ ॥
त्वाम् स्तोमास् अवीवृधन् । त्वाम् उक्था शतक्रतो । त्वाम् वर्धन्तु नस् गिरस् ॥ ८ ॥
अक्षितोतिस् सनेत् इमम् । 'वाजम् इन्द्रस् सहस्रिणम् । यस्मिन् विश्वानि पौंस्या ॥ ९ ॥
मा नस् मर्तास् अभि-द्रुहन् । तनूनाम् इन्द्र गिर्वणस् । ईशानस् यवय वधम् ॥ १० ॥

## HYMNE VI.

युञ्जन्ति ब्रध्नमरुषं चरन्तं परि तस्थुषः । रोचन्ते रोचना दिवि ॥ १ ॥
युञ्जन्त्यस्य काम्या हरी विपक्षसा रथे । शोणा धृष्णू नृवाहसा ॥ २ ॥
केतुं कृण्वन्नकेतवे पेशो मर्या अपेशसे । समुषद्भिरजायथाः ॥ ३ ॥
आदह स्वधामनु पुनर्गर्भत्वमेरिरे । दधाना नाम यज्ञियं ॥ ४ ॥
वीळु चिदारुजत्नुभिर्गुहा चिदिन्द्र वह्निभिः । अविन्द उस्रिया अनु ॥ ५ ॥
देवयन्तो यथा मतिमच्छा विदद्वसुं गिरः । महामनूषत श्रुतं ॥ ६ ॥
इन्द्रेण सं हि दृक्षसे संजग्मानो अबिभ्युषा । मन्दू समानवर्चसा ॥ ७ ॥

---

## HYMNE VI.

युञ्जन्ति ब्रध्नमरुषं । चरन्तं परि तस्थुषः । रोचन्ते रोचना दिवि ॥ १ ॥
युञ्जन्ति अस्य कामिआ । हरी विपक्षसा रथे । शोणा धृष्णू नृवाहसा ॥ २ ॥
केतुं कृण्वन्नकेतवे । पेशो मर्या अपेशसे । समुषद्भिरजायथाः ॥ ३ ॥
आदह सुअधामनु । पुनर्गर्भत्वमेरिरे । दधाना नाम यज्ञियं ॥ ४ ॥
वीळु चिदारुजत्नुभिः । गुहा चिदिन्द्र वह्निभिः । अविन्द उस्रिया अनु ॥ ५ ॥
देवयन्तो यथा मतिं । अच्छा विदद्वसुं गिरः । महामनूषत श्रुतं ॥ ६ ॥
इन्द्रेण सं हि दृक्षसे । संजग्मानो अबिभ्युषा । मन्दू समानवर्चसा ॥ ७ ॥

---

### HYMNE VI.

युञ्जन्ति ब्रध्नम् अरुषम् । चरन्तम् परि तस्थुषस् । रोचन्ते रोचना दिवि ॥ १ ॥
युञ्जन्ति अस्य काम्या । हरी विपक्षसा रथे । शोणा धृष्णू नृवाहसा ॥ २ ॥
केतुम् कृण्वन् अकेतवे । पेशस् मर्यास् अपेशसे । सम् उषद्भिस् अजायथाः ॥ ३ ॥
आत् अह स्वधाम् अनु । पुनर् गर्भत्वम् आ-ईरिरे । दधानास् नाम यज्ञियम् ॥ ४ ॥
वीळु चिद् आरुजत्नुभिस् । गुहा चिद् इन्द्र वह्निभिस् । अविन्दस् उस्रियास् अनु ॥ ५ ॥
देवयन्तस् यथा मतिम् । अच्छ विदद्वसुम् गिरस् । महाम् अनूषत श्रुतम् ॥ ६ ॥
इन्द्रेण सम् हि दृक्षसे । संजग्मानस् अबिभ्युषा । मन्दू समानवर्चसा ॥ ७ ॥

अनवद्यैरभिद्युभिर्मखः सहस्वदर्चति । गणैरिन्द्रस्य काम्यैः ॥ ८ ॥
अतः परिज्मन्ना गहि दिवो वा रोचनादधि । समस्मिन्नृञ्जते गिरः ॥ ९ ॥
इतो वा सातिमीमहे दिवो वा पार्थिवादधि । इन्द्रं महो वा रजसः ॥ १० ॥

## HYMNE VII.

इन्द्रमिद्गाथिनो बृहदिन्द्रमर्केभिरर्किणः । इन्द्रं वाणीरनूषत ॥ १ ॥
इन्द्र इद्धर्योः सचा संमिश्ल आ वचोयुजा । इन्द्रो वज्री हिरण्ययः ॥ २ ॥
इन्द्रो दीर्घाय चक्षस आ सूर्यं रोहयद्दिवि । वि गोभिरद्रिमैरयत् ॥ ३ ॥

---

अनवद्यैरभिद्युभिः । मखः सहस्वदर्चति । गणैरिन्द्रस्य काम्यैः ॥ ८ ॥
अतः परिज्मन्ना गहि । दिवो वा रोचनादधि । समस्मिन्नृञ्जते गिरः ॥ ९ ॥
इतो वा सातिमीमहे । दिवो वा पार्थिवादधि । इन्द्रं महो वा रजसः ॥ १० ॥

## HYMNE VII.

इन्द्रमिद्गाथिनो बृहत् । इन्द्रमर्केभिरर्किणः । इन्द्रं वाणीरनूषत ॥ १ ॥
इन्द्र इद्धर्योः सचा । संमिश्ल आ वचोयुजा । इन्द्रो वज्री हिरण्ययः ॥ २ ॥
इन्द्रो दीर्घाय चक्षसे । आ सूर्यं रोहयद्दिवि । वि गोभिरद्रिमैरयत् ॥ ३ ॥

---

अनवद्यैस् अभिद्युभिस् । मखस् सहस्वत् अर्चति । गणैस् इन्द्रस्य काम्यैस् ॥ ८ ॥
अतस् परिज्मन् आ-गहि । दिवस् वा रोचनात् अधि । सम् अस्मिन् ऋञ्जते गिरस् ॥ ९ ॥
इतस् वा सातिम् ईमहे । दिवस् वा पार्थिवात् अधि । इन्द्रम् महस् वा रजसस् ॥ १० ॥

## HYMNE VII.

इन्द्रम् इद् गाथिनस् बृहत् । इन्द्रम् अर्केभिस् अर्किणस् । इन्द्रम् वाणीस् अनूषत ॥ १ ॥
इन्द्रस् इद् हर्योस् सचा । संमिश्लस् आ वचोयुजा । इन्द्रस् वज्री हिरण्ययस् ॥ २ ॥
इन्द्रस् दीर्घाय चक्षसे । आ सूर्यम् रोहयत् दिवि । वि गोभिस् अद्रिम् ऐरयत् ॥ ३ ॥

इन्द्र वाजेषु नोऽव सहस्रप्रधनेषु च । उग्र उग्राभिरूतिभिः ॥ ४ ॥
इन्द्रं वयं महाधन इन्द्रमर्भे हवामहे । युजं वृत्रेषु वज्रिणं ॥ ५ ॥
स नो वृषन्नमुं चरुं सत्रादावन्नपावृधि । अस्मभ्यमप्रतिष्कुतः ॥ ६ ॥
तुञ्जे तुञ्जे य उत्तरे स्तोमा इन्द्रस्य वज्रिणः । न विन्धे अस्य सुष्टुतिं ॥ ७ ॥
वृषा यूथेव वंसगः कृष्टीरियर्त्योजसा । ईशानो अप्रतिष्कुतः ॥ ८ ॥
य एकश्चर्षणीनां वसूनामिरज्यति । इन्द्रः पञ्च क्षितीनां ॥ ९ ॥
इन्द्रं वो विश्वतस्परि हवामहे जनेभ्यः । अस्माकमस्तु केवलः ॥ १० ॥

---

इन्द्र वाजेषु नो अव । सहस्रप्रधनेषु च । उग्र उग्राभिरूतिभिः ॥ ४ ॥
इन्द्रं वयं महाधने । इन्द्रमर्भे हवामहे । युजं वृत्रेषु वज्रिणं ॥ ५ ॥
स नो वृषन्नमुं चरुं । सत्रादावन्नपावृधि । अस्मभ्यमप्रतिष्कुतः ॥ ६ ॥
तुञ्जे तुञ्जे य उत्तरे । स्तोमा इन्द्रस्य वज्रिणः । न विन्धे अस्य सुष्टुतिं ॥ ७ ॥
वृषा यूथेव वंसगः । कृष्टीरियर्ति ओजसा । ईशानो अप्रतिष्कुतः ॥ ८ ॥
य एकश्चर्षणीनां । वसूनामिरज्यति । इन्द्रः पञ्च क्षितीनां ॥ ९ ॥
इन्द्रं वो विश्वतस्परि । हवामहे जनेभ्यः । अस्माकमस्तु केवलः ॥ १० ॥

---

इन्द्र वाजेषु नस् अव । सहस्रप्रधनेषु च । उग्रस् उग्राभिस् ऊतिभिस् ॥ ४ ॥
इन्द्रम् वयम् महाधने । इन्द्रम् अर्भे हवामहे । युजम् वृत्रेषु वज्रिणम् ॥ ५ ॥
सस् नस् वृषन् अमुम् चरुम् । सत्रादावन् अप-वृधि । अस्मभ्यम् अप्रतिष्कुतस् ॥ ६ ॥
तुञ्जे तुञ्जे ये उत्तरे । स्तोमास् इन्द्रस्य वज्रिणस् । न विन्धे अस्य सुष्टुतिम् ॥ ७ ॥
वृषा यूथा इव वंसगस् । कृष्टीस् इयर्ति ओजसा । ईशानस् अप्रतिष्कुतस् ॥ ८ ॥
यस् एकस् चर्षणीनाम् । वसूनाम् इरज्यति । इन्द्रस् पञ्च क्षितीनाम् ॥ ९ ॥
इन्द्रम् वस् विश्वतस् परि । हवामहे जनेभ्यस् । अस्माकम् अस्तु केवलस् ॥ १० ॥

## HYMNE VIII.

एन्द्र सानसिं रयिं सजित्वानं सदासहं । वर्षिष्ठमूतये भर ॥ १ ॥
नि येन मुष्टिहत्यया नि वृत्रा रुणधामहै । त्वोतासो न्यर्वता ॥ २ ॥
इन्द्र त्वोतास आ वयं वज्रं घना ददीमहि । जयेम सं युधि स्पृधः ॥ ३ ॥
वयं शूरेभिरस्तृभिरिन्द्र त्वया युजा वयं । सासह्याम पृतन्यतः ॥ ४ ॥
महाँ इन्द्रः परश्च नु महित्वमस्तु वज्रिणे । द्यौर्न प्रथिना शवः ॥ ५ ॥
समोहे वा य आशत नरस्तोकस्य सनितौ । विप्रासो वा धियायवः ॥ ६ ॥
यः कुक्षिः सोमपातमः समुद्र इव पिन्वते । उर्वीरापो न काकुदः ॥ ७ ॥

## HYMNE VIII.

आ꣣ इन्द्र सानसिं꣣ रयिं꣣ । सजि꣣त्वानं सदास꣣हं । व꣣र्षिष्ठमूत꣣ये भर ॥ १ ॥
नि꣣ ये꣣न मुष्टिहत्य꣣या । नि꣣ वृ꣣त्रा रुणा꣣धामहै । त्वा꣣ऊतासो नि꣣ अर्वता ॥ २ ॥
इ꣣न्द्र त्वो꣣तास आ꣣ वयं꣣ । व꣣ज्रं घना꣣ ददीमहि । ज꣣येम सं꣣ युधि꣣ स्पृ꣣धः ॥ ३ ॥
व꣣यं शू꣣रे꣣भिरस्तृ꣣भिः । इ꣣न्द्र त्व꣣या युजा꣣ व꣣यं । सासह्याम पृतन्यतः꣣ ॥ ४ ॥
म꣣हाँ इ꣣न्द्रः प꣣रश्च नु꣣ । महित्व꣣मस्तु व꣣ज्रिणे । दिऔ꣣꣣र्न प्रथि꣣ना श꣣वः ॥ ५ ॥
समो꣣हे꣣ वा य꣣ आ꣣शत । न꣣रस्तो꣣कस्य स꣣नितौ । वि꣣प्रासो वा धियाय꣣वः ॥ ६ ॥
य꣣ः कु꣣क्षिः꣣ सो꣣मपा꣣तमः । समु꣣द्र इव पिन्वते । उ꣣र्वी꣣꣣रापो न꣣ का꣣कुदः ॥ ७ ॥

## HYMNE VIII.

आ इन्द्र सानसिम् रयिम् । सजित्वानम् सदासहम् । वर्षिष्ठम् ऊतये भर ॥ १ ॥
नि येन मुष्टिहत्यया । नि वृत्रा रुणधामहै । त्वोतासस् नि अर्वता ॥ २ ॥
इन्द्र त्वोतासस् आ वयम् । वज्रम् घना ददीमहि । जयेम सम् युधि स्पृधस् ॥ ३ ॥
वयम् शूरेभिस् अस्तृभिस् । इन्द्र त्वया युजा वयम् । सासह्याम पृतन्यतस् ॥ ४ ॥
महान् इन्द्रस् परस् च नु । महित्वम् अस्तु वज्रिणे । द्यौस् न प्रथिना शवस् ॥ ५ ॥
समोहे वा ये आशत । नरस् तोकस्य सनितौ । विप्रासस् वा धियायवस् ॥ ६ ॥
यस् कुक्षिस् सोमपातमस् । समुद्रस् इव पिन्वते । उर्वीस् आपस् न काकुदस् ॥ ७ ॥

एवा ह्यस्य सूनृता विरप्शी गोमती मही । पक्वा शाखा न दाशुषे ॥ ८ ॥
एवा हि ते विभूतय ऊतय इन्द्र मावते । सद्यश्चित्सन्ति दाशुषे ॥ ९ ॥
एवा ह्यस्य काम्या स्तोम उक्थं च शंस्या । इन्द्राय सोमपीतये ॥ १० ॥

## HYMNE IX.

इन्द्रेहि मत्स्यन्धसो विश्वेभिः सोमपर्वभिः । महाँ अभिष्टिरोजसा ॥ १ ॥
एमेनं सृजता सुते मन्दिमिन्द्राय मन्दिने । चक्रिं विश्वानि चक्रये ॥ २ ॥
मत्स्वा सुशिप्र मन्दिभिः स्तोमेभिर्विश्वचर्षणे । सचैषु सवनेष्वा ॥ ३ ॥

---

एवा हि अस्य सूनृता। विरप्शी गोमती मही। पक्वा शाखा न दाशुषे॥ ८॥
एवा हि ते विभूतयः। ऊतय इन्द्र मावते। सद्यश्चित्सन्ति दाशुषे॥ ९॥
एवा हि अस्य कामिआ। स्तोम उक्थं च शंसिआ। इन्द्राय सोमपीतये॥ १०॥

## HYMNE IX.

इन्द्रेहि मत्सि अन्धसः। विश्वेभिः सोमपर्वभिः। महाँ अभिष्टिरोजसा ॥ १॥
एमेनं सृजता सुते। मन्दिमिन्द्राय मन्दिने। चक्रिं विश्वानि चक्रये॥ २॥
मत्स्वा सुशिप्र मन्दिभिः। स्तोमेभिर्विश्वचर्षणे। सचैषु सवनेषु आ॥ ३॥

---

एव हि अस्य सूनृता । विरप्शी गोमती मही । पक्वा शाखा न दाशुषे ॥ ८ ॥
एव हि ते विभूतयस् । ऊतयस् इन्द्र मावते । सद्यस् चिद् सन्ति दाशुषे ॥ ९ ॥
एव हि अस्य काम्या । स्तोमस् उक्थम् च शंस्या । इन्द्राय सोमपीतये ॥ १० ॥

## HYMNE IX.

इन्द्र आ-इहि मत्सि अन्धसस् । विश्वेभिस् सोमपर्वभिस् । महान् अभिष्टिस् ओजसा ॥ १ ॥
आ ईम् एनम् सृजत सुते । मन्दिम् इन्द्राय मन्दिने । चक्रिम् विश्वानि चक्रये ॥ २ ॥
मत्स्व सुशिप्र मन्दिभिस् । स्तोमेभिस् विश्वचर्षणे । सचा एषु सवनेषु आ ॥ ३ ॥

असृग्रमिन्द्र ते गिरः प्रति त्वामुदहासत । सजोषा वृषभं पतिं ॥ ४ ॥
सं चोदय चित्रमर्वाग्राध इन्द्र वरेण्यं । असदित्ते विभु प्रभु ॥ ५ ॥
अस्मान्त्सु तत्र चोदयेन्द्र राये रभस्वतः । तुविद्युम्न यशस्वतः ॥ ६ ॥
सं गोमदिन्द्र वाजवदस्मे पृथु श्रवो बृहत् । विश्वायुर्धेह्यक्षितं ॥ ७ ॥
अस्मे धेहि श्रवो बृहद्द्युम्नं सहस्रसातमं । इन्द्र ता रथिनीरिषः ॥ ८ ॥
वसोरिन्द्रं वसुपतिं गीर्भिर्गृणन्त ऋग्मियं । होम गन्तारमूतये ॥ ९ ॥
सुते सुते न्योकसे बृहद्बृहत एदरिः । इन्द्राय शूषमर्चति ॥ १० ॥

---

असृग्रमिन्द्र ते गिरः । प्रति त्वामुदहासत । सजोषा वृषभं पतिं ॥ ४ ॥
संचोदय चित्रमर्वाक् । राध इन्द्र वरेण्यं । असदित्ते विभु प्रभु ॥ ५ ॥
अस्मान्त्सु तत्र चोदय । इन्द्र राये रभस्वतः । तुविद्युम्न यशस्वतः ॥ ६ ॥
सं गोमदिन्द्र वाजवत् । अस्मे पृथु श्रवो बृहत् । विश्वायुर्धेह्यक्षितं ॥ ७ ॥
अस्मे धेहि श्रवो बृहत् । द्युम्नं सहस्रसातमं । इन्द्र ता रथिनीरिषः ॥ ८ ॥
वसोरिन्द्रं वसुपतिं । गीर्भिर्गृणन्त ऋग्मियं । होम गन्तारमूतये ॥ ९ ॥
सुते सुते न्योकसे । बृहद्बृहत एदरिः । इन्द्राय शूषमर्चति ॥ १० ॥

---

असृग्रम् इन्द्र ते गिरस् । प्रति त्वाम् उद्-अहासत । सजोषास् वृषभम् पतिम् ॥ ४ ॥
सम्-चोदय चित्रम् अर्वाक् । राधस् इन्द्र वरेण्यम् । असत् इद् ते विभु प्रभु ॥ ५ ॥
अस्मान् सु तत्र चोदय । इन्द्र राये रभस्वतस् । तुविद्युम्न यशस्वतस् ॥ ६ ॥
सम् गोमत् इन्द्र वाजवत् । अस्मे पृथु श्रवस् बृहत् । विश्वायुस् धेहि अक्षितम् ॥ ७ ॥
अस्मे धेहि श्रवस् बृहत् । द्युम्नम् सहस्रसातमम् । इन्द्र तास् रथिनीस् इषस् ॥ ८ ॥
वसोस् इन्द्रम् वसुपतिम् । गीर्भिस् गृणन्तस् ऋग्मियम् । होम गन्तारम् ऊतये ॥ ९ ॥
सुते सुते न्योकसे । बृहत् बृहते आ इद् अरिस् । इन्द्राय शूषम् अर्चति ॥ १० ॥

## HYMNE X.

गायन्ति त्वा गायत्रिणोऽर्चन्त्यर्कमर्किणः ।
ब्रह्माणस्त्वा शतक्रत उद्वंशमिव येमिरे ॥ १ ॥
यत्सानोः सानुमारुहद्भूर्यस्पष्ट कर्त्वं ।
तदिन्द्रो अर्थं चेतति यूथेन वृष्णिरेजति ॥ २ ॥
युक्ष्वा हि केशिना हरी वृषणा कक्ष्यप्रा ।
अथा न इन्द्र सोमपा गिरामुपश्रुतिं चर ॥ ३ ॥

---

## HYMNE X.

गायन्ति त्वा गायत्रिणः । अर्चन्ति अर्कमर्किणः ।
ब्रह्माणस्त्वा शतक्रतो । उद्वंशमिव येमिरे ॥ १ ॥
यत्सानोः सानुमारुहत् । भूरि अस्पष्ट कर्तुअं ।
तदिन्द्रो अर्थं चेतति । यूथेन वृष्णिरेजति ॥ २ ॥
युक्ष्वा हि केशिना हरी । वृषणा कक्षिअप्रआ ।
अथा न इन्द्र सोमपाः । गिरामुपश्रुतिं चर ॥ ३ ॥

---

### HYMNE X.

गायन्ति त्वा गायत्रिणस् । अर्चन्ति अर्कम् अर्किणस् ।
ब्रह्माणस् त्वा शतक्रतो । उद् वंशम् इव येमिरे ॥ १ ॥
यद् सानोस् सानुम् आ-अरुहत् । भूरि अस्पष्ट कर्त्वम् ।
तद् इन्द्रस् अर्थम् चेतति । यूथेन वृष्णिस् एजति ॥ २ ॥
युक्ष्व हि केशिना हरी । वृषणा कक्ष्यप्रा ।
अथ नस् इन्द्र सोमपास् । गिराम् उपश्रुतिम् चर ॥ ३ ॥

एहि स्तोमाँ अभिस्वराभिगृणीह्यारुव ।
ब्रह्म च नो वसो सचेन्द्र यज्ञं च वर्धय ॥ ४ ॥
उक्थमिन्द्राय शंस्यं वर्धनं पुरुनिःषिधे ।
शक्रो यथा सुतेषु णो रारणत्सख्येषु च ॥ ५ ॥
तमित्सखित्व ईमहे तं राये तं सुवीर्ये ।
स शक्र उत नः शकदिन्द्रो वसु दयमानः ॥ ६ ॥
सुविवृतं सुनिरजमिन्द्र त्वादातमिद्यशः ।
गवामप व्रजं वृधि कृणुष्व राधो अद्रिवः ॥ ७ ॥

---

एहि स्तोमाँ अभिस्वर । अभिगृणीह्यारुव ।
ब्रह्म च नो वसो सचा । इन्द्र यज्ञं च वर्धय ॥ ४ ॥
उक्थमिन्द्राय शंसिषं । वर्धनं पुरुनिःषिधे ।
शक्रो यथा सुतेषु णः । रारणत्सखित्वेषु च ॥ ५ ॥
तमित्सखित्व ईमहे । तं राये तं सुवीरिए ।
स शक्र उत नः शकत् । इन्द्रो वसु दयमानः ॥ ६ ॥
सुविवृतं सुनिरजं । इन्द्र त्वादातमिद्यशः ।
गवामप व्रजं वृधि । कृणुष्व राधो अद्रिवः ॥ ७ ॥

---

आ-इहि स्तोमान् अभि-स्वर । अभि-गृणीहि आ-रुव ।
ब्रह्म च नस् वसो सचा । इन्द्र यज्ञम् च वर्धय ॥ ४ ॥
उक्थम् इन्द्राय शंस्यम् । वर्धनम् पुरुनिःषिधे ।
शक्रस् यथा सुतेषु नस् । रारणत् सख्येषु च ॥ ५ ॥
तम् इद् सखित्वे ईमहे । तम् राये तम् सुवीर्ये ।
सस् शक्रस् उत नस् शकत् । इन्द्रस् वसु दयमानस् ॥ ६ ॥
सुविवृतम् सुनिरजम् । इन्द्र त्वादातम् इद् यशस् ।
गवाम् अप व्रजम् वृधि । कृणुष्व राधस् अद्रिवस् ॥ ७ ॥

नहि त्वा रोदसी उभे ऋघायमाणमिन्वतः ।
जेषः स्वर्वतीरपः सं गा अस्मभ्यं धूनुहि ॥ ८ ॥
आश्रुत्कर्ण श्रुधी हवं नू चिद्दधिष्व मे गिरः ।
इन्द्र स्तोममिमं मम कृष्वा युजश्चिदन्तरं ॥ ९ ॥
विद्मा हि त्वा वृषन्तमं वाजेषु हवनश्रुतं ।
वृषन्तमस्य हूमह ऊतिं सहस्रसातमां ॥ १० ॥
आ तू न इन्द्र कौशिक मन्दसानः सुतं पिब ।
नव्यमायुः प्र सू तिर कृधी सहस्रसामृषिं ॥ ११ ॥

---

नहि त्वा रोदसी उभे । ऋघायमाणमिन्वतः ।
जेषः स्वर्वतीरपः । सं गा अस्मभ्यं धूनुहि ॥ ८ ॥
आश्रुत्कर्ण श्रुधी हवं । नू चिद्दधिष्व मे गिरः ।
इन्द्र स्तोममिमं मम । कृष्वा युजश्चिदन्तरं ॥ ९ ॥
विद्मा हि त्वा वृषन्तमं । वाजेषु हवनश्रुतं ।
वृषन्तमस्य हूमहे । ऊतिं सहस्रसातमां ॥ १० ॥
आ तू न इन्द्र कौशिक । मन्दसानः सुतं पिब ।
नव्यमायुः प्र सू तिर । कृधी सहस्रसामृषिं ॥ ११ ॥

---

न हि त्वा रोदसी उभे । ऋघायमाणम् इन्वतस् ।
जेषस् स्वर्वतीस् अपस् । सम् गास् अस्मभ्यम् धूनुहि ॥ ८ ॥
आश्रुत्कर्ण श्रुधि हवम् । नु चिद् दधिष्व मे गिरस् ।
इन्द्र स्तोमम् इमम् मम । कृष्व युजस् चिद् अन्तरम् ॥ ९ ॥
विद्म हि त्वा वृषन्तमम् । वाजेषु हवनश्रुतम् ।
वृषन्तमस्य हूमहे । ऊतिम् सहस्रसातमाम् ॥ १० ॥
आ तु नस् इन्द्र कौशिक । मन्दसानस् सुतम् पिब ।
नव्यम् आयुस् प्र सु तिर । कृधि सहस्रसाम् ऋषिम् ॥ ११ ॥

परि त्वा गिर्वणो गिर इमा भवन्तु विश्वतः ।
वृद्धायुमनु वृद्धयो जुष्टा भवन्तु जुष्टयः ॥ १२ ॥

### HYMNE XI.

इन्द्रं विश्वा अवीवृधन्त्समुद्रव्यचसं गिरः ।
रथीतमं रथीनां वाजानां सत्पतिं पतिं ॥ १ ॥
सख्ये त इन्द्र वाजिनो मा भेम शवसस्पते ।
त्वामभि प्रणोनुमो जेतारमपराजितं ॥ २ ॥

---

परि त्वा गिर्वणो गिरः । इमा भवन्तु विश्वतः ।
वृद्धायुमनु वृद्धयः । जुष्टा भवन्तु जुष्टयः ॥ १२ ॥

### HYMNE XI.

इन्द्रं विश्वा अवीवृधन् । समुद्रव्यचसं गिरः ।
रथीतमं रथीनां । वाजानां सत्पतिं पतिं ॥ १ ॥
सख्ये त इन्द्र वाजिनः । मा भेम शवसस्पते ।
त्वामभि प्रणोनुमः । जेतारमपराजितं ॥ २ ॥

---

परि त्वा गिर्वणस् गिरस् । इमास् भवन्तु विश्वतस् ।
वृद्धायुम् अनु वृद्धयस् । जुष्टास् भवन्तु जुष्टयस् ॥ १२ ॥

### HYMNE XI.

इन्द्रम् विश्वास् अवीवृधन् । समुद्रव्यचसम् गिरस् ।
रथितमम् रथिनाम् । वाजानाम् सत्पतिम् पतिम् ॥ १ ॥
सख्ये ते इन्द्र वाजिनस् । मा भेम शवसस् पते ।
त्वाम् अभि प्रणोनुमस् । जेतारम् अपराजितम् ॥ २ ॥

पूर्वीरिन्द्रस्य रातयो न विदस्यन्त्यूतयः ।
यदी वाजस्य गोमतः स्तोतृभ्यो मंहते मघं ॥ ३ ॥
पुरां भिन्दुर्युवा कविरमितौजा अजायत ।
इन्द्रो विश्वस्य कर्मणो धर्ता वज्री पुरुष्टुतः ॥ ४ ॥
त्वं वलस्य गोमतोऽपावरद्रिवो बिलं ।
त्वां देवा अबिभ्युषस्तुज्यमानास आविषुः ॥ ५ ॥
तवाहं शूर रातिभिः प्रत्यायं सिन्धुमावदन् ।
उपातिष्ठन्त गिर्वणो विदुष्टे तस्य कारवः ॥ ६ ॥

---

पूर्वीरिन्द्रस्य रातयः । न विदस्यन्ति ऊतयः ।
यदी वाजस्य गोमतः । स्तोतृभ्यो मंहते मघं ॥ ३ ॥
पुरां भिन्दुर्युवा कविः । अमितौजा अजायत ।
इन्द्रो विश्वस्य कर्मणः । धर्ता वज्री पुरुष्टुतः ॥ ४ ॥
तुअं वलस्य गोमतः । अपावरद्रिवो बिलं ।
तुआं देवा अबिभ्युषः । तुज्यमानास आविषुः ॥ ५ ॥
तवाहं शूर रातिभिः । प्रत्यायं सिन्धुमावदन् ।
उपातिष्ठन्त गिर्वणः । विदुष्टे तस्य कारवः ॥ ६ ॥

---

पूर्वीस् इन्द्रस्य रातयस् । न वि-दस्यन्ति ऊतयस् ।
यदि वाजस्य गोमतस् । स्तोतृभ्यस् मंहते मघं ॥ ३ ॥
पुराम् भिन्दुस् युवा कविस् । अमितौजास् अजायत ।
इन्द्रस् विश्वस्य कर्मणस् । धर्ता वज्री पुरुष्टुतस् ॥ ४ ॥
त्वम् वलस्य गोमतस् । अप-अवर् अद्रिवस् बिलम् ।
त्वाम् देवास् अबिभ्युषस् । तुज्यमानासस् आविषुस् ॥ ५ ॥
तव अहम् शूर रातिभिस् । प्रति-आयम् सिन्धुम् आवदन् ।
उप-अतिष्ठन्त गिर्वणस् । विदुस् ते तस्य कारवस् ॥ ६ ॥

मायाभिरिन्द्र मायिनं त्वं शुष्णमवातिरः ।
विदुष्टे तस्य मेधिरास्तेषां श्रवांस्युत्तिर ॥ ७ ॥
इन्द्रमीशानमोजसाभि स्तोमा अनूषत ।
सहस्रं यस्य रातय उत वा सन्ति भूयसीः ॥ ८ ॥

## HYMNE XII.

अग्निं दूतं वृणीमहे होतारं विश्ववेदसं । अस्य यज्ञस्य सुक्रतुं ॥ १ ॥
अग्निमग्निं हवीमभिः सदा हवन्त विश्पतिं । हव्यवाहं पुरुप्रियं ॥ २ ॥
अग्ने देवाँ इहावह जज्ञानो वृक्तबर्हिषे । असि होता न ईड्यः ॥ ३ ॥

---

मायाभिरिन्द्र मायिनं । त्वं शुष्णमवातिरः ।
विदुष्टे तस्य मेधिराः । तेषां श्रवांसि उत्तिर ॥ ७ ॥
इन्द्रमीशानमोजसा । अभि स्तोमा अनूषत ।
सहस्रं यस्य रातयः । उत वा सन्ति भूयसीः ॥ ८ ॥

## HYMNE XII.

अग्निं दूतं वृणीमहे । होतारं विश्ववेदसं । अस्य यज्ञस्य सुक्रतुं ॥ १ ॥
अग्निमग्निं हवीमभिः । सदा हवन्त विश्पतिं । हव्यवाहं पुरुप्रियं ॥ २ ॥
अग्ने देवाँ इहावह । जज्ञानो वृक्तबर्हिषे । असि होता न ईडियः ॥ ३ ॥

---

मायाभिस् इन्द्र मायिनम् । त्वम् शुष्णम् अव-अतिरस् ।
विदुस् ते तस्य मेधिरास् । तेषाम् श्रवांसि उद्-तिर ॥ ७ ॥
इन्द्रम् ईशानम् ओजसा । अभि स्तोमास् अनूषत ।
सहस्रम् यस्य रातयस् । उत वा सन्ति भूयसीस् ॥ ८ ॥

## HYMNE XII.

अग्निम् दूतम् वृणीमहे । होतारम् विश्ववेदसम् । अस्य यज्ञस्य सुक्रतुम् ॥ १ ॥
अग्निम् अग्निम् हवीमभिस् । सदा हवन्त विश्पतिम् । हव्यवाहम् पुरुप्रियम् ॥ २ ॥
अग्ने देवान् इह आ-वह । जज्ञानस् वृक्तबर्हिषे । असि होता नस् ईड्यस् ॥ ३ ॥

ताँ उशतो विबोधय यदग्ने यासि दूत्यं । देवैरासत्सि बर्हिषि ॥ ४ ॥
घृताहवन दीदिवः प्रति ष्म रिषतो दह । अग्ने त्वं रक्षस्विनः ॥ ५ ॥
अग्निनाग्निः समिध्यते कविर्गृहपतिर्युवा । हव्यवाड्जुह्वास्यः ॥ ६ ॥
कविमग्निमुपस्तुहि सत्यधर्माणमध्वरे । देवममीवचातनं ॥ ७ ॥
यस्त्वामग्ने हविष्पतिर्दूतं देव सपर्यति । तस्य स्म प्राविता भव ॥ ८ ॥
यो अग्निं देववीतये हविष्माँ आविवासति । तस्मै पावक मृळय ॥ ९ ॥
स नः पावक दीदिवो ऽग्ने देवाँ इहावह । उप यज्ञं हविश्च नः ॥ १० ॥

---

ताँ उशतो विबोधय । यदग्ने यासि दूतिअं । देवैरासत्सि बर्हिषि ॥ ४ ॥
घृताहवन दीदिवः । प्रति ष्म रिषतो दह । अग्ने तुअं रक्षस्विनः ॥ ५ ॥
अग्निनाग्निः समिध्यते । कविर्गृहपतिर्युवा । हविअवाड्जुअास्यः ॥ ६ ॥
कविमग्निमुपस्तुहि । सत्यधर्माणमध्वरे । देवममीवचातनं ॥ ७ ॥
यस्त्वामग्ने हविष्पतिः । दूतं देव सपर्यति । तस्य स्म प्राविता भव ॥ ८ ॥
यो अग्निं देववीतये । हविष्माँ आविवासति । तस्मै पावक मृळय ॥ ९ ॥
स नः पावक दीदिवः । अग्ने देवाँ इहावह । उप यज्ञं हविश्च नः ॥ १० ॥

---

तान् उशतस् वि-बोधय । यद् अग्ने यासि दूत्यं । देवैस् आ-सत्सि बर्हिषि ॥ ४ ॥
घृताहवन दीदिवस् । प्रति स्म रिषतस् दह । अग्ने त्वम् रक्षस्विनस् ॥ ५ ॥
अग्निना अग्निस् सम्-इध्यते । कविस् गृहपतिस् युवा । हव्यवाड् जुह्वास्यस् ॥ ६ ॥
कविम् अग्निम् उप-स्तुहि । सत्यधर्माणम् अध्वरे । देवम् अमीवचातनम् ॥ ७ ॥
यस् त्वाम् अग्ने हविष्पतिस् । दूतम् देव सपर्यति । तस्य स्म प्राविता भव ॥ ८ ॥
यस् अग्निम् देववीतये । हविष्मान् आ-विवासति । तस्मै पावक मृळय ॥ ९ ॥
सस् नस् पावक दीदिवस् । अग्ने देवान् इह आ-वह । उप यज्ञम् हविस् च नस् ॥ १० ॥

स नः स्तवान आभर गायत्रेण नवीयसा । रयिं वीरवतीमिषं ॥ ११ ॥
अग्ने शुक्रेण शोचिषा विश्वाभिर्देवहूतिभिः । इमं स्तोमं जुषस्व नः ॥ १२ ॥

## HYMNE XIII.

सुसमिद्धो न आवह देवाँ अग्ने हविष्मते । होतः पावक यक्षि च ॥ १ ॥
मधुमन्तं तनूनपाद्यज्ञं देवेषु नः कवे । अद्या कृणुहि वीतये ॥ २ ॥
नराशंसमिह प्रियमस्मिन्यज्ञ उपह्वये । मधुजिह्वं हविष्कृतं ॥ ३ ॥
अग्ने सुखतमे रथे देवाँ ईळित आवह । असि होता मनुर्हितः ॥ ४ ॥

---

स नः स्तवान आभर । गायत्रेण नवीयसा । रयिं वीरवतीमिषं ॥ ११ ॥
अग्ने शुक्रेण शोचिषा । विश्वाभिर्देवहूतिभिः । इमं स्तोमं जुषस्व नः ॥ १२ ॥

## HYMNE XIII.

सुसमिद्धो न आवह । देवाँ अग्ने हविष्मते । होतः पावक यक्षि च ॥ १ ॥
मधुमन्तं तनूनपात् । यज्ञं देवेषु नः कवे । अद्या कृणुहि वीतये ॥ २ ॥
नराशंसमिह प्रियं । अस्मिन्यज्ञ उपह्वये । मधुजिह्वं हविष्कृतं ॥ ३ ॥
अग्ने सुखतमे रथे । देवाँ ईळित आवह । असि होता मनुर्हितः ॥ ४ ॥

---

सस् नस् स्तवानस् आ-भर । गायत्रेण नवीयसा । रयिम् वीरवतीम् इषम् ॥ ११ ॥
अग्ने शुक्रेण शोचिषा । विश्वाभिस् देवहूतिभिस् । इमम् स्तोमम् जुषस्व नस् ॥ १२ ॥

## HYMNE XIII.

सुसमिद्धम् नस् आ-वह । देवान् अग्ने हविष्मते । होतर् पावक यक्षि च ॥ १ ॥
मधुमतम् तनूनपात् । यज्ञम् देवेषु नस् कवे । अद्य कृणुहि वीतये ॥ २ ॥
नराशंसम् इह प्रियम् । अस्मिन् यज्ञे उप-ह्वये । मधुजिह्वम् हविष्कृतम् ॥ ३ ॥
अग्ने सुखतमे रथे । देवान् ईडितम् आ-वह । असि होता मनुर्हितम् ॥ ४ ॥

स्तृणीत बर्हिरानुषग्घृतपृष्ठं मनीषिणः । यत्रामृतस्य चक्षणं ॥ ५ ॥
विश्रयन्तामृतावृधो द्वारो देवीरसश्चतः । अद्या नूनं च यष्टवे ॥ ६ ॥
नक्तोषासा सुपेशसास्मिन्यज्ञ उपह्वये । इदं नो बर्हिरासदे ॥ ७ ॥
ता सुजिह्वा उपह्वये होतारा दैव्या कवी । यज्ञं नो यक्षतामिमं ॥ ८ ॥
इळा सरस्वती मही तिस्रो देवीर्मयोभुवः । बर्हिः सीदन्त्वस्रिधः ॥ ९ ॥
इह त्वष्टारमग्रियं विश्वरूपमुपह्वये । अस्माकमस्तु केवलः ॥ १० ॥
अवसृजा वनस्पते देव देवेभ्यो हविः । प्र दातुरस्तु चेतनं ॥ ११ ॥
स्वाहा यज्ञं कृणोतनेन्द्राय यज्वनो गृहे । तत्र देवाँ उपह्वये ॥ १२ ॥

---

स्तृणीत बर्हिरानुषग् । घृतपृष्ठं मनीषिणः । यत्रामृतस्य चक्षणं ॥ ५ ॥
विश्रयन्तामृतावृधः । द्वारो देवीरसश्चतः । अद्या नूनं च यष्टवे ॥ ६ ॥
नक्तोषासा सुपेशसा । अस्मिन्यज्ञ उपह्वये । इदं नो बर्हिरासदे ॥ ७ ॥
ता सुजिह्वा उपह्वये । होतारा दैव्या कवी । यज्ञं नो यक्षतामिमं ॥ ८ ॥
इळा सरस्वती मही । तिस्रो देवीर्मयोभुवः । बर्हिः सीदतु अस्रिधः ॥ ९ ॥
इह त्वष्टारमग्रियं । विश्वरूपमुपह्वये । अस्माकमस्तु केवलः ॥ १० ॥
अवसृजा वनस्पते । देव देवेभ्यो हविः । प्र दातुरस्तु चेतनं ॥ ११ ॥
स्वाहा यज्ञं कृणोतन । इन्द्राय यज्वनो गृहे । तत्र देवाँ उपह्वये ॥ १२ ॥

---

स्तृणीत बर्हिस् आनुषक् । घृतपृष्ठम् मनीषिणस् । यत्र अमृतस्य चक्षणम् ॥ ५ ॥
वि-श्रयन्ताम् ऋतवृधस् । द्वारस् देवीस् असश्चतस् । अद्य नूनम् च यष्टवे ॥ ६ ॥
नक्तोषसा सुपेशसा । अस्मिन् यज्ञे उप-ह्वये । इदम् नस् बर्हिस् आसदे ॥ ७ ॥
ता सुजिह्वा उप-ह्वये । होतारा दैव्या कवी । यज्ञम् नस् यक्षताम् इमम् ॥ ८ ॥
इडा सरस्वती मही । तिस्रस् देवीस् मयोभुवस् । बर्हिस् सीदतु अस्रिधस् ॥ ९ ॥
इह त्वष्टारम् अग्रियम् । विश्वरूपम् उप-ह्वये । अस्माकम् अस्तु केवलस् ॥ १० ॥
अव-सृज वनस्पते । देव देवेभ्यस् हविस् । प्र दातुर् अस्तु चेतनम् ॥ ११ ॥
स्वाहा यज्ञम् कृणोतन । इन्द्राय यज्वनस् गृहे । तत्र देवान् उप-ह्वये ॥ १२ ॥

## HYMNE XIV.

ऐभिरग्ने दुवो गिरो विश्वेभिः सोमपीतये । देवेभिर्याहि यक्षि च ॥ १ ॥
आ त्वा कण्वा अहूषत गृणन्ति विप्र ते धियः । देवेभिरग्न आगहि ॥ २ ॥
इन्द्रवायू बृहस्पतिं मित्राग्निं पूषणं भगं । आदित्यान्मारुतं गणं ॥ ३ ॥
प्र वो भ्रियन्त इन्दवो मत्सरा मादयिष्णवः । द्रप्सा मध्वश्चमूषदः ॥ ४ ॥
ईळते त्वामवस्यवः कण्वासो वृक्तबर्हिषः । हविष्मन्तो अरङ्कृतः ॥ ५ ॥
घृतपृष्ठा मनोयुजो ये त्वा वहन्ति वह्नयः । आ देवान्त्सोमपीतये ॥ ६ ॥
तान्यजत्राँ ऋतावृधो ऽग्ने पत्नीवतस्कृधि । मध्वः सुजिह्व पायय ॥ ७ ॥

---

## HYMNE XIV.

ऐभिरग्ने दुवो गिरः । विश्वेभिः सोमपीतये । देवेभिर्याहि यक्षि च ॥ १ ॥
आ त्वा कण्वा अहूषत । गृणन्ति विप्र ते धियः । देवेभिरग्न आगहि ॥ २ ॥
इन्द्रवायू बृहस्पतिं । मित्राग्निं पूषणं भगं । आदित्यान्मारुतं गणं ॥ ३ ॥
प्र वो भ्रियन्त इन्दवः । मत्सरा मादयिष्णवः । द्रप्सा मध्वश्चमूषदः ॥ ४ ॥
ईळते त्वामवस्यवः । कण्वासो वृक्तबर्हिषः । हविष्मन्तो अरंकृतः ॥ ५ ॥
घृतपृष्ठा मनोयुजः । ये त्वा वहन्ति वह्नयः । आ देवान्त्सोमपीतये ॥ ६ ॥
तान्यजत्राँ ऋतावृधः । अग्ने पत्नीवतस्कृधि । मध्वः सुजिह्व पायय ॥ ७ ॥

---

### HYMNE XIV.

आ एभिस् अग्ने दुवस् गिरस् । विश्वेभिस् सोमपीतये । देवेभिस् याहि यक्षि च ॥ १ ॥
आ त्वा कण्वास् अहूषत । गृणन्ति विप्र ते धियस् । देवेभिस् अग्ने आ-गहि ॥ २ ॥
इन्द्रवायू बृहस्पतिम् । मित्राग्निम् पूषणम् भगम् । आदित्यान् मारुतम् गणम् ॥ ३ ॥
प्र वस् भ्रियन्ते इन्दवस् । मत्सरास् मादयिष्णवस् । द्रप्सास् मध्वस् चमूषदस् ॥ ४ ॥
ईळते त्वाम् अवस्यवस् । कण्वासस् वृक्तबर्हिषस् । हविष्मन्तस् अरंकृतस् ॥ ५ ॥
घृतपृष्ठास् मनोयुजस् । ये त्वा वहन्ति वह्नयस् । आ देवान् सोमपीतये ॥ ६ ॥
तान् यजत्रान् ऋतावृधस् । अग्ने पत्नीवतस् कृधि । मध्वस् सुजिह्व पायय ॥ ७ ॥

ये यजत्रा य ईड्यास्ते ते पिबन्तु जिह्वया । मधोरग्ने वषट्कृति ॥ ८ ॥
आकीं सूर्यस्य रोचनाद्विश्वाँ देवाँ उषर्बुधः । विप्रो होतेह वक्षति ॥ ९ ॥
विश्वेभिः सोम्यं मध्वग्न इन्द्रेण वायुना । पिबा मित्रस्य धामभिः ॥ १० ॥
त्वं होता मनुर्हितोऽग्ने यज्ञेषु सीदसि । सेमं नो अध्वरं यज ॥ ११ ॥
युक्ष्वा ह्यरुषी रथे हरितो देव रोहितः । ताभिर्देवाँ इहा वह ॥ १२ ॥

## HYMNE XV.

इन्द्र सोमं पिब ऋतुना त्वा विशन्त्विन्दवः । मत्सरासस्तदोकसः ॥ १ ॥
मरुतः पिबत ऋतुना पोत्राद्यज्ञं पुनीतन । यूयं हि ष्ठा सुदानवः ॥ २ ॥

---

ये यजत्रा य ईड्याः । ते ते पिबन्तु जिह्वया । मधोरग्ने वषट्कृति ॥ ८ ॥
आकीं सूर्यस्य रोचनात् । विश्वाँ देवाँ उषर्बुधः । विप्रो होतेह वक्षति ॥ ९ ॥
विश्वेभिः सोम्यं मधु । अग्न इन्द्रेण वायुना । पिबा मित्रस्य धामभिः ॥ १० ॥
त्वं होता मनुर्हितः । अग्ने यज्ञेषु सीदसि । सेमं नो अध्वरं यज ॥ ११ ॥
युक्ष्वा हि अरुषी रथे । हरितो देव रोहितः । ताभिर्देवाँ इहा वह ॥ १२ ॥

## HYMNE XV.

इन्द्र सोमं पिब ऋतुना । आ त्वा विशन्तु इन्दवः । मत्सरासस्तदोकसः ॥ १ ॥
मरुतः पिबत ऋतुना । पोत्राद्यज्ञं पुनीतन । यूयं हि ष्ठा सुदानवः ॥ २ ॥

---

ये यजत्रास् ये ईड्यास् । ते ते पिबन्तु जिह्वया । मधोस् अग्ने वषट्कृति ॥ ८ ॥
आकीम् सूर्यस्य रोचनात् । विश्वान् देवान् उषर्बुधस् । विप्रस् होता इह वक्षति ॥ ९ ॥
विश्वेभिस् सोम्यं मधु । अग्ने इन्द्रेण वायुना । पिब मित्रस्य धामभिस् ॥ १० ॥
त्वम् होता मनुर्हितस् । अग्ने यज्ञेषु सीदसि । सस् इमम् नस् अध्वरम् यज ॥ ११ ॥
युक्ष्व हि अरुषीस् रथे । हरितस् देव रोहितस् । ताभिस् देवान् इह आ-वह ॥ १२ ॥

## HYMNE XV.

इन्द्र सोमम् पिब ऋतुना । आ त्वा विशन्तु इन्दवस् । मत्सरासस् तदोकसस् ॥ १ ॥
मरुतस् पिबत ऋतुना । पोत्रात् यज्ञम् पुनीतन । यूयम् हि स्थ सुदानवस् ॥ २ ॥

अभि यज्ञं गृणीहि नो ग्नावो नेष्टः पिब ऋतुना। त्वं हि रत्नधा असि॥ ३॥
अग्ने देवाँ इहावह सादया योनिषु त्रिषु। परिभूष पिब ऋतुना॥ ४॥
ब्राह्मणादिन्द्र राधसः पिबा सोममृतूँरनु। तवेद्धि सख्यमस्तृतं॥ ५॥
युवं दक्षं धृतव्रत मित्रावरुण दूळभं। ऋतुना यज्ञमाशाथे॥ ६॥
द्रविणोदा द्रविणसो ग्रावहस्तासो अध्वरे। यज्ञेषु देवमीळते॥ ७॥
द्रविणोदा ददातु नो वसूनि यानि शृण्विरे। देवेषु ता वनामहे॥ ८॥
द्रविणोदाः पिपीषति जुहोत प्र च तिष्ठत। नेष्ट्रादृतुभिरिष्यत॥ ९॥
यत्त्वा तुरीयमृतुभिर्द्रविणोदो यजामहे। अध स्मा नो ददिर्भव॥ १०॥

---

अभि यज्ञं गृणीहि नः। ग्नावो नेष्टः पिबर्तुना। तुअं हि रत्नधा असि॥ ३॥
अग्ने देवाँ इहावह। सादया योनिषु त्रिषु। परिभूष पिबर्तुना॥ ४॥
ब्राह्मणादिन्द्र राधसः। पिबा सोममृतूँरनु। तवेद्धि सख्यमस्तृतं॥ ५॥
युवं दक्षं धृतव्रत। मित्रावरुण दूळभं। ऋतुना यज्ञमाशाथे॥ ६॥
द्रविणोदा द्रविणसः। ग्रावहस्तासो अध्वरे। यज्ञेषु देवमीळते॥ ७॥
द्रविणोदा ददातु नः। वसूनि यानि शृण्विरे। देवेषु ता वनामहे॥ ८॥
द्रविणोदाः पिपीषति। जुहोत प्र च तिष्ठत। नेष्ट्रादृतुभिरिष्यत॥ ९॥
यत्त्वा तुरीयमृतुभिः। द्रविणोदो यजामहे। अध स्मा नो ददिर्भव॥ १०॥

---

अभि यज्ञम् गृणीहि नस्। ग्नावस् नेष्टर् पिब ऋतुना। त्वम् हि रत्नधास् असि॥ ३॥
अग्ने देवान् इह आ-वह। सादय योनिषु त्रिषु। परि-भूष पिब ऋतुना॥ ४॥
ब्राह्मणात् इन्द्र राधसस्। पिब सोमम् ऋतून् अनु। तव इत् हि सख्यम् अस्तृतम्॥ ५॥
युवम् दक्षम् धृतव्रत। मित्रावरुणा दूडभम्। ऋतुना यज्ञम् आशाथे॥ ६॥
द्रविणोदास् द्रविणसस्। ग्रावहस्तासस् अध्वरे। यज्ञेषु देवम् ईडते॥ ७॥
द्रविणोदास् ददातु नस्। वसूनि यानि शृण्विरे। देवेषु ता वनामहे॥ ८॥
द्रविणोदास् पिपीषति। जुहोत प्र च तिष्ठत। नेष्ट्रात् ऋतुभिस् इष्यत॥ ९॥
यद् त्वा तुरीयम् ऋतुभिस्। द्रविणोदस् यजामहे। अध स्म नस् ददिर् भव॥ १०॥

अश्विना पिबतं मधु दीद्यग्नी शुचिव्रता । ऋतुना यज्ञवाहसा ॥ ११ ॥
गार्हपत्येन सन्त्य ऋतुना यज्ञनीरसि । देवाँ देवयते यज ॥ १२ ॥

## HYMNE XVI.

आ त्वा वहन्तु हरयो वृषणं सोमपीतये । इन्द्र त्वा सूरचक्षसः ॥ १ ॥
इमा धाना घृतस्नुवो हरी इहोपवक्षतः । इन्द्रं सुखतमे रथे ॥ २ ॥
इन्द्रं प्रातर्हवामह इन्द्रं प्रयत्यध्वरे । इन्द्रं सोमस्य पीतये ॥ ३ ॥
उप नः सुतमागहि हरिभिरिन्द्र केशिभिः । सुते हि त्वा हवामहे ॥ ४ ॥
सेमं नः स्तोममागह्युपेदं सवनं सुतं । गौरो न तृषितः पिब ॥ ५ ॥

---

अश्विना पिबतं मधु । दीद्यग्नी शुचिव्रता । ऋतुना यज्ञवाहसा ॥ ११ ॥
गार्हपत्येन सन्त्य । ऋतुना यज्ञनीरसि । देवाँ देवयते यज ॥ १२ ॥

## HYMNE XVI.

आ त्वा वहन्तु हरयः । वृषणं सोमपीतये । इन्द्र त्वा सूरचक्षसः ॥ १ ॥
इमा धाना घृतस्नुवः । हरी इहोपवक्षतः । इन्द्रं सुखतमे रथे ॥ २ ॥
इन्द्रं प्रातर्हवामहे । इन्द्रं प्रयति अध्वरे । इन्द्रं सोमस्य पीतये ॥ ३ ॥
उप नः सुतमागहि । हरिभिरिन्द्र केशिभिः । सुते हि त्वा हवामहे ॥ ४ ॥
सेमं नः स्तोममागहि । उपेदं सवनं सुतं । गौरो न तृषितः पिब ॥ ५ ॥

---

अश्विना पिबतम् मधु । दीद्यग्नी शुचिव्रता । ऋतुना यज्ञवाहसा ॥ ११ ॥
गार्हपत्येन सन्त्य । ऋतुना यज्ञनीस् असि । देवान् देवयते यज ॥ १२ ॥

## HYMNE XVI.

आ त्वा वहन्तु हरयस् । वृषणम् सोमपीतये । इन्द्र त्वा सूरचक्षसस् ॥ १ ॥
इमास् धानास् घृतस्नुवस् । हरी इह उप-वक्षतस् । इन्द्रम् सुखतमे रथे ॥ २ ॥
इन्द्रम् प्रातर् हवामहे । इन्द्रम् प्रयति अध्वरे । इन्द्रम् सोमस्य पीतये ॥ ३ ॥
उप नस् सुतम् आ-गहि । हरिभिस् इन्द्र केशिभिस् । सुते हि त्वा हवामहे ॥ ४ ॥
सस् इमम् नस् स्तोमम् आ-गहि । उप इदम् सवनम् सुतम् । गौरस् न तृषितस् पिब ॥ ५ ॥

इमे सोमास इन्दवः सुतासो अधि बर्हिषि । ताँ इन्द्र सहसे पिब ॥ ६ ॥
अयं ते स्तोमो अग्रियो हृदिस्पृगस्तु शंतमः । अथा सोमं सुतं पिब ॥ ७ ॥
विश्वमित्सवनं सुतमिन्द्रो मदाय गच्छति । वृत्रहा सोमपीतये ॥ ८ ॥
सेमं नः काममापृण गोभिरश्वैः शतक्रतो । स्तवाम त्वा स्वाध्यः ॥ ९ ॥

## HYMNE XVII.

इन्द्रावरुणयोरहं सम्राजोरव आवृणे । ता नो मृळात ईदृशे ॥ १ ॥
गन्तारा हि स्थो ऽवसे हवं विप्रस्य मावतः । धर्तारा चर्षणीनां ॥ २ ॥

---

इमे सोमास इन्दवः । सुतासो अधि बर्हिषि । ताँ इन्द्र सहसे पिब ॥ ६ ॥
अयं ते स्तोमो अग्रियः । हृदिस्पृगस्तु शंतमः । अथा सोमं सुतं पिब ॥ ७ ॥
विश्वमित्सवनं सुतं । इन्द्रो मदाय गच्छति । वृत्रहा सोमपीतये ॥ ८ ॥
सेमं नः काममापृण । गोभिरश्वैः शतक्रतो । स्तवाम त्वा सुआधियः ॥ ९ ॥

## HYMNE XVII.

इन्द्रावरुणयोरहं । सम्राजोरव आवृणे । ता नो मृळात ईदृशे ॥ १ ॥
गन्तारा हि स्थो अवसे । हवं विप्रस्य मावतः । धर्तारा चर्षणीनाम् ॥ २ ॥

---

इमे सोमासस् इन्दवस् । सुतासस् अधि बर्हिषि । तान् इन्द्र सहसे पिब ॥ ६ ॥
अयम् ते स्तोमस् अग्रियस् । हृदिस्पृक् अस्तु शंतमस् । अथ सोमम् सुतम् पिब ॥ ७ ॥
विश्वम् इद् सवनम् सुतम् । इन्द्रस् मदाय गच्छति । वृत्रहा सोमपीतये ॥ ८ ॥
सस् इमम् नस् कामम् आ-पृण । गोभिस् अश्वैस् शतक्रतो । स्तवाम त्वा स्वाधियस् ॥ ९ ॥

## HYMNE XVII.

इन्द्रावरुणयोस् अहम् । सम्राजोस् अवस् आ-वृणे । ता नस् मृडातस् ईदृशे ॥ १ ॥
गन्तारा हि स्थस् अवसे । हवम् विप्रस्य मावतस् । धर्तारा चर्षणीनाम् ॥ २ ॥

अनुकामं तर्पयेथामिन्द्रावरुणा राय आ । ता वां नेदिष्ठमीमहे ॥ ३ ॥
युवाकु हि शचीनां युवाकु सुमतीनां । भूयाम वाजदाव्नां ॥ ४ ॥
इन्द्रः सहस्रदाव्नां वरुणः शंस्यानां । क्रतुर्भवत्युक्थ्यः ॥ ५ ॥
तयोरिदवसा वयं सनेम नि च धीमहि । स्यादुत प्ररेचनं ॥ ६ ॥
इन्द्रावरुणा वामहं हुवे चित्राय राधसे । अस्मान्सु जिग्युषस्कृतं ॥ ७ ॥
इन्द्रावरुणा नू नु वां सिषासन्तीषु धीष्वा । अस्मभ्यं शर्म यच्छतं ॥ ८ ॥
प्र वामश्नोतु सुष्टुतिरिन्द्रावरुणा यां हुवे । यामृधाथे सधस्तुतिं ॥ ९ ॥

---

अनुकामं तर्पयेथां । इन्द्रावरुणा राय आ । ता वां नेदिष्ठमीमहे ॥ ३ ॥
युवाकु हि शचीनआं । युवाकु सुमतीनआं । भूयाम वाजदाव्नआं ॥ ४ ॥
इन्द्रः सहस्रदाव्नआं । वरुणः शंसिआनआं । क्रतुर्भवति उक्थिअः ॥ ५ ॥
तयोरिदवसा वयं । सनेम नि च धीमहि । सिआदुत प्ररेचनं ॥ ६ ॥
इन्द्रावरुणा वामहं । हुवे चित्राय राधसे । अस्मान्सु जिग्युषस्कृतं ॥ ७ ॥
इन्द्रावरुणा नू नु वां । सिषासन्तीषु धीषु आ । अस्मभ्यं शर्म यच्छतं ॥ ८ ॥
प्र वामश्नोतु सुष्टुतिः । इन्द्रावरुणा यां हुवे । यामृधाथे सधस्तुतिं ॥ ९ ॥

---

अनुकामम् तर्पयेथाम् । इन्द्रावरुणा रायस् आ । ता वाम् नेदिष्ठम् ईमहे ॥ ३ ॥
युवाकु हि शचीनाम् । युवाकु सुमतीनाम् । भूयाम वाजदाव्नाम् ॥ ४ ॥
इन्द्रस् सहस्रदाव्नाम् । वरुणास् शंस्यानाम् । क्रतुस् भवति उक्थ्यस् ॥ ५ ॥
तयोस् इद् अवसा वयम् । सनेम नि च धीमहि । स्यात् उत प्ररेचनम् ॥ ६ ॥
इन्द्रावरुणा वाम् अहम् । हुवे चित्राय राधसे । अस्मान् सु जिग्युषस् कृतम् ॥ ७ ॥
इन्द्रावरुणा नु नु वाम् । सिषासन्तीषु धीषु आ । अस्मभ्यम् शर्म यच्छतम् ॥ ८ ॥
प्र वाम् अश्नोतु सुष्टुतिस् । इन्द्रावरुणा याम् हुवे । याम् ऋधाथे सधस्तुतिम् ॥ ९ ॥

## HYMNE XVIII.

सोमानं स्वरणं कृणुहि ब्रह्मणस्पते । कक्षीवन्तं य औशिजः ॥ १ ॥
यो रेवान्यो अमीवहा वसुवित्पुष्टिवर्धनः । स नः सिषक्तु यस्तुरः ॥ २ ॥
मा नः शंसो अररुषो धूर्तिः प्रणङ्मर्त्यस्य । रक्षा णो ब्रह्मणस्पते ॥ ३ ॥
स घा वीरो न रिष्यति यमिन्द्रो ब्रह्मणस्पतिः । सोमो हिनोति मर्त्यं ॥ ४ ॥
त्वं तं ब्रह्मणस्पते सोम इन्द्रश्च मर्त्यं । दक्षिणा पात्वंहसः ॥ ५ ॥
सदसस्पतिमद्भुतं प्रियमिन्द्रस्य काम्यं । सनिं मेधामयासिषं ॥ ६ ॥
यस्मादृते न सिध्यति यज्ञो विपश्चितश्च न । स धीनां योगमिन्वति ॥ ७ ॥

## HYMNE XVIII.

सोमआनं सुअरणं । कृणुहि ब्रह्मणस्पते । कक्षीवन्तं य औशिजः ॥ १ ॥
यो रेवान्यो अमीवहा । वसुवित्पुष्टिवर्धनः । स नः सिषक्तु यस्तुरः ॥ २ ॥
मा नः शंसो अररुषः । धूर्तिः प्रणङ्मर्तिअस्य । रक्षा णो ब्रह्मणस्पते ॥ ३ ॥
स घा वीरो न रिष्यति । यमिन्द्रो ब्रह्मणस्पतिः । सोमो हिनोति मर्तिअं ॥ ४ ॥
तुअं तं ब्रह्मणस्पते । सोम इन्द्रश्च मर्तिअं । दक्षिणा पातु अंहसः ॥ ५ ॥
सदसस्पतिमद्भुतं । प्रियमिन्द्रस्य कामिअं । सनिं मेधामयासिषं ॥ ६ ॥
यस्मादृते न सिध्यति । यज्ञो विपश्चितश्च न । स धीनां योगमिन्वति ॥ ७ ॥

### HYMNE XVIII.

सोमानम् स्वरणाम् । कृणुहि ब्रह्मणास्पते । कक्षीवतम् यस् औशिजस् ॥ १ ॥
यस् रेवान् यस् अमीवहा । वसुविद् पुष्टिवर्धनः । सस् नस् सिषक्तु यस् तुरस् ॥ २ ॥
मा नस् शंसस् अररुपस् । धूर्तिस् प्रणाक् मर्त्यस्य । रक्ष नस् ब्रह्मणास्पते ॥ ३ ॥
सस् घ वीरस् न रिष्यति । यम् इन्द्रस् ब्रह्मणास्पतिस् । सोमस् हिनोति मर्त्यम् ॥ ४ ॥
त्वम् तम् ब्रह्मणास्पते । सोमस् इन्द्रस् च मर्त्यम् । दक्षिणा पातु अंहसस् ॥ ५ ॥
सदसस्पतिम् अद्भुतम् । प्रियम् इन्द्रस्य काम्यम् । सनिम् मेधाम् अयासिषम् ॥ ६ ॥
यस्मात् ऋते न सिध्यति । यज्ञस् विपश्चितस् च न । सस् धीनाम् योगम् इन्वति ॥ ७ ॥

आदध्नोति हविष्कृतिं प्राञ्चं कृणोत्यध्वरं । होत्रा देवेषु गच्छति ॥ ८ ॥
नराशंसं सुधृष्टममपश्यं सप्रथस्तमं । दिवो न सद्ममखसं ॥ ९ ॥

## HYMNE XIX.

प्रति त्यं चारुमध्वरं गोपीथाय प्रहूयसे । मरुद्भिरग्न आगहि ॥ १ ॥
नहि देवो न मर्त्यो महस्तव क्रतुं परः । मरुद्भिरग्न आगहि ॥ २ ॥
ये महो रजसो विदुर्विश्वे देवासो अद्रुहः । मरुद्भिरग्न आगहि । ३ ॥
य उग्रा अर्कमानृचुरनाधृष्टास ओजसा । मरुद्भिरग्न आगहि ॥ ४ ॥

---

आदध्नोति हविष्कृतिं । प्राञ्चं कृणोति अध्वरं । होत्रा देवेषु गच्छति ॥ ८ ॥
नराशंसं सुधृष्टमं । अपश्यं सप्रथस्तमं । दिवो न सद्ममखसं ॥ ९ ॥

## HYMNE XIX.

प्रति त्यं चारुमध्वरं । गोपीथाय प्रहूयसे । मरुद्भिरग्न आगहि ॥ १ ॥
न हि देवो न मर्त्यः । महस्तव क्रतुं परः । मरुद्भिरग्न आगहि ॥ २ ॥
ये महो रजसो विदुः । विश्वे देवासो अद्रुहः । मरुद्भिरग्न आगहि ॥ ३ ॥
य उग्रा अर्कमानृचुः । अनाधृष्टास ओजसा । मरुद्भिरग्न आगहि ॥ ४ ॥

---

आत् अध्नोति हविष्कृतिम् । प्राञ्चम् कृणोति अध्वरम् । होत्रा देवेषु गच्छति ॥ ८ ॥
नराशंसम् सुधृष्टमम् । अपश्यम् सप्रथस्तमम् । दिवस् न सद्ममखसम् ॥ ९ ॥

## HYMNE XIX.

प्रति त्यम् चारुम् अध्वरम् । गोपीथाय प्रहूयसे । मरुद्भिस् अग्ने आ-गहि ॥ १ ॥
न हि देवस् न मर्त्यस् । महस् तव क्रतुम् परस् । मरुद्भिस् अग्ने आ-गहि ॥ २ ॥
ये महस् रजसस् विदुस् । विश्वे देवासस् अद्रुहस् । मरुद्भिस् अग्ने आ-गहि ॥ ३ ॥
ये उग्रास् अर्कम् आनृचुस् । अनाधृष्टासस् ओजसा । मरुद्भिस् अग्ने आ-गहि ॥ ४ ॥

ये शुभ्रा घोरवर्पसः सुक्षत्रासो रिशादसः । मरुद्भिरग्न आगहि ॥ ५ ॥
ये नाकस्याधि रोचने दिवि देवास आसते । मरुद्भिरग्न आगहि ॥ ६ ॥
य ईङ्खयन्ति पर्वताँ तिरः समुद्रमर्णवं । मरुद्भिरग्न आगहि ॥ ७ ॥
आ ये तन्वन्ति रश्मिभिस्तिरः समुद्रमोजसा । मरुद्भिरग्न आगहि ॥ ८ ॥
अभि त्वा पूर्वपीतये सृजामि सोम्यं मधु । मरुद्भिरग्न आगहि ॥ ९ ॥

---

ये शुभ्रा घोरवर्पसः । सुक्षत्रासो रिशादसः । मरुद्भिरग्न आगहि ॥ ५ ॥
ये नाकस्याधि रोचने । दिवि देवास आसते । मरुद्भिरग्न आगहि ॥ ६ ॥
य ईङ्खयन्ति पर्वतान् । तिरः समुद्रमर्णवं । मरुद्भिरग्न आगहि ॥ ७ ॥
आ ये तन्वन्ति रश्मिभिः । तिरः समुद्रमोजसा । मरुद्भिरग्न आगहि ॥ ८ ॥
अभि त्वा पूर्वपीतये । सृजामि सोमिअं मधु । मरुद्भिरग्न आगहि ॥ ९ ॥

---

ये शुभ्रास् घोरवर्पसस् । सुक्षत्रासस् रिशादसस् । मरुद्भिस् अग्ने आ-गहि ॥ ५ ॥
ये नाकस्य अधि रोचने । दिवि देवासस् आसते । मरुद्भिस् अग्ने आ-गहि ॥ ६ ॥
ये ईङ्खयन्ति पर्वतान् । तिरस् समुद्रम् अर्णवम् । मरुद्भिस् अग्ने आ-गहि ॥ ७ ॥
आ ये तन्वन्ति रश्मिभिस् । तिरस् समुद्रम् ओजसा । मरुद्भिस् अग्ने आ-गहि ॥ ८ ॥
अभि त्वा पूर्वपीतये । सृजामि सोम्यं मधु । मरुद्भिस् अग्ने आ-गहि ॥ ९ ॥

# ANMERKUNGEN.

## I. NALA.

Das grosse, aus gegen 100,000 Strophen bestehende epische Gedicht Mahābhārata, in welchem diese Erzählung eine Episode bildet, beschreibt den Kampf zwischen den Söhnen zweier Brüder — des Pāṇḍu und Dhṛtarashṭra — um die Oberherrschaft über Indien. Der älteste unter den fünf Söhnen des Pāṇḍu — Judhishṭhira — wird eines Tages von seinem Vetter Durjodhana im Würfelspiel besiegt, und muss in Folge dessen mit seinen Brüdern zwölf Jahre in Wäldern zubringen. Der Brahmane Bṛhadaçva begleitet die Verbannten und erzählt ihnen, um sie zu trösten, die Geschichte vom König Nala, der durch's Spiel um Reich und Vermögen, um Weib und Kind kam, zuletzt aber doch Alles wieder erlangte. Bṛhadaçva richtet die Erzählung zunächst an Judhishṭhira (vgl. VII. 17. *b.*), den er mit कुरुनन्दन, कौन्तेय, कौरव्य, पाण्डव, प्रभो, भारत, महाराज, महीपते, विशांपते u. s. w. anredet.

### KAPITEL I.

Str. 2. *a.* Man ergänze देवानाम्. Wie der Götterfürst Indra an der Spitze der Götter steht, so Nala an der Spitze der Fürsten der Menschen.

Str. 8. *b.* महायशस्. Die Annahme, dass die Form महा am Anfange von zusammengesetzten Wörtern aus महत् (oder vielmehr महन्त्) entsprungen sei, hat jetzt nichts mehr für sich, da wir aus den *Veda's* ersehen, dass diese Form auch ausserhalb des Composi-

*

tums im Gebrauch war. S. *Ṛv.* VI. 6. *c.*, wo sich der Acc. Sg. Masc. मह्याम् findet.

Str. 16. *a.* अदृष्टकामस् = अदृष्टयोः कामस्.

Str. 19. *b.* ते und तव. Ich bemerke hier ein für alle Male, dass man die tonlosen Formen der 1ten und 2ten Person (मा, मे, नौ, नस्; त्वा, ते, वाम्, वस्) niemals am Anfange eines Halbverses oder Satzes antrifft, dass die entsprechenden betonten dagegen uns im Innern oder am Ende eines Halbverses häufig auch in solchen Fällen begegnen, die die indischen Grammatiker nicht namhaft machen. Vgl. «Ein erster Versuch über den Accent im Sanskrit» §. 54. Das überaus seltene Vorkommen von मा und त्वा, die, wenn ein consonantisch anlautendes Wort folgt, sich eben so gut in den Vers fügen, wie माम् und त्वाम्, bringt mich auf die Vermuthung, dass wir diese Erscheinung lediglich unwissenden Abschreibern zu verdanken haben.

Str. 20. *b.* Bopp fasst त्वत् als Ablativ auf und schreibt demnach त्वद् अन्यम्. Ich kenne im Augenblick nur zwei Stellen, in denen die Form auf अत् nothwendig als Ablativ gefasst werden muss: und zwar die eine in den *Veda's* (नान्या युवत्प्रमतिरस्ति मह्यं *Ṛv.* CIX. 1.), die andere in einem sehr späten Werke, dem Bhagavata-Purāṇa (नान्यत्त्वदस्ति ed. Burnouf III. 9. 1). Dass der Inder frühe das Gefühl für die Ablative मत्, अस्मत्, त्वत् und युष्मत् verlor, beweisst sowohl der Umstand, dass er dieselben nach der Analogie von तद्, एतद् und यद् am Anfange von Compositis für das Thema zu setzen anfing, als auch der, dass er nicht nur die Possessiva मदीय, अस्मदीय, त्वदीय und युष्मदीय daraus bildete, sondern sogar einen neuen Ablativ मत्तस् und त्वत्तस्.

Str. 22. *a.* Das Adverb अन्ति, wovon अन्तिक stammt, findet sich *Ṛv.* LXXIX. 11. in der Bedeutung «nahe».

Str. 23. *a.* Alle von Bopp verglichenen Handschriften und die Calc. Ausg. lesen सखिगणावृता, wie es das Metrum erfordert. Mit

Unrecht habe ich Bopp's Emendation in der 2ten Ausgabe des Nala in den Text aufgenommen.

## KAPITEL II.

Str. 20. *a.* विदर्भराजस्. Vgl. विदर्भराजा XII. 31. *a.*

Str. 22. *b.* Da ich sonst in der Chrestomathie immer derjenigen Schreibart den Vorzug gegeben habe, die der ursprünglichen Form eines Wortes am nächsten kommt, so hätte ich auch hier von Rechts wegen निसूदन schreiben müssen.

Str. 27. *b.* मन्मथ. Nach den Indischen Grammatikern (s. Wilson's Lexicon u. d. W.) ist dieses Wort aus einem sonst nicht vorhandenen मत् «Herz» und मथ zusammengesetzt. Bopp und Lassen (im Glossar zur Anthologie) zerlegen dasselbe in मन् (Bopp: मन् pro मनस्, Lassen: मन् f. cogitatio?) und मथ. Nach meiner Ansicht ist मन्मथ gar kein zusammengesetztes Wort, sondern eine reduplicirte Form von मन्थ्, wie दन्दश «Zahn» von दंश्.

Str. 30. *b.* अस्माकम्. In meiner Abhandlung «Die Declination im Sanskrit» §. 81. Anm. 1. wusste ich über die Formen अस्माकम् und युष्माकम् nichts zu sagen. Jetzt ersehe ich aus Bopp's vergleichender Grammatik S. 485, dass schon Max. Schmidt diese Genitivi für Possessiva genommen, und dass später Rosen im «Journal of Education» Juli-Oct. 1834, S. 348, dieses durch den *Veda*-Dialekt (युष्माकाभिरूतिभिस् «durch eure Hülfe») bestätigt habe. In dem von Rosen herausgegebenen ersten Buche der «*Ṛgveda-Saṁhitā*» findet sich auch das Possessivum der 1ten Person अस्माक. XCVII. 3. अस्माकास्: सूरयस्, C. 6. अस्माकेभिर्नृभिस्. Am leichtesten können wir uns diese erhärteten neutralen Formen erklären, wenn wir annehmen, dass sie ursprünglich bloss praedicativ gebraucht wurden.

## KAPITEL III.

Str. 13. *b.* इव प्रभाम् gegen das Metrum. In der «Zeitschrift für die Kunde des Morgenl.» Bd. V. S. 268. schlägt Gildemeister vor,

« इव विभाम् oder vielleicht, den Schriftzügen näher, इव शुभाम् zu corrigiren und anzunehmen, dass der seltenere substantivische Gebrauch von शुभा jenes प्रभा als Glosse in den Text gebracht habe. » Die von Colebrooke, « *Essays* » II. S. 71. in der Note erwähnte Regel, dass प्र, ह्र, ब्र, क्र bisweilen keine Position machen, will derselbe Gelehrte mit Recht hier nicht angewendet wissen, da noch keine Bestätigung dafür beigebracht ist.

